M.A. Sanskrit
Year – I
Semester – II
Paper - III

# वेदान्तसारः साङ्ख्यकारिका च
# Vedantasara & Sankhyakarika

## Centre for Distance and Online Education


श्रीचन्द्रशेखरेन्द्रसरस्वतीविश्वमहाविद्यालयः

**Sri Chandrasekharendra Saraswathi Viswa Mahavidyalaya**
Deemed to be University u/s 3 of UGC Act 1956 - Accredited with 'A' grade by NAAC
**Enathur, Kanchipuram 631561.**
Sponsored and run by Sri Kanchi Kamakoti Peetam Charitable Trust

**Chief Editor**
Prof. Dr. G. Srinivasu
Vice-Chancellor, SCSVMV

**General Editor**
Dr. B. Balaji Srinivasan
Director, CDOE

**Programme Co-ordinator**
Dr. Debajyoti Jena

**Additional Co-ordinator**
1. Dr. R. Naveen (Academic)
2. Dr. M. Senthil Kumaran (Technical)

**Course Co-ordinator**
Dr. R. Naveen

**Course Writer**
Dr. R. Naveen
Dr. T.K. Narasimhan
Dr. Shubh Chandra Jha
Dr. Mayank Pandey
R.K.Pirakas

**Assistants**
S. Vasudevan
S.V. Kalpavalli

**© SCSVMV Deemed University, June 2024**
**All rights reserved. No part of this work may be reproduced in any form, by mimeograph any other means, without permission in writing from the below mentioned centre**
**Further information on the SCSVMV ODL Programmes may be obtained from**
**Centre for Distance and Online Education (CDOE)**
**Sri Chandrasekharendra Saraswathi Viswa Mahavidyalaya,**
**Enathur,Kanchipuram-631561.**
**Tamil Nadu, India**
**Phone: 044 – 2726 4301; Mail Id: onlineprograms@kanchiuniv.ac.in ;**

# शुभाभिनन्दनानि

संसकृतवाङ्मयाध्ययननिरतानां समेषां विद्यार्थिनां श्रीचन्द्रशेखरेन्द्रसरस्वती विश्वमहाविद्यालयेन काञ्चीपुरस्थेन सञ्चाल्यमाने दूरविद्याकेन्द्रे भागं ग्रहीतुं सादरं स्वागतम्। विश्वविद्यालयोऽयं राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा (NAAC) 'A' श्रेण्यां प्रमाणीकृतः एवं विश्वविद्यालयानुदानायोगेन (UGC) सङ्घटनेन दूरविद्याकेन्द्रत्वेन अनुमतः वर्तते।

विश्वमहाविद्यालयोऽयं १९९३ वर्षे भारतसर्वकारद्वारा प्रकटितः तदारभ्य प्रतिवर्षं विद्याध्यापनक्षेत्रे तथा परिशोधनकार्ये च महतीं समुन्नतिं प्रदर्शयन् वर्धमानः अस्ति। भारतीयपरम्परायां प्राचीनानां ऋषीणां पण्डितानां तथा कवीनां च योगदानं मानवस्य सर्वाङ्गीनविकासाय तथा लोकपरिरक्षणाय च ज्ञानगङ्गां निरन्तरतया प्रवाहयति। नैकानि शास्त्राणि तत्र वर्तन्ते। वेदाः चत्वारः, उपवेदाः, उपनिषदः, षडङ्गाणि, षड्दर्शनानि, अष्टादशपुराणानि, इतिहासौ, धर्मशास्त्रं, काव्यानि, चतुःषष्टिकलाः इत्यादिना ज्ञानपरम्परा अनन्ता सति बहुभ्यः युगेभ्यः लोकस्य मार्गदर्शनं करोति।

प्रकृतेऽस्मिन् काले पाश्चात्यविज्ञानस्य प्रभावेन भारतीय ज्ञानदीपस्य प्रकाशः ह्रासतामेति। आधुनिकविज्ञानद्वारा समाजस्य लाभः विद्यते एव। तथापि अस्मदीयं वाङ्मयं तु न विस्मरणीयं परित्याज्यं च। भारतीयानाम् अनुभवे आचरणे च विद्यामाना योगविद्या प्रपञ्चे सर्वैरपि आद्रियमाना दृश्यते। एवम् आयुर्वेदादयः अपि। अतः अधुनातनविज्ञानेन साकं प्राचीनविज्ञानस्य संयोजनद्वारा प्रपञ्चस्य महानुपयोगः भवति। अनयैव धिया श्रीकाञ्ची कामकोटिपीठाधिपैः प्राचीन-नवीन विद्ययोः संमेलनाय विश्वमहाविद्यालयोऽयं संस्थापितः। तदिदं लक्ष्यम् अग्रे सारयति अध्यापनेन परिशोधनेन च।

श्रीचन्द्रशेखरेन्द्रसरस्वती विश्वमहाविद्यालयः स्वीयेप्राङ्गने बहुविधाः विद्याः बोधयन् दूरस्थानां जिज्ञासूनामपि लाभाय केन्द्रमिदं प्रचालयति। एतत् द्वारा विद्यार्थिनः लाभं लभन्तामिति आशास्महे।

Vice chancellor

Sri Chandrasekharendra Saraswati Viswa Mahavidyalaya

Enathur, Kanchipuram

# वेदान्तसारः साङ्ख्यकारिका च

# Vedantasara & Sankyakarika

**पाठ्यपरिचयः**

पत्रेऽस्मिन् वेदान्तसारः इति ग्रन्थः श्रीमद्सदानन्दसरस्वतीप्रणीतः, पुनश्च ईश्वरकृष्णेन प्रणीता सांख्यकारिका च पाठ्यते। तत्र आद्ये खण्डत्रये वेदान्तसारः पाठ्यते। अन्त्ये खण्डद्वये सांख्यकारिका पाठ्यते। एतदध्येनेन नूनं दर्शनपरिचयः अवश्यं भवति। निवृत्तिमार्गे साधनपरिचयः भवति।

## प्रथमः खण्डः

खण्डेऽस्मिन् मङ्गलश्लोकः वेदान्तशब्दार्थः वेदान्ताध्ययने कः अधिकारि अनुबन्धचतुष्टयसान्दर्भिक श्रुतयः अध्यारोपः अपवादः समष्टिः व्यष्टिः एते विषयाः प्रतिपाद्यन्ते।

## द्वितीयः खण्डः

आत्मपदार्थः, पुत्रः आत्मा इति, इन्द्रियम् आत्मा, शरीरं आत्मा, ज्ञानाश्रयः आत्मा, इत्येतेषां पक्षाणां खण्डनपूर्वकं वेदान्तपदम् उपस्थाप्यते।

## तृतीयः खण्डः

आत्मसाक्षात्कारप्राप्तिसाधनानि महावाक्यपरिचयः तत्वमसि वाक्यार्थः जहल्लक्षणा अजहल्लक्षणा जहदजहल्लक्षणा इत्येतेषां उपपत्तिः सम्भवति न वेति विचारः।

## चतुर्थः खण्डः

सांख्यकारिकापरिचयः मङ्गलश्लोकार्थः दुःखत्रयं किं, सांख्यरीत्या कति पदार्थाः अव्यक्तं नाम किं, पुरुषः नाम कः इत्यादि विषयाः प्रतिपाद्यन्ते।

## पञ्चमः खण्डः

खण्डेऽस्मिन् संसारहेतुभूताविवेकः किं निबन्धनः, विवेकः कथं सम्पादनीयः, अन्तःकरणप्रभेदाः, अन्तःकरणवृत्तयः पुरुषस्य स्वभावः इत्यादिविषयाः प्रतिपाद्यन्ते।

| खण्डः | विषयः | पुटसङ्ख्या |
|---|---|---|
| प्रथमः | आदितः व्यष्टिसमष्टिनिरूपणपर्यन्तो भागः | 6-36 |
| द्वितीयः | आत्मस्वरूपनिरूपणादारभ्य तत्वमसि वाक्यार्थविश्लेषणपर्यन्तम् | 37-55 |
| तृतीयः | श्रवणमननिदिध्यासनादारभ्य ग्रन्थान्तभागः | 56-66 |
| चतुर्थः | दुःखत्रयनिरूपणादारभ्य सूक्ष्मशरीरसाधनपर्यन्तम् | 67-92 |
| पञ्चमः | धर्मादिफलवर्णनादारभ्य आन्तम् | 93-109 |

# खण्डः - १

## प्रस्तावना

विदितमेवेदं दर्शनेषु अन्यतमं वेदान्तदर्शनं। दर्शनं नाम दृश्यते अनेनेति व्युत्पत्त्या करणे ल्युऽन्तः शब्दः अयम्। आत्मसाक्षात्कारप्रतिपादकं शास्त्रमित्यर्थःवेदान्तो नाम उपनिषत्। उपनिषन्नाम अज्ञाननाशिका ब्र्ह्मविधा इत्यर्थः। उपनिशदः सारप्रतिपादकं सूत्रमेव ब्रह्मसूत्रमित्युच्यते। तश्र्च भगवता व्यासेन प्रणीतं। तत्र प्रतिपादितानां विषयानां शङ्ग्रहेण प्रतिपादानात् ग्रन्थोऽयं वेदान्तसारः इत्युच्यते। ग्रन्थोऽयं आचार्यैः सदानन्दसरस्वतिमहोदयैः कृतः। अत्र वेदान्तः नाम किम्? एतदध्ययने कः अधिकारी? अध्यारोपापवादन्यायः, समष्टिव्यष्टी, पञ्चीकरणप्रक्रिया, तत्त्वमसि महावाक्यार्थविवरम् इत्यादि सर्वं प्रतिपादितं भवति।

## उद्देश्यम्

1 दार्शनिकपरिभाषानां सानं भवति।

2 वेदान्तशब्दस्य अर्थज्ञानं भवति।

3 अधायाशेप अपवाद न्यास्य ज्ञान् भवति।

4 पञ्चीकरण प्रक्रियाः ज्ञानं भवति।

5 तत्वमसि महावाक्यार्थज्ञानं भवति।

6 जहदजहल्लक्षणायां वृत्तेः ज्ञानं भवति।

अखण्डं सच्चिदानन्दम् अवाङ्मनसगोचरम् ।

आत्मानम् अखिलाधारम् आश्रये अभीष्टसिद्धये ॥ १ ॥

अर्थतोऽप्यद्वयानन्दानतीतद्वैतभानतः ।

गुरूनाराध्य वेदान्तसारं वक्ष्ये यथामति ॥ २ ॥

वेदान्तो नामोपनिषत्प्रमाणं तदनुसारीणि शारीरकसूत्राणि च । अस्य वेदान्तप्रकरणत्वात् तदीयैरेवानुबन्धैस्तद्वत्तासिद्धेर्न ते पृथगालोचनीया। तत्र अनुबन्धो नाम अधिकारिविषयसंबन्धप्रयोजनानि। अधिकारी तु विधिवद्धीतवेदवेदाङ्गत्वेनापाततोऽधिगताखिलवेदार्थोऽस्मिञ्जन्मनि जन्मान्तरे वा काम्यनिषिद्धवर्जनपुरःसरं नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेन निर्गतनिखिलकल्मषतया नितान्तनिर्मलस्वान्तः साधनचतुष्टयसंपन्नः प्रमाता । काम्यानि स्वर्गादिष्टसाधनानि ज्योतिष्टोमादीनि । निषिद्धानि नरकाद्यनिष्टसाधनानि ब्राह्मणहननादीनि । नित्यान्यकरणे प्रत्यवायसाधनानि संध्यावन्दनादीनि । नैमित्तिकानि पुत्त्रजन्माद्यनुबन्धीनि जातेष्ट्यादीनि । प्रायश्चित्तानि पापक्षयसाधनानि चान्द्रायणादीनि । उपासनानि सगुणब्रह्मविषयमानसव्यापाररूपाणि शाण्डिल्यविद्यादीनि । एतेषां नित्यादीनां बुद्धिशुद्धिः परमं प्रयोजनम्, 'तमेतमात्मानं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन' इत्यादिश्रुतेः, 'तपसा कल्मषं हन्ति' इत्यादि- स्मृतेश्च । उपासनानां तु चित्तैकाग्र्यम् । नित्यनैमित्तिकयोरुपासनानां चावान्तरफलं पितृलोकसत्यलोकप्राप्तिः, 'कर्मणा पितृलोको विद्यया देवलोकः' इत्यादिश्रुतेः ।

---

अनन्तगुणसंपन्नमनन्तभजनप्रियम् ।

अनन्तरूपिणं वन्दे गुरुमानन्दरूपिणम् ॥ १ ॥

आपदेवेन वेदान्तसारतत्त्वस्य दीपिका ।

सिद्धान्तसंप्रदायानुरोधेन क्रियते शुभा ॥ २ ॥

प्रतिज्ञातं वेदान्तपदं व्याचष्टे - **वेदान्त** इति । उपनिषद्रूपमात्मनः प्रमाणमित्यर्थः । यद्वा उपनिषच्छब्देनात्मज्ञानमुच्यते। तस्य प्रमाणं कारणमित्यर्थः । **तदनुसारीणि**-उपनिषदनुसारीणि आत्मप्रतिपादकानीत्यर्थः। क्वचित्तदुपकारीणीति पाठः । तत्रौपनिषदात्मनिर्णयार्थमपेक्षितन्यायप्रतिपादकानीत्यर्थः । शरीरमेव शरीरकम्, शरीरके भवः शारीरको जीवः, तमधिकृत्य प्रवृत्तानि सूत्राणि '**अथातो ब्रह्मजिज्ञासा**' इत्यादीनि च वेदान्त इत्यर्थः । ननु प्रेक्षावत्प्रवृत्त्यर्थमनुवन्धचतुष्टयं वक्तव्यम्, तत्राह **अस्येति** । **अस्य** प्रारिप्सितस्य ग्रन्थस्य । **तदीयैः** वेदान्तीयैरित्यर्थः। ननु तस्यापि के अनुबन्धा इत्याशङ्क्य तान्वक्तुं सामान्यतस्तावदनुबन्धानाह - **तत्रेति** । पुरुषमनुबध्नाति स्वज्ञानेन प्रेरयतीत्यनुबन्धः । विषयादीनि च तादृशानीति भावः । ननु वक्ष्यमाणमनुबन्धचतुष्टयं वेदान्तस्येत्यत्र किं मानमिति चेत्, श्रृणु '**अथातो ब्रह्मजिज्ञासा** ' इति सूत्रेण सूत्रितत्वमेव मानम् । तथा हि- अस्मिन्सूत्रे तावत्साकाङ्क्षत्वात् 'कर्तव्या' इति पदमध्याहार्यम् । जिज्ञासापदाभिधेययोश्च ज्ञानेच्छयोरकर्तव्यत्वात्, ज्ञानस्येच्छोपसर्जनत्वाच्च ज्ञानस्य फलत्वलाभाय ब्रह्मज्ञानफलको विचारो जिज्ञासापदेन लक्ष्यते। जिज्ञासापदशक्यज्ञानेच्छयोर्विचारेण सह साध्यसाधनरूपसंबन्धसत्त्वात्, गङ्गापदेनेव गङ्गापदशक्यप्रवाहसंबन्धि तीरम् । न च प्रकृतिप्रत्ययात्मकपदद्वयेन कथमेको विचारो लक्ष्यत इति वाच्यम् । 'सुप्तिङन्तं पदम्' इति मते एतस्यैकपदत्वात् । 'शक्तं पदम्' इति मतेऽपि न बाधकम् '**वायुर्वै क्षेपिष्ठा देवता**' इत्याद्यनेकपदघटितार्थवादैर्विध्याकाङ्क्षितप्राशस्त्यलक्षणात् । एतेन वाक्ये न लक्षणा इत्यप्यपास्तम्, अर्थवादानां वाक्यत्वात्, लक्षणाबीजस्य पदवद्वाक्येऽपि तुल्यत्वाच्च । यत्तु शक्तस्यैव लक्षकत्वम्; न च वाक्ये शक्तिः, तस्याः पदधर्मत्वात्,अत एव जिज्ञासापदसमुदायेऽपि नैका लक्षणा, तस्य यौगिकत्वेनाशक्तत्वादिति, तन्न । शक्तस्यैव लक्षकत्वमित्यत्र मानाभावात्, मीमांसकमतेऽशक्तस्यापि वाक्यस्य वाक्यार्थलक्षकत्वाच्च, '**जातपुत्रः**' इति यौगिकस्यापि पदस्यावस्थाविशेषलक्षकत्वाच्च । नैयायिकैरपि यौगिकस्य पदस्य लक्षकत्वाङ्गीकारात् । तन्मते ह्यतीतादौ व्यभिचारेण लिङ्गं नानुमितौ

करणम्, किं तु तज्ज्ञानम् । एवं '**धूमात्**' इति हेतुवाक्ये धूमपदं यथा ज्ञानलक्षकं पञ्चम्युपस्थापितहेतुत्वस्य धूमेऽनन्वयात्, तथा '**सामान्यवत्त्वे सत्यस्मदादिबाह्यकरणप्रत्यक्षत्वात्**' इत्यत्रापि तादृशप्रत्यक्षत्वस्य हेतुविभक्त्युपस्थापितहेतुत्वेऽनन्वयाज्ज्ञाने लक्षणा वक्तव्या । तादृशप्रत्यक्षत्वपदं यौगिकमेवेति न यौगिकस्य लक्ष- कत्वमिति विरुद्धम् । वेदान्तिमतेऽपि पङ्कजादिपदानां तामरसादौ योग एव, वृत्त्यन्तरकल्पने मानाभावात्, मण्डूका- द्यपेक्षया झटिति तामरसप्रतीतिस्तु दशसु शक्तस्य धेन्वादेश्च झटित्युपस्थापकस्य गोशब्दस्येव प्रयोगबाहुल्यात् । तामर- सत्वं तु लक्षणया भासते, योगात्पङ्कजनिकर्तृत्वेनैव भानात् । वृत्त्यन्तरकल्पनातश्च लक्षणा युक्ता गङ्गापदस्येव तीरे । सा चेयं लक्षणा यौगिकपद एवेत्यस्त्येव यौगिकपदस्यापि लक्षकत्वम् । तस्माद्युक्तमुक्तं जिज्ञासापदेन ब्रह्मज्ञानफलको विचारो लक्ष्यत इति । केचित्तु प्रकृत्या साध्यावस्थानं लक्ष्यते, प्रत्ययेन च विचारो लक्ष्यत इति लक्षणाभेदं वदन्ति । तन्न, लक्षणाद्वये मानाभावात्, एकस्यैव तु लक्षणयोपपत्तेरित्यस्मद्गुरव इति दिक् ।

ब्रह्मज्ञानफलकश्च विचारो वेदान्तवाक्यविचार एव, वेदान्तवाक्यैरेवाखण्डाद्वितीयब्रह्मप्रतिपादनात् । अतस्तेषामेव विचार्यत्वेन संबन्धः । ब्रह्मज्ञानं च अनर्थनिवर्तकमिति तस्य फलत्वं युक्तम् । तथा च अनर्थनिवर्तकब्रह्मज्ञानाय वेदान्तवाक्यविचारः कर्तव्य इत्यर्थः संपन्नः। अथ शब्दश्च आनन्तर्यार्थः । तस्यैव च आनन्तर्यं वक्तव्यम्, यदनन्तरं वेदान्तवाक्यविचारे प्रवृत्तिरवश्यं भवति । तादृशं च नाध्ययनादि, कृताध्ययनस्यापि तत्राप्रवृत्तेः; किं तु विवेकादिसाधनचतुष्टयम्, तदनन्तरमवश्यं तत्र प्रवृत्तेः । अतः अथ शब्देन साधनचतुष्टयसंपत्त्यानन्तर्यमुच्यते । ननु न वेदान्तविचार एव कर्तव्यः; सन्त्यनेकानि कर्माण्यविनाश्यफलसाधनानि, '**अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति**' '**अपाम सोमममृता अभूम**' इत्यादिश्रुतेः इत्येतच्छङ्कानिरासार्थम् **अतः** शब्दः । अयमर्थः - साधनचतुष्टयसंपत्त्यनन्तरं वेदान्तवाक्यविचार एव कर्तव्यः, यतः कर्मफलानामनित्यत्वम् '**तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयते**' इत्यादिश्रुतिबलादवगम्यते । न च पूर्वश्रुतिबलान्नित्यत्वमेव किं न

स्यादिति वाच्यम्; कृतकत्वाद्यनु- मानानुगृहीतत्वेन '**आभूतसंप्लवं स्थानममृतत्वं हि भाष्यते**' इत्यादिस्मृतिबलेन च एतस्याः श्रुतेर्बलवत्त्वात्, पूर्वश्रुतेश्चाकल्पक्षयं नित्यत्वे तात्पर्यात् । तथा च अवश्यं वेदान्तविचारः कर्तव्य इति हेतुत्वमतः शब्देनोच्यते । एवं च साधनचतुष्टय संपत्त्यनन्तरमनर्थनिवर्तकब्रह्मज्ञानाय वेदान्तवाक्यविचारोऽवश्यं कर्तव्य इति सूत्रार्थः सिद्धः । अत्र च वक्ष्य- माणानुबन्धचतुष्टयं स्पष्टमेवेति साधूक्तं वक्ष्यमाणानुबन्धचतुष्टयम् '**अथातो ब्रह्मजिज्ञासा**' इति सूत्रेण सूत्रितमिति । एवं च तदीयैरनुबन्धैरित्यपि युक्तमिति ।

अस्मिन्सूत्रे अथशब्देन प्रथममधिकारिण उक्तत्वात् तं प्रथमं दर्शयति । **अधिकारी त्विति**। अधिकारी तु प्रमातेति संबन्धः । अत्र प्रमातृशब्दः सदाचारयुक्तब्राह्मणादिपरः । तेन च '**स्त्रीशूद्रद्विजबन्धूनां न त्रयी श्रुतिगोचरा**' इत्यादिना निषिद्धाधिकारकस्त्र्यादीनां निरासः । मैत्रेय्याः श्रवणं त्वर्थवादमात्रमिति द्रष्टव्यम् । तादृशब्राह्मणमात्रस्याधिकारं व्यावर्तयति - **साधनेति** । तथा च साधनचतुष्टयसंपत्तिरधिकारिविशेषणम् ।

अत्र वदन्ति - न साधनचतुष्टयसंपत्तिरधिकारिविशेषणम्; किंतु मुमुक्षामात्रम्, कामाधिकारे कामनाया एवाधिकारनिमित्तत्वात् । किं च विवेकादीनां हि न क्वचित्साकल्येन श्रवणम्; अपि तु कस्यचित्क्वचिच्छ्रवणम् ।एवं च प्रथममेकशाखापर्यालोचनया किंचिद्विशिष्टस्यैव श्रवणकर्तव्यताप्रतिपत्तिर्जायते, पश्चात्सर्वशाखापर्यालोचनया सकलविशिष्टस्य श्रवणकर्तव्यता । तथा च सकलविशिष्टस्य श्रवणकर्तव्यताप्रतिपत्त्या एकैकविशिष्टस्य श्रवणकर्तृताप्रतिपत्तिः बाधनीया । एवं च प्रसज्य प्रतिषेधप्रसङ्गः । किं च साधनचतुष्टयस्य अधिकारिविशेषणतावादिनापि विवेकादेर्मुमुक्षाहेतुत्वमवश्यं वाच्यम् । एवं च विवेकादीनां मुमुक्षाजननेनान्यथासिद्धेनाधिकारिविशेषणत्वम् । तस्माच्चरमभाविन्येका मुमुक्षैवाधिकारिविशेषणमिति।

अत्रास्मद्गुरवः -पुरुषविशेषणत्वेन हि श्रुतमधिकारिविशेषणं भवति,यथोपनयनमध्ययनाधिकारिणः । **'शान्तो दान्तः'** इत्येवमादौ च विवेकादिकं श्रवणाधिकारिविशेषणत्वेन श्रुतमिति तस्याप्यधिकारिविशेषणत्वम् । न च कामाधिकारे कामनाया एव निमित्तत्वम्; तथा सति राजसूयेऽपि स्वाराज्यकामब्राह्मणादेरप्यधिकारप्रसङ्गः । यदि च श्रुतत्वाद्राजत्वमप्यधिकारिविशेषणम्, तदा विवेकादावपि तुल्यम् ।न च विवेकादीनां मुमुक्षाजननेनान्यथासिद्धिः, मुमुक्षायां कारणीभूतस्यापि विवेकादेरधिकारिविशेषणत्वस्य पुरुषविशेषणत्वेन श्रुतत्वादावश्यकत्वात् । अन्यथा सामर्थ्यादेरपि स्वाराज्यकामनाजननेनान्यथासिद्धेर्न तत्स्यात् । तथा च ' **अर्थी समर्थो विद्वान्'** इत्यादेः व्याकोपः । न च प्रसज्यप्रतिषेधः, सकलविशिष्टस्य श्रवणकर्तव्यताप्रतीतेरेकैकविशिष्टस्य श्रवणकर्तव्यताप्रतीत्या विरोधाभावात् । न हि एकैकविशिष्टस्य श्रवणकर्तव्यताविधायकेन विवेकवता श्रवणं कर्तव्यम् इत्येवमादिना सकलविशिष्टेन न कर्तव्यमिति बोध्यते, तादृशपदाभावात् । आर्थिकेऽर्थे मानाभावात् । अर्थाद्यविवेकिना न कर्तव्यमिति भासते, न तु विवेकवतापि इतरविशिष्टेन न कर्तव्यमिति । सकलविधाने एकविधानस्याप्यावश्यकत्वान्न विरोधः । तस्माद्विरोधाभावात् न प्रसज्यप्रतिषेधः । न च लाघवादेका मुमुक्षैव अधिकारिविशेषणम् ; राजत्ववत्पुरुषविशेषणत्वेन विवेकादेरपि श्रुतत्वाद्गौरवस्यापि न्याय्यत्वात् । तस्मात्साधनचतुष्टयसंपन्न एव अधिकारीति । साधनचतुष्टयसंपत्तौ हेतुमाह- **नितान्तेति** । स्वान्तमन्तःकरणम् । अन्तःकरणशुद्धौ हेतुमाह - **अस्मिन्नित्यादिना** । **काम्येति- 'मोक्षार्थी न प्रवर्तेत तत्र काम्यनिषिद्धयोः'** इति वचनादिति भावः । काम्यादिवर्जनपुरःसरं नित्याद्यनुष्ठाने हेतुमाह - **अधिगतेति** ।अखिलवेदार्थाधिगमे, निषिद्धे तावत्पापभयेन न प्रवृत्तिः । नापि काम्ये, तत्साध्यफलस्यानित्यत्वेन ज्ञानात्ततो विरक्तत्वात् । **'नात्मलाभात्परम्'** इति श्रुतेश्च परमपुरुषार्थात्मज्ञानसाध्यकविचारोपयुक्तसाधनचतुष्टयसंपत्त्युपयुक्तान्तःकरणशुद्ध्यर्थं नित्यादिषु प्रवर्तत इत्यर्थः । नन्वखिलवेदार्थाधिगमे, सत्यादिवाक्येभ्यो

ब्रह्मणोऽप्यवगतत्वाद्विचारात्प्रागेवानर्थनिवृत्तेः श्रवणादिवैयर्थ्यम् तत्राह **आपातत** इति। ननु किमापाततो ज्ञानं निश्चयः संशयो वा । आद्ये पूर्वोक्तदोषप्रसङ्गः । **'तरति शोकमात्मवित्'** इति श्रुतेर्ब्रह्मज्ञानस्यैव तन्निवर्तकत्वान्निश्चयत्वेनैव भ्रमनिवर्तकत्वदर्शनाच्च । न द्वितीयः, सत्यादिवाक्येषु कोट्यन्तरोपस्थापकपदाभावात्तज्जन्यज्ञानस्य संशयत्वानुपपत्तेः । न चैककोटिकः संशयः संभवति, एकस्मिन्धर्मिणि विरोधे भासमाने नानार्थावमर्शस्य संशयलक्षणत्वेन तस्य अनेककोटिकत्वात्, स्वतन्त्रपरिभाषाकल्पने मानाभावात् । किं च सिद्धान्ते ज्ञानस्यायथार्थत्वं न परेषामिव व्यधिकरणप्रकारकत्वेन, अनिर्वचनीयख्यात्यङ्गीकारात् ,किं तु विषयमिथ्यात्वेन । संशयस्य त्वयथार्थत्वं सकलवादिसिद्धम् । एवं च सत्यादिवाक्यजन्यज्ञानस्य संशयत्वे ब्रह्मणो मिथ्यात्वापातः । अनिर्वचनीयख्यातिस्त्वग्रे वक्ष्यते । किं च वेदवाक्यस्य स्वविषये यथार्थज्ञानजनकत्वमिति सर्ववैदिकसंमतम् । तत्र वेदान्तवाक्यानामयथार्थसंशयरूपापातज्ञानजनकत्वे अप्रामाण्यापातः । संशयधर्मी सामान्यतो ज्ञातो विशेषतश्चाज्ञातो वक्तव्यः । ब्रह्मणि च सामान्यविशेषभावोऽनुपपन्न इति नापातज्ञानस्य संशयत्वमिति । ततश्च किमापाततो ज्ञानमिति चेत्, संशयाविरोधिनिश्चय एव । न च निश्चयस्य संशयविरोधित्वात्कथमेतदिति वाच्यम् । दोषानास्कन्दितस्यैव तस्य संशयविरोधित्वात् । अन्यथा 'जलम्' इति निश्चये सति प्रामाण्यसंशयास्कन्दिताद्विषयसंशयो न स्यात् । यदि च प्रामाण्यसंशयादिना निश्चयस्य प्रतिबद्धत्वान्न संशयविरोधित्वम्, तदा असंभावनादिदोषप्रतिबद्धत्वात् नापातनिश्चयस्य अज्ञानादिसकलप्रपञ्चविरोधित्वमिति तुल्यम्, असति प्रतिबन्धके निश्चयस्य संशयविरोधित्वात् । तस्मादापातनिश्चये सत्यपि संशयादेर्जायमानत्वात्तन्निरासार्थं श्रवणादौ प्रवृत्तिर्युक्तेति भावः । आपातनिश्चये हेतुमाह- **अधीतेति** । अधीतेः प्रकारमाह **विधिवदिति**, विध्युक्तप्रकारेणेत्यर्थः । ब्रह्मचर्यादिः प्रकारः । उक्तप्रकारविशिष्टेन कृताध्ययनजन्यबोधो नित्यादिकर्मसु उपयुज्यते, न त्वन्यथेति भावः । अध्ययनं च अध्यापनविधिप्रयुक्तमिति प्राभाकराः । नेति वेदान्तिनः । तथा हि- **' अध्यापयीत'** इति विधिविधेयत्वे अध्ययनस्य अध्यापनविधिप्रयुक्तता स्यात् । न च अध्यापने विधिरस्ति, **'षण्णां तु**

**कर्मणामस्य त्रीणि कर्माणि जीविका । याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः'** इत्यादिना वृत्त्यर्थत्वेन तस्य रागतः प्राप्तत्वात् । न च रागतः प्राप्ने विधिरस्ति, भोजनादावपि तत्प्रसङ्गात्, '**प्राङ्मुखोऽन्नान्यश्नीत'** इत्यस्य च प्राङ्मुख- त्वमात्रविधायकत्वात् । न च 'अध्यापयीत' इति प्रत्यक्षो विधिरस्तीति वाच्यम्, तत्र ' **अधीयीत'** इति वचनविपरिणामात् । अन्यथा '**एतया ग्रामकामं याजयेत'** इत्यत्र '**ग्रामकामो यजेत'** इति वचनविपरिणामो न स्यात् । तत्र च यदि याजनस्य वृत्त्यर्थत्वेन रागतः प्राप्तत्वान्न विधिरिति वचनविपरिणामाश्रयणम्, तदा प्रकृतेऽपि तुल्यम् । तस्माद्रागतः प्राप्तत्वान्नाध्यापने विधिरस्तीति कथमध्यापनविधिप्रयुक्तता अध्ययनस्य । किं च यावत्स्वविधिप्रयुक्तत्वं संभवति, तावन्नान्यविधिप्रयुक्तता । तथा च '**स्वाध्यायोऽध्येतव्यः'** इति स्वविधिप्रयुक्ततैव संभवतीति किमित्यध्यापनविधिप्रयुक्तत्वम् । यदि च अध्ययनमन्तरेण अध्यापनमनुपपन्नमिति अध्यापनविधिप्रयुक्तता अध्ययनस्य, तर्हि अध्यापनमन्तरेण अध्ययनानुपपत्तेः अध्ययनविधिप्रयुक्ततैव अध्यापनस्य किं न स्यात् ? किं च अध्यापनस्यैव विधेयत्वे अध्येतुर्नियोगाभावात् स्वयं प्रवृत्तिर्न स्यात् ? न च इष्टापत्तिः '**सत्यकामो ह वै जाबालो हारिद्रुमतं गौतममेत्योवाच** ' इत्यादिश्रुतौ स्वयं प्रवृत्तेः श्रूयमाणत्वात्। तस्मादध्ययनं स्वविधिप्रयुक्तम्, न त्वध्यापनविधिप्रयुक्तमिति सूक्तम् । विस्तरस्तु विवरणादौ बोद्धव्यः । अध्ययनस्य च फलमर्थावबोधः, दृष्टत्वादिति मीमांसकाः । नेति सिद्धान्तः । तथा हि- 'स्वाध्यायोऽध्येतव्यः' इत्यध्ययनविधिना तावदध्ययनं विधीयते । तस्य च फलाकाङ्क्षायां नार्थावबोधस्य फलत्वेनान्वयः, मानाभावात् । न च दृष्टत्वादिति वाच्यम्, अध्ययनानन्तरमर्थावबोधस्येवावाप्तेरपि दृष्टत्वात् । न च अवाप्तेरपुरुषार्थत्वान्न फलत्वमिति वाच्यम्, अर्थावबोधेऽपि तुल्यत्वात्। न च अर्थावबोधे परम्परया हवनीयादिवत्पुरुषार्थानुबन्धित्वात्फलत्वमिति वाच्यम्, अवाप्तेरपि तुल्यत्वात् । किं च अध्ययनस्यार्थावबोधादवाप्तिरव्यवहितदृष्टा । स तु व्यवहितः । अव्यवहितस्य फलत्वे संभवति न व्यवहितस्य तत्कल्पनं युक्तम् । किं च तव्यप्रत्ययानुरोधेन स्वाध्यायस्य कर्मत्वं प्रतीयते । तच्च उत्पत्त्यादेरभावादवाप्यत्वेनेत्यवाप्तिः श्रुता; न तु अर्थावबोधः । ' **श्रुताश्रुतयोर्मध्ये च श्रुतं बलवत्'** इति

न्यायादवाप्तेरेव फलत्वम् । किं च अध्ययनस्यार्थावबोधार्थत्वे क्षत्रियाणां निषादेष्ट्याद्यध्ययनं न स्यात्, तत्र तेषामधिकाराभावेन कर्मोपयुक्तार्थावबोधस्य व्यर्थत्वात् । अवाप्त्यर्थत्वे तु ब्रह्मयज्ञार्थं तेषामध्ययनं युज्यते । तस्माद्ध्ययनस्यावाप्तिरेव फलमिति । **काम्यानीति** । यद्यपि '**वसन्ते वसन्ते ज्योतिषा यजेत**' इति वीप्सानुरोधेन ज्योतिष्टोमस्य नित्यत्वम्, तथापि नित्यस्य सतः काम्यस्येदमुदाहरणम् । आदिशब्देन च केवलकाम्यपुत्रकामेष्ट्यादीनां संग्रहः । वर्जनं च कामनापुरस्कारेणेति ज्ञेयम् । **इष्टेति** । '**ज्योतिष्टोमेन स्वर्गकामो यजेत**' इति श्रुतेरित्यर्थः । अनिष्टेति । असति प्रायश्चित्ते इति शेष इति केचित् । तन्न। प्रायश्चित्तदशायामपि ब्रह्म- हत्यादेरनिष्टसाधनत्वानपायात् । न हि साधनपदेनात्र फलोपधानं विवक्षितमस्ति, मानाभावात् । एवं वर्जनीयान्युक्त्वा अनुष्ठेयान्याह **नित्यानीति** । ननु किं नित्यानाम् अकरणे प्रत्यवायसाधनत्वम्; अकरणस्य वा । नाद्यः, तदानीं नित्याभावेन कारणत्वानुपपत्तेः । न ह्यसतः कारणत्वं संभवति । न द्वितीयः अकरणस्याभावत्वेन सिद्धान्ते तस्य कारणत्वाभावात्, ग्रन्थविरोधाच्चेति चेत् ।उच्यते ।नित्यानि तावद्विधिविहितानि । विधिश्च भाव्यमन्तरेणानुपपन्नः किंचिद्भाव्यं कल्पयति । न च विश्वजिन्न्यायेन स्वर्गो भाव्यतया कल्पयितुं युक्तः, सदा स्वर्गकामनाया अभावेन कदाचिदननुष्ठानप्रसङ्गात् । न च अकरणे प्रत्यवायप्रागभावपरिपालनं फलमिति वाच्यम् । तथा सति प्रागभाववतः कार्यस्योत्पत्तिनियमेन नित्यानुष्ठानानन्तरमपि कदाचित्प्रत्यवायोत्पत्तिप्रसङ्गात् । अत एव दुःखप्रागभावपरिपालनं न मोक्ष इत्युक्तं न्यायग्रन्थेषु । किं च नित्यानां स्वाकरणे प्रत्यवायस्य प्रागभावपरिपालनं फलम्, उतान्याकरणप्रत्यवायस्य । नाद्यः, तदानीं तादृशप्रत्यवायस्य खपुष्पतुल्यत्वेन प्रागभावानुपपत्तेः । न द्वितीयः, अन्याकरणे प्रत्यवायप्रागभावपरिपालनस्य एतत्फलत्वेऽन्यकरणव्यर्थतापत्तेः । तस्मान्नाकरणे प्रत्यवायप्रागभावपरिपालनं भाव्यम् । किं तु ज्ञानाज्ञानकृतानां पापानां क्षय एव, तस्य सर्वदेप्सितत्वात् । एवं च न नित्यानामकरणे स्वतन्त्रप्रत्यवायोत्पादः, पूर्वोक्तरीत्या कारणाभावात् । किं तु न पापक्षय इति तत्र पापं तिष्ठति । तस्य च पापस्य नित्यानामकरणं ज्ञापकम्, '**अकुर्वन्विहितं कर्म**' इति शतृप्रत्ययस्य लक्षणार्थत्वात्, '**लक्षणहेत्वोः**

**क्रियायाः**' इत्युक्तत्वात् । न च अकरणस्य ज्ञापकत्वमपि कथम् ; ज्ञापकत्वं हि ज्ञानजनकत्वम्, न च अभावस्य तत्संभवतीति वाच्यम्, जनकज्ञानविषयस्यैव गमकत्वात् । धूमादेरपि वह्निगमकत्वं न तज्ज्ञानजनकत्वम्, अतीतादौ व्यभिचारात् । किं तु तादृशज्ञानविषयत्वमेव । तथा च अकरणज्ञानस्य जनकत्वान्नाकरणस्य जनकत्वप्रसङ्गः । न च '**विहितस्याननुष्ठानात्**' इति पञ्चम्या अकरणस्य हेतुत्वं बोध्यत इति वाच्यम् । अभावस्य हेतुत्वानुपपत्त्या पञ्चम्या ज्ञापकत्वार्थत्वात् । एवं च नित्यानामकरणं प्रत्यवायज्ञापकम् । तथा च अकरणे साधनानि ज्ञापकानीत्यर्थः । न च नित्याकरणस्यैव प्रत्यवायज्ञापकत्वं न नित्यानामिति वाच्यम्, विशिष्टस्य ज्ञापकत्वे विशेषणस्यापि ज्ञापकत्वात् । अथवा यद्यपि नित्यानामकरणस्य वा न प्रत्यवायहेतुत्वम्, तथापि नित्यकालेऽनुष्ठितक्रियाया एव स्वतन्त्रप्रत्यवायहेतुत्वम्, '**अकुर्वन्**' इति शतृप्रत्ययस्य '**विहितस्याननुष्ठानात्**' इति पञ्चम्या चाकरणस्य नियतपूर्ववृत्तित्वमात्रे तात्पर्यात्, यथा '**तत्त्वज्ञानान्निःश्रेयसाधिगमः**' इति न्यायसूत्रे पञ्चम्याः । मूलेऽपि नित्यान्यकरणे प्रत्यवायसाधनानीत्यनेन नित्याकरणस्य प्रत्यवाय नियतपूर्ववृत्तित्वमेवोच्यत इति सर्वमवदातम् । **नैमित्तिकानीति** । एतदकरणस्यापि प्रत्यवायज्ञापकत्वं तन्नियतपूर्ववृत्तित्वं वा द्रष्टव्यम् । **पुत्रेति** । '**वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते**' इति श्रुतेरित्यर्थः । **प्रायश्चित्तानीति** । अत्र वदन्ति न प्रायश्चित्तानां पापक्षयः फलम्, अपुरुषार्थत्वात् । पुरुषार्थो हि सुखं दुःखाभावो वा । न च पापक्षयस्यैतदन्यतरत्वमस्ति । तस्मात्पापक्षयफलत्वे प्रायश्चित्ते प्रवृत्तिरेव न स्यात्, पुरुषार्थानुबन्धाभावात् । किं च प्रायश्चित्तस्य पापक्षयफलत्वे नित्यादेः प्रायश्चित्तस्य को विशेषः । तस्माद्दुःखप्रागभावपरिपालनमेव फलम् । पापक्षयस्तु द्वारमिति। तन्न । तथा सति अहिकण्टकादिपरिहारे प्रवृत्तिर्न स्यात् । यदि च अहिकण्टकादेर्दुःखहेतुत्वेन द्वेष्यतया तन्निवृत्तौ प्रवृत्तिः, तदा पापस्यापि तद्धेतुत्वात् तन्निवृत्त्यर्थं प्रायश्चित्ते प्रवृत्तिर्युक्तैव । अन्यथा सुखसाधनेऽपि प्रवृत्तिर्न स्यात् । यदि सुखसाधनेऽपि रागात्प्रवृत्तिः, तर्हि दुःखवत्त- त्साधनेऽपि द्वेषात् तन्निवृत्त्यर्थं प्रायश्चित्तेऽपि प्रवृत्तिर्युक्तैव । नच नित्यादिना प्रायश्चित्तस्याभेदः । अनिमित्ते विहितं नित्यम्, यथा '**अहरहः संध्यामुपासीत**' इत्यनेन

संध्यावन्दनम् । नैमित्तिकं च नियतनिमित्ते विहितमपि पापव्यतिरिक्ते निमित्ते विहितम्, यथा पुत्रजन्मादिनिमित्तं जातेष्ट्यादि । प्रायश्चित्तं तु पापे निमित्ते विहितम्, यथा '**परस्त्रीकामः प्रायश्चित्तं कुर्यात्**' इत्यादि । एवं च नैतेषामभेदः । यत्तु दुःखप्रागभावपरिपालनं फलमिति, तन्न । तथा सति प्रायश्चित्तानन्तरं दुःखोत्पत्तिप्रसङ्गात्, प्रागभाववतः कार्यस्योत्पत्तिनियमात्, विजातीयप्रागभावकल्पने मानाभावात् । तस्माद्युक्तमुक्तं प्रायश्चित्तानां पापक्षयसाधनत्वम् । यच्च '**नाभुक्तं क्षीयते कर्म**' इति, तदकृतप्रायश्चित्तप्रारब्धविषयम् । अकृतप्रायश्चित्तस्यापि संचितकर्मणो ज्ञानेन नाशात्, '**ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुन**' इत्युक्तेरिति द्रष्टव्यम् । **सगुणेति** । निर्गुणविषयनिदिध्यासनं तत्त्वज्ञानायैवोपयुज्यत इति भावः । एतच्चोपलक्षणम्, सगुणब्रह्मातिरिक्तविषयकाणामप्युपासनानां दर्शनात् । **मानसव्यापारेति** । मानक्रियारूपाणीत्यर्थः।

न तु ज्ञानरूपाणीत्यर्थः, उपासनानां ज्ञानत्वे विधेयत्वानुपपत्तेः, प्रमाणवस्तुपरतन्त्रस्य ज्ञानम्य सिद्धान्ते विधेयत्वाभावात् । तदुक्तं टीकायाम् '**इच्छातोऽनुष्ठेयत्वान्मानसी क्रियैषा न ज्ञानम्**' इति । अत एव '**द्रष्टव्यः**' इति दर्शनमनूद्येत्युक्तं विवरणे । शाण्डिल्यऋषिणोक्ता शाण्डिल्यविद्या । आदिशब्देन दहरादिविद्या ग्राह्या । एवं नित्यादीनां स्वरूपमुक्त्वा निर्गतनिखिलकल्मषतयेत्येतद्व्याचष्टे - **एतेषामिति** । **परममिति** । आवश्यकमित्यर्थः । न तु मुख्यमित्यर्थः, '**विविदिषन्ति**' इति श्रुत्युपन्यासानुपपत्तेः । तत्र हि विविदिषादेरेव मुख्यत्वात्, चित्तशुद्धेस्तु द्वारत्वात् । कथं नित्यादिषु चित्तशुद्धेरावश्यकत्वमिति चेत्, श्रृणु नित्यादीनां हि प्रकारत्रयेणानुष्ठानम् । एकं वेदनोद्देशेन, अन्यत् संस्कारार्थत्वेन, अपरमीश्वरार्पणबुद्ध्या । तत्र तावत्खादिरतावत्तत्तत्फलार्थं विहितानामपि यज्ञादीनां संयोगपृथक्त्वन्यायेन वेदनोद्देशेन विहितत्वादनुष्ठानम् । तदा त्वावश्यकी पापक्षयरूपा चित्तशुद्धिः, यावत्पापं वेदनानुपपत्तेः, तस्या यज्ञादिभिर्वेदनजनने द्वारत्वात् । एवं च वेदनोद्देशेन यज्ञाद्यनुष्ठानेऽप्यवश्यं चित्तशुद्धिर्भवतीत्येतदभिप्रेत्याह- **विविदिषन्तीति** । यदापि न वेदनोद्देशेनानुष्ठानं किं तु नित्यत्वात्, तदा त्वावश्यकः पापक्षयः, नित्यविधीनां भाव्यान्तराभावाच्छ्रुतत्वाच्च इत्यभिप्रेत्याह- **तपसेति** । यदापि

**'यत्करोषि '** इत्यादिवचनात् ईश्वरार्पणबुद्ध्या कर्मानुष्ठानम्, तदा त्वीश्वरप्रसादः फलम् । स च नाशुद्धचित्तानामिति चित्तशुद्धिरावश्यिकी । एतदभिप्रेत्य चकारप्रयोगः । तदेवं सुष्ठूक्तं नित्यादिषु चित्तशुद्धेरावश्यकत्वम् । **उपासनानामिति** । अनुगतमिति शेषः । तत्तत्फलार्थविहितेनोपासनामात्रेण चित्तैकाग्र्यस्य जननात् । यत्तु मुख्यमिति शेष इति, तन्न । देवलोकाद्यर्थत्वेन विहिते कर्मणि द्वारीभूतस्य चित्तैकाग्र्यस्य मुख्यत्वाभावात् । यद्धि यदुद्देशेन विहितम्, तत्तस्य मुख्यं फलम् । अन्यथा स्वर्गाद्युद्देशेन विहितस्य यागादेरपूर्वेण मुख्यफलत्वापत्तेः । न च चित्तैकाग्र्योद्देशेनोपासनानि विहितानि सन्ति, येन तस्य मुख्यत्वं स्यात् । तस्मादुपासनानां चित्तैकाग्र्यं न मुख्यं फलम् किं त्वनुगतम् । देवलोकादिप्राप्तिश्च मुख्या । एवं च नित्यनैमित्तिकयोरुपासनानां च अवान्तरफलमित्यत्र मुख्यफलमित्यपि द्रष्टव्यम् । **'विविदिषन्ति '** इत्यत्र वेदनोद्देशेन यज्ञादीनि विधीयन्ते, वेदनस्येच्छासंबन्धित्वेन प्रतीयमानत्वात् । यथा **'अश्वेन जिगमिषति'** इत्यत्राश्वस्येच्छाविषयीभूतगमनार्थत्वम्, न तु जिगमिषार्थत्वम् । अत एव **'सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्'** इति सूत्रेऽश्वदृष्टान्तः । विविदिषोद्देशेन च यज्ञादिविधाने विविदिषायाः कामसंबन्धकल्पनापत्तेश्च । ततश्च वेदनार्थत्वमेव यज्ञादीनाम् । ननु न वेदनार्थत्वं यज्ञादीनाम्, तथा सति ज्ञानसामान्यसामग्र्यतिरिक्तयज्ञादिसाध्यत्वे वेदनस्य स्वतस्त्वव्याघातः । न च प्रमायाः सामान्यसामग्र्यतिरिक्तगुणजन्यत्वेन स्वतस्त्वव्याघात इष्ट एवेति वाच्यम्, गुणजन्यत्वे मानाभावात् । न च प्रमायाः सामान्यसामग्रीजन्यत्वे भ्रमत्वापत्तिरिति वाच्यम्, दोषाभावेन तदनुपपत्तेः । भ्रमस्य दोषजन्यत्वं ह्युभयवादिसिद्धम्, तदभावे सति सामान्यसामग्र्यैव प्रमोत्पत्तिसंभवेऽतिरिक्तगुणजन्यत्वे गौरवात् । गुणस्तु नोभयवादिसिद्धः । न च दोषाभावे सति सत्यां च ज्ञानसामान्यसामग्र्यां गुणाभावेन कार्याभावो दृश्यते । न च दोषाभाव एव गुण इति वाच्यम्, तदतिरिक्तगुणाङ्गीकारात् । तस्य गुणत्वे वा न स्वतस्त्वव्याघातः, दोषाभावस्य तुच्छत्वेन सिद्धान्ते तस्य कारणत्वाभावात् । तदुपलक्षितायाः सामान्यसामग्र्याभावरूपाया एव प्रमोत्पादकत्वाभ्युपगमात् । तस्मात्प्रमाया ज्ञानसामान्यसामग्रीमात्रप्रयोज्यत्वात्स्वतस्त्वमस्त्येव । तच्च यज्ञादिजन्यत्वे विरुद्धमिति । मैवम् । न हि

स्वतस्त्वाङ्गीकारः क्रतुधर्मायातः, किंतु ज्ञानसामान्यसामग्र्यतिरिक्तगुणजन्यत्वे मानाभावायातः । यज्ञादिजन्यत्वं च वचनसिद्धमिति तदङ्गीक्रियत एव । एवं च ज्ञानसामान्यसामग्री वचनसिद्धयज्ञादि, तदतिरिक्ताजन्यत्वमेव स्वतस्त्वम् । वस्तुतस्तु यज्ञादीनां वेदनप्रतिबन्धनिवृत्तौ हेतुत्वं श्रवणादीनामिवासंभावनादिनिवृत्तौ । वेदनं तु प्रतिबन्धकाभावोपलक्षितज्ञानसामान्यसामग्र्यैव जन्यत इति न स्वतस्त्वव्याघात इति सांप्रदायिकाः । ततश्च युक्तं वेदनोद्देशेन कर्मणामनुष्ठानम् । ननु एकोद्देशेनानेकविधाने वाक्यभेदान्न वेदनोद्देशेन यज्ञाद्यनेकं विधातुं शक्यमिति चेत्, तर्हि विविदिषोद्देशेनापि तद्विधानं न स्याद्दोषस्य समत्वात् । तथापि कः प्रतीकार इति चेत्, शृणु - अत्र यज्ञादिपदैः विहितं कर्मसामान्यं लक्ष्यते **'जातपुत्रः कृष्णकेशोऽग्नीनाधीत'** इत्यत्र जातपुत्रकृष्णकेशपदाभ्यामिवावस्थाविशेषः । तच्च कर्मसामान्यं वेदनोद्देशेन विधीयत इति न वाक्यभेद इत्यस्मद्गुरवः ।

तस्माद्युक्तमुक्तं वेदनोद्देशेन यज्ञादीनि विधीयन्त इति । **कर्मणेति** । ननु नित्यविधिषु फलाश्रवणात् हिरण्यधारणन्यायेन एतदर्थवादसिद्धा पितृलोकप्राप्तिर्मुख्यमेव फलं किं न स्यादिति चेत्, न, पितृलोकप्राप्तेः सर्वदा सर्वेषामनभीप्सितत्वेन कदाचिदननुष्ठानप्रसङ्गात् । पापक्षयस्तु सर्वदा आस्तिकानामभीप्सित इति तस्य युक्तं फलत्वम् । हिरण्यधारणं तु न नित्यमिति युक्तं तस्यार्थवादिकी भ्रातृव्यदुर्वर्णता फलम् । तस्मात्पितृलोकप्राप्तिरानुषङ्गिकी ।

---

**साधनानि नित्यानित्यवस्तुविवेक-इहामुत्रार्थफलभोगविराग-शमादिषकसंपत्ति-मुमुक्षुत्वानि। नित्यानित्यवस्तुविवेकस्तावत् ब्रह्मैव नित्यं वस्तु ततोऽन्यद् अखिलमनित्यमिति विवेचनम् । ऐहिकानां स्रक्चन्दनवनितादिविषयभोगाणां कर्मजन्यतया नित्यत्ववत् आमुष्मिकाणामप्यमृतादिविषयभोगानामनित्यतया तेभ्यो नितरां विरक्तिः इहामुत्रार्थफलभोगविरागः । शमाद्यस्तु शमदमोपरतितितिक्षासमाधानश्रद्धाख्याः । शमस्तावच्छ्रवणादिव्यतिरिक्तविषयेभ्यो मनसो निग्रहः। दमो बाह्येन्द्रियाणां तद्व्यतिरिक्तविषयेभ्यो निवर्तनम् । निवर्तितानामेतेषां तद्व्यतिरिक्तविषयेभ्य उपरमणमुपरतिः, अथवा विहितानां कर्मणां विधिना परित्यागः। तितिक्षा शीतोष्णादिद्वन्द्वसहिष्णुता ।**

**निगृहीतस्य मनसः श्रवणादौ तदनुगुणविषये च समाधिः समाधानम्। गुरूपदिष्टवेदान्तवाक्येषु विश्वासः श्रद्धा। मुमुक्षुत्वं मोक्षेच्छा। एवंभूतः प्रमाताधिकारी, 'शान्तो दान्तः' इत्यादिश्रुतेः। उक्तं च**

**'प्रशान्तचित्ताय जितेन्द्रियाय च प्रहीणदोषाय यथोक्तकारिणे।**

**गुणान्वितायानुगताय सर्वदा प्रदेयमेतत्सततं मुमुक्षवे' इति।**

**विषयो जीवब्रह्मैक्यं शुद्धं चैतन्यं प्रमेयम्, तत्रैव वेदान्तानां तात्पर्यात्। संबन्धस्तु तदैक्यप्रमेयस्य तत्प्रतिपादकोपनिषत्प्रमाणस्य च बोध्यबोधकभावः। प्रयोजनं तु तदैक्यप्रमेयगताज्ञाननिवृत्तिः स्वस्वरूपानन्दावाप्तिश्च, 'तरति शोकमात्मवित्' इत्यादिश्रुतेः, 'ब्रह्मविद्ब्रह्मैव भवति' इत्यादिश्रुतेश्च॥ अयमधिकारी जननमरणादिसंसारानलसंतप्तो दीप्तशिरा जलराशिमिवोपहारपाणिः श्रोत्रियं ब्रह्मनिष्ठं गुरुमुपसृत्य तमनुसरति,'समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्' इत्यादिश्रुतेः।**

---

साधनचतुष्टयेत्येतद्व्याचष्टे - **साधनानीति**। अत्र विवेकादीनां क्रमो हेतुहेतुमद्भावेन द्रष्टव्यः। ब्रह्मैवेति। ननु ब्रह्मैव नित्यमन्यदखिलमनित्य- मिति विवेचनं निश्चयः संशयो वा। नाद्यः, विवेककाल एव ब्रह्मणो ज्ञातत्वात्, श्रवणादिवैयर्थ्यापातात्। नान्त्यः, तथा सति विवेकस्य वैराग्यहेतुत्वं न स्यात्। न हि संदेहमात्रेणैहिकपारलौकिकार्थविरागः संभवति। एतेनापातज्ञानमेतदिति निरस्तम्, आपातज्ञानेन विरागासंभवादिति चेत्, सत्यम्। इदं सर्वमनित्यं कृतकत्वादिहेतुभ्यः, एतस्याधिष्ठानं किंचिन्नित्यं निरधिष्ठानस्यानित्यस्यासंभवात्, इत्यालोचनात्मकप्रत्ययविशेषस्य विवेकत्वेन विवक्षितत्वात्। एतत्प्रत्ययात्मकविवेकानन्तरं कृतकेभ्य ऐहिकामुष्मिकेभ्यो विरागः संभवत्येव। तदुक्तं वाचस्पतिमिश्रैः -

**'मा भूदिदं नित्यमिदमनित्यमिति धर्मिविशेषयोर्विवेकः धर्मिमात्रयोर्नित्यानित्ययोर्विवेकं निश्चिनोत्येव'** इति। एवं च वस्तुतो विषयो यस्यैतादृशः, यदस्ति किंचिन्नित्यमित्यन्यदखिलमनित्यमिति विवेचनम्, स विवेक इति योजना मूले द्रष्टव्या। **अनित्यतयेति**। **'तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयते'** इत्यादिवचनादिति भावः। तेभ्यो नितरां विरक्तिरिति। तदिच्छाविरोधिचेतोवृत्तिविशेष इत्यर्थः। न तु तदिच्छाविरहः, अभावस्य विधेयत्वाभावात्, विरागस्य

'**ब्राह्मणो निर्वेदमायात्**' इत्यनेन विहितत्वात् । विरहश्च यदि प्रागभावात्यन्ताभावान्योन्याभावाः, तदा तेषामनादित्वेनाननुष्ठेयत्वाद्विधेयत्वाभावः । अथ ध्वंसः, तर्हि कृतकस्य प्रध्वंसोऽयत्नसिद्ध इति विरागस्य विवेकसापेक्षत्वं न स्यात् ,विधिवैयर्थ्यापाताच्च । सिद्धान्ते अत्यन्ताभावातिरिक्तप्रध्वंसस्य मानाभावेनानङ्गीकाराच्च। 'प्रध्वस्तोऽद्य' इति प्रतीतेश्च घटविरुद्धकपालमालाविषयत्वात् । तदुक्तं तातचरणैः - '**ऐहिकपारलौकिकफलेच्छाविरोधिचेतोवृत्तिविशेषात्मको विरागः**' इति । **तद्यतिरिक्तेति** । श्रवणादिव्यतिरिक्तेत्यर्थः । नन्विन्द्रियनिग्रहे तेषां विषयेभ्यो निवर्तनमर्थसिद्धमित्यस्वरसादाह - **अथवेति** । संन्यास इत्यर्थः । **विहितानामिति** । श्रवणाद्यतिरिक्तानामिति शेषः । **विधिनेति** । आलस्यादिना कर्मत्यागस्य '**वीरहा वा एष देवानां योऽग्निमुद्वासयते**' इत्यादिना निषिद्धत्वादिति भावः । **तदनुगुणेति ।** गुरुशुश्रूषादावित्यर्थः । **एवंभूत इति** । एवं च गृहस्थस्य न श्रवणेऽधिकारः, अधिकारिविशेषणस्य संन्यासस्याभावात् । न च संन्यासस्याधिकारिविशेषणत्वे मानाभावः, विवेकादिवत्पुरुषविशेषणत्वेन सत्यादिवाक्ये श्रुतत्वात् । न च जन्मान्तरीयः संन्यासोऽस्तीति वाच्यम् । तस्यानिश्चयात्, अनिश्चितस्य च अधिकारिविशेषणत्वाभावात्, '**वेदानिमं लोकममुं च परित्यज्यात्मानमन्विच्छेत्**' इत्यादिविधिविशेषबाधाच्च, गृहस्थस्य कर्मव्यग्रतया श्रवणकर्तव्यतानुपपत्तेश्च । पुराणादौ गृहस्थस्य विचारश्रवणं तु देवादीनां त्यागादिश्रवणवन्नेयम् । तस्मात्संन्यासिन एव श्रवणेऽधिकार इति । **शान्त इति** । ननु किमस्मिन्वाक्ये विधीयते । न तावत् '**पश्येत्**' इति प्रकृत्युपात्तं ज्ञानम्, तस्य फलत्वेन विधेयत्वाभावात्, नापि शान्त्यादिविधानम्, वाक्यभेदप्रसङ्गादिति चेत्, अत्र वदन्ति - शान्त्यादीनां श्रवणेन सहाव्यभिचरितसंबन्धाच्छान्त्यादिपदैर्विचारो लक्ष्यते। उपरतिशब्दाभिधेयश्च संन्यासः । अनयोः समुच्चयोऽस्मिन्वाक्ये विधीयत इति । गुरवस्तु नास्मिन्वाक्ये शान्त्यादिपदैर्विचारो लक्ष्यते, अनेकेषु पदेषु लक्षणाप्रसङ्गात् । न च एकस्मिन्पदे लक्षणयोपपत्तावनेकेषु सा युक्ता । किं तु '**पश्येत्**' इति प्रकृत्या विचारो लक्ष्यते । एवं च अस्मिन्वाक्ये शान्त्यादिमत्कर्तृको विचारो विधीयते । न च '**श्रोतव्यः**' इति विधिना विचारस्य प्राप्तत्वात्पुनर्विधानं व्यर्थमिति वाच्यम् । शारीरकब्राह्मणे एतदतिरिक्तविचारविधायकाभावात् ।

यत्तु समुच्चयो विधीयत इति, तन्न । स हि यदि संन्यासविचारात्मकस्तदोभयविधाने वाक्यभेदः । तदतिरिक्ते तु मानाभावः । किं च उपरतिपदेन शान्त्यादिपदैश्च शक्त्या लक्षणया च संन्यासविचारोपस्थितावपि समुच्चयप्रतिपादकपदाभावेन कथमत्र तस्य विधानम् । समुच्चयप्रतिपादकं पदमध्याहार्यमिति चेत्, न; अध्याहारे मानाभावात्, शान्त्यादीनामेव समुच्चयविधानोपपत्तौ श्रवणलक्षणावैयर्थ्यापाताच्च । सोमविशिष्टयागविधाने सोमस्य यागार्थत्ववद्विचारसंन्यासयोरतिरिक्तसमुच्चयस्य विधाने विचारस्य समुच्चयार्थत्वापाताच्च । तथा च ज्ञानार्थत्वं न स्यात् । तस्मात्प्रकृत्या विचारं लक्षयित्वा शान्त्यादिमत्कर्तृको विचारो विधीयत इत्येव युक्तम् । दोषा रागादयः, ते प्रहीणा यस्य तस्मै । अनेन च उपरतिरुक्ता । गुणा नित्यत्वादयः । सर्वदानुगताय गुरुसेवापराय । एवमधिकारिणं निरूप्य विषयं दर्शयति - **विषय** इति । उच्यत इति शेषः । ऐक्यस्य भेदत्वं व्यावर्तयति - **शुद्धमिति** । **बोध्येति** । ननु **'यतो वाचो निवर्तन्ते'** इत्यादिश्रुतिविरोधान्न चैतन्यस्य बोध्यत्वमिति चेत्, वक्ष्यमाणोत्तरत्वात् । **तदैक्येति** । तच्च तदैक्यम्, तदेव प्रमेयम्, तद्गतं तद्विषयं यदज्ञानं तस्य निवृत्तिरिति विग्रहः । चिन्मात्रविषयाज्ञाननिवृत्तिः प्रयोजनमित्यर्थः । ननु नाज्ञाननिवृत्तिः सती, अद्वैतव्याघातात् । नासती, ज्ञानजन्यत्वानुपपत्तेः । न सदसती, विरोधात् । नानिर्वचनीया, अनिर्वचनीयस्यानित्यत्वनियमेन विचारप्रयोजनस्यानित्यत्वापत्तेः । न च इष्टापत्तिः, तथा सति अनित्यफलेभ्यः कर्मभ्यो विरागादत्र प्रवृत्तिर्न स्यात् । नापि पञ्चमप्रकारा तस्याश्चिद्रूपत्वे ज्ञानसाध्यत्वानुपपत्तेः । चिद्भिन्नत्वेऽद्वैतविरोध इति चेत्, मैवम्। अज्ञानं ह्यनिर्वचनीयम् । अनिर्वचनीयस्य च न ध्वंसोऽस्ति, मानाभावात् । सिद्धान्ते कपालवद्विरुद्धकार्योदय एव ध्वंसः । न च शुक्त्यादौ बाधादिदशायां रजतादिविरुद्धस्य कस्यचिदुत्पत्तिरस्ति, शुक्तित्वादेर्भ्रमात्प्रागपि सत्त्वात् । तस्मान्नानिर्वचनीयस्य ध्वंसः । किं तु स्वाश्रयेऽत्यन्ताभावः, तत्र व्यवहारतो रजतादेरधिष्ठानातिरिक्तात्यन्ताभावस्वीकारेऽपि न चैतन्यातिरिक्तोऽविद्यात्यन्ताभावः । अपि तु चिद्रूप एव, अन्यथा अद्वैतव्याकोपात् । एवं च चिद्रूपैवाविद्यानिवृत्तिः । न च एवमविद्यानिवृत्तेर्नित्यत्वेन

तत्त्वज्ञानवैयर्थ्यम्, तत्त्वज्ञानेनाविद्यात्यन्ताभावबोधस्य जननात् ' **नासीन्नास्ति न भविष्यति**' इति शुक्तित्वबोधेनेव रजतात्यन्ताभावबोधस्य । ननु यद्यविद्यानिवृत्तिश्चिद्रूपा, तत्त्वज्ञानेन च अविद्यात्यन्ताभावबोधमात्रं मन्यते, तदा श्रवणादीनां निष्प्रयोजनत्वापत्तिः; चिद्रूपाविद्यानिवृत्तेर्नित्यत्वेनाप्रयोजनत्वात्, अत्यन्ताभावबोधस्य च सुखदुःखाभावान्यत्वेनापुरुषार्थत्वादिति, तत्राह - **स्वस्वरूपानन्दावाप्तिश्चेति** । च-शब्दः शङ्कानिरासार्थः । अयं भावः - यद्यपि सुखदुःखाभावान्यत्वेन नाविद्यात्यन्ताभावबोधः प्रयोजनम् ; तथापि चिद्रूपाविद्यानिवृत्तिरेव प्रयोजनम्, चैतन्यस्यानन्दरूपत्वेनाभिलषितत्वात् । अभिलषितं हि प्रयोजनम्, न तु कृतिसाध्यत्वविशेषितम्, गौरवात् । तदत्र चैतन्यस्य कृतिसाध्यत्वाभावेऽप्यभिलषितत्वेन प्रयोजनत्वमस्त्येव । न च श्रवणात्प्रागपि चैतन्यरूपप्रयोजनसत्त्वेन तत्र प्रवृत्तिर्न स्यादिति वाच्यम् । प्राक्चैतन्यसत्त्वेऽप्यनवाप्तत्वभ्रमेण कण्ठगतचामीकरन्यायेन श्रवणादौ प्रवृत्त्युपपत्तेः । अनवाप्तत्वभ्रमश्चाज्ञानजन्य एव । अतः श्रवणादिजन्यतत्त्वज्ञानेनाविद्यात्यन्ताभावे बोधितेऽनवाप्तत्वभ्रमः स गच्छति । ततः शुद्धं चैतन्यमवशिष्यते । तदेव प्रयोजनम्, तस्यानन्दरूपत्वेनाभिलषितत्वात् इति दिक् । **शोकं** शोकोपलक्षितं संसारम् ।।एवमनुबन्धचतुष्टयं निरूप्य प्रकृतमाह - **अयमिति** ।

**उपहारेति** । **'रिक्तपाणिर्न पश्येत राजानं दैवतं गुरुम्'** इति वचनादिति भावः । **उपसृत्येति** । गुरुसमीपं गत्वेत्यर्थः ।

---

**स परमकृपयाध्यारोपापवादन्यायेनैनमुपदिशति 'तस्मै स विद्वानुपसन्नाय प्राह' इत्यादिश्रुतेः।असर्पभूते रज्जौ सर्पारोपवत् वस्तुनि अवस्त्वारोपोऽध्यारोपः । वस्तु सच्चिदानन्दानन्ताद्वयं ब्रह्म । अज्ञानादिसकलजडसमूहोऽवस्तु । अज्ञानं तु सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि भावरूपं यत्किचिदिति वदन्ति; 'अहमज्ञः' इत्याद्यनुभवात्, 'देवात्मशक्तिं स्वगुणैर्निगूढाम्' इत्यादिश्रुतेश्च।**

अपवादस्याध्यारोपपूर्वकत्वात्प्रथममध्यारोपं निरूपयति - **वस्तुनीति** । दृष्टान्तमाह - **असर्पेति** । **सर्पारोपवादिति** । अनिर्वचनीयसपर्पारोपवदित्यर्थः, देशान्तरीयसर्पभाने मानाभावात् । तथा हि- सति दोषविशेषे रज्ज्वां सर्पो भासत इत्यनुभवसिद्धम् । दोषे च अपगते 'नास्ति सर्पः, मिथ्यैवाभात्' इत्यप्यनुभूयते । अत्र प्रतिपन्नस्य देशान्तरसत्त्वं न भ्रमेण वा बाधेन वा विषयीक्रियते । बाधान्यथानुपपत्त्यैव देशान्तरसत्त्वं कल्प्यत इति चेत्, तर्हि बाधान्यथानुपपत्त्या अत्र प्रतिपन्नस्यैव बाधयोग्यं सत्त्वं कल्प्यताम्, अनुभवारूढत्वात् । न तु देशान्तरसत्त्वमनुभवानारूढम् । न च बाधयोग्ये सत्त्वे कल्प्यमाने स्वाश्रयनिष्ठात्यन्ताभावप्रतियोगित्वमक्लृप्तं कल्पनीयमिति वाच्यम् । तथा सति संयोगादेरपि तन्न स्यात्, तदतिरिक्तस्थले अवच्छेदकभेदेन स्वाश्रयनिष्ठात्यन्ताभावप्रतियोगित्वस्यादृष्टत्वात्। तत्रादर्शनेऽपि संयोगादौ दर्शनात्स्वीक्रियत इति यदि, तदा प्रकृतेऽपि बोध्यम् । किं च पुरोवर्तिनि मिथ्यासर्प आवश्यकः, अवच्छेदकलाघवस्य विद्यमानत्वात् । परैर्हि विषयसाधकतावच्छेदकं प्रमानुभवत्वमुच्यते । तच्चानुभवत्वापेक्षया गुरुभूतम् । अतोऽनुभव एव विषयसाधकः। स च प्रकृतेऽप्यस्तीत्यावश्यको मिथ्यासर्पः । नन्वनिर्वचनीयसर्पाङ्गीकारे **'रज्जौ कालत्रयेऽपि सर्पो नास्ति'** इति त्रैकालिकनिषेधप्रतीत्यनुपपत्तिः, सर्पाङ्गीकारात् इति चेत्, अत्र समाधानमुक्तं विवरणाचार्यैः **'लौकिकपरमार्थदृष्टरजतप्रतियोगिकाभावविषयत्वाद्रजते त्रैकाल्याभावज्ञानस्य'** इति । तथा **च 'कालत्वयेऽपि सर्पो नास्ति'** इति प्रतीतिः लौकिकपरमार्थदृष्टसर्पाभावविषयिणी, तस्य कदापि पुरोवर्तिन्यसत्त्वात् । ननु लौकिकपरमार्थदृष्टः सर्पः पुरोवर्तिनि प्रसक्तो न वा । आद्ये अन्यथाख्यातिः । अन्त्ये निषेधानुपपत्तिः, प्रसक्तस्यैव प्रतिषेध्यत्वात् । अत्र वदन्ति - लौकिकपरमार्थत्वेन प्रतिभासमानरजताभाव एव विषयः, व्यधिकरणावच्छिन्नप्रतियोगिकाभावस्य प्रतियोग्यधिकरणेऽपि स्वीक्रियमाणत्वात्, यथा शृङ्गवत्यां गवि शशीयत्वावच्छिन्नशृङ्गाभाव इति । तत्रेदं चिन्त्यम् - न तावत्सिद्धान्ते व्यंधिकरणधर्मावच्छिन्नाभावः, प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिसत्त्वापेक्षया प्रतियोगिसत्त्वस्य लघुत्वेनाभावसत्त्वे तस्यैव

विरोधित्वान्न प्रतियोगिमति तदभाव इत्यादिदूषणगणग्रस्तस्याङ्गीकरणे प्रमाणाभावात् । न च तादृशो ग्रन्थोऽस्ति, येन दूषणगणग्रस्तोऽपि स्वीकार्यः । न च परमताभिप्रायेणायं ग्रन्थ इति वाच्यम् । स्वमतेनैवोपपत्तावभिप्रायेण नयनस्य शिष्यदन्धनत्वात् । किं च 'कालत्रयेऽपि सर्पो नास्ति' इति प्रतीतिर्न व्यधिकरणधर्मावच्छिन्नाभावविषयिणी । **'यत्प्रकारकप्रतियोगिज्ञानमभावज्ञाने कारणम्, तत्प्रकारेण प्रतियोग्यवगाहि अभावज्ञानम्'** इति नियमः सर्वसिद्धः । न हि 'अत्र कालत्रयेऽपि सर्पो नास्ति' इत्यत्र लौकिकपरमार्थत्वेन सर्पो भासते, अनुभवविरोधात् । अपि च अभावज्ञाने प्रतियोगितावच्छेदकप्रकारकप्रतियोगिज्ञानं कारणम्, अन्यथा निर्विकल्पकादप्यभावधीः स्यादिति सर्वसिद्धम् । न च प्रतिभासमानरजतविशेष्यकं लौकिकपरमार्थत्वप्रकारकं च ज्ञानं संभवति । तद्धि लौकिकपरमार्थत्वं देशान्तरीयमिह प्रकारीभूय भासते, उताधिष्ठानसत्त्वप्रयुक्तमत्रत्यमेव । नाद्यः, अन्यथाख्यात्यापत्तेः । अन्त्ये न व्यधिकरणधर्मावच्छिन्नाभावत्वम्, अधिष्ठानसत्त्वप्रयुक्तस्य लौकिकपरमार्थत्वस्य प्रतिभासमानरजतनिष्ठत्वेन प्रतियोगितासमानाधिकरणत्वात् । प्रतियोगिताव्यधिकरणस्य च यत्र प्रतियोगितावच्छेदकत्वं स व्यधिकरणधर्मावच्छिन्नाभावः । तस्मात् **'कालत्रयेऽपि सर्पो नास्ति'** इति प्रतीतेः न व्यधिकरणधर्मावच्छिन्नाभावविषयकत्वमिति । अन्ये तु त्रैकालिकनिषेधस्य प्रतिभासमानरजताभाव एव विषयः । न च पुरोवर्तिनि सर्पाङ्गीकारात्कथं त्रैकालिकनिषेधप्रतीतिरिति वाच्यम्, सर्पस्यानिर्वचनीयत्वात् । अयमेव चार्थः **'लौकिकपरमार्थदृष्ट'** इत्याचार्यग्रन्थस्येति वदन्ति । अत्र च लौकिकपरमार्थेत्यादेर्न किंचित्कृत्यमिति दूषणं वेदितव्यम् । कस्तर्ह्येतद्ग्रन्थाभिप्रायेण प्रतीतिविषय इति चेत्, शृणु - लौकिकपरमार्थदृष्टापणस्थरजताभाव एव । तस्य पुरोवर्तिन्यप्रसक्तत्वेन कथं निषेध इति चेत्, का तेऽप्रसक्तिस्तां न विद्मः । स्मरणाभाव एवेति चेत्, त्वया तदभावः कथमत्रावधारितः । नन्वारोपाभाव एवाप्रसक्तिः, पुरोवर्तिन्यापणस्थरजतस्यारोपासंभवात्; अन्यथा अन्यथाख्यात्यापत्तेरिति चेत्; अत्र समाधानमुक्तं तत्त्वदीपनाचार्यैः **'रजताभासप्रसक्त्या परमार्थरजतस्यापि बुद्धिस्थत्वादत्र निषेधः, सामान्योपाधौ प्रसक्तस्य घटस्य निषेधवत्'** इति । अयमाशयः

अभावज्ञाने प्रतियोगिस्मरणं कारणम् । न तु प्रतियोग्यारोपः, तस्य कारणत्वे प्रमाणाभावात् । ननु यदि नारोपः कारणम्, तदा अत्यन्ताभावबोधसमयेऽन्योन्याभावबोधोऽपि भासेत, प्रतियोगितावच्छेदकप्रकारकप्रतियोगिज्ञानसामग्र्यास्तुल्यत्वात् । आरोपस्य तु कारणत्वेऽत्यन्ताभावबोधसमये नान्योन्याभावभानम्, अन्योन्याभावज्ञानजनकभूततादात्म्यारोपाभावादिति चेत्, मैवम् । तथापि तव मते संसर्गारोपसमये कथं न तादात्म्यारोपः । तज्जनकीभूतेच्छाभावादिति चेत्, कस्मात्तज्जनकीभूतेच्छाभावः ? दैववशादेवेति चेत्, **'तद्धेतोरेवास्तु तद्धेतुत्वं मध्ये किं तेन'** इति न्यायेन तस्मादेव दैववशात्कदाचिदत्यन्ताभावबोधः कदाचिदन्योन्याभावबोध इत्युपपत्तौ व्यसनितयारोपेच्छाङ्गीकरणे प्रमाणाभावात्, यथा हि तुरगादौ वेगेन गच्छतः सर्ववृक्षेन्द्रियसंनिकर्षेऽपि कदाचित्कस्यचिज्ज्ञानं कदाचित्कस्यचित् । किं च परमते घटघटत्वविषयकनिर्विकल्पकाविशेषेऽपि कदाचिद्धटविशेष्यकं घटत्वविशेषणकम्, कदाचित्तु विपरीतम् । न तु तत्रापि सामग्र्यन्तरम्, मानाभावात्; किंतु दैवादेव । तेनैवात्राप्युपपत्तौ किमन्तर्गडुनारोपेण । तथा च रजताभासप्रसक्त्या स्मर्यमाणरजताभावस्य त्रैकालिकनिषेधप्रतीतिविषयत्वम् । आरोपश्च न कारणम् । भवतु वा आरोपश्च कारणम् । तथापि नानुपपत्तिः । तस्य हि न समानप्रकारकारोपत्वेन, किं त्वारोपत्वेनैव, लाघवात् । पुरोवर्तिनि रजतस्य रजतत्वेन ज्ञानादारोपोऽस्त्येव । तस्माल्लौकिकपरमार्थदृष्टापणस्थरजताभाव एव त्रैकालिकनिषेधप्रतीतिविषयः । ननु शुक्तौ त्रैकालिकरजताभावप्रत्ययवत् **'नेह नाना'** इति शास्त्रादनिर्वचनीयसकलप्रपञ्चाभावश्चैतन्ये ऽवगम्यते; तत्र का गतिरिति चेत्; अत एव प्रपञ्चस्यानिर्वचनीयत्वम् । प्रपञ्चस्तु दृश्यते । श्रुतौ च त्रैकालिकनिषेधोऽवगम्यते । तेनानिर्वचनीयत्वम् । अनिर्वचनीयस्य च स्वाभावसामानाधिकरण्यं न विरुद्धम् । अतः **'नेह नाना'** इति शास्त्रादवगम्यमानश्चैतन्ये त्रैकालिकप्रपञ्चाभावो न विरुद्धः । नन्वेवं पुरोवर्तिनि रजताभावोऽपि प्रपञ्चाभाववत्त्रैकालिक निषेधविषयोऽस्तु, तस्याप्यनिर्वचनीयत्वादिति चेत्, सत्यम् । तस्यैवाभावो निषेधविषयः संभवति । विवरणाचार्यैरपि **'प्रतिपन्नोपाधौ निषिध्यमानविषयत्वं**

**मिथ्यात्वम्**' इत्यादिग्रन्थ इदमुक्तम् । लौकिकपरमार्थदृष्टरजताभावविषयत्वं तु प्रौढ्योक्तमित्यस्मद्गुरवः । तस्मान्नानिर्वचनीयरजताङ्गीकारे निषेधप्रतीत्यनुपपत्तिः । ततश्च युक्तमुक्तमनिर्वचनीयसर्पारोपवदिति । दार्ष्टान्तिकमाकमाह-**वस्त्विति** । **सदिति** । श्रुतितो युक्तितश्च बाधानुपलम्भादिति भावः । '**असदेवेदमग्र आसीत्**' इति श्रुतेश्च अनभिव्यक्तनामरूपविषयत्वात् । अन्यथा '**सदेव सोम्येदमग्र आसीत्**' '**सत्यं ज्ञानमनन्तं ब्रह्म**' इत्यादिश्रुतिव्याकोपः स्यात् । **चिदिति** । '**विज्ञानमानन्दं ब्रह्म**' इत्यादिश्रुतेः । न च आत्मनो ज्ञानरूपत्वे '**अहं ज्ञानवान्**' इति प्रत्ययः कथमिति वाच्यम्, वृत्तिविषयत्वेन तदुपपत्तेः । **आनन्देति** । उक्तश्रुतेः, परमप्रेमास्पदत्वाच्च, हैरण्यगर्भभोगविरक्तानामप्यभिलषितत्वाच्च **अद्वयमिति**। '**एकमेवाद्वितीयम्**' इति श्रुतेः, भेदे मानाभावाच्च, एकस्मिन् शरीरे हस्तपादाद्युपाधिवशेन सुखदुःखवैचित्र्यवत् शरीरभेदेऽपि सुखदुःखवैचित्र्यस्यौपाधिकत्वात् । **अवस्त्विति** । अनिर्वचनीयमित्यर्थः । सदसद्भिन्नत्वम् अनिर्वचनीयत्वम् । तच्च प्रपञ्चे आवश्यकम् । तथा हि प्रपञ्चस्तावन्नासन्, अपरोक्षप्रथानुपपत्तेः । नापि सन्, बाध्यत्वानुपपत्तेः। न च तर्हि प्रपञ्चस्य स्वात्यन्ताभावसामानाधिकरण्यं वक्तव्यम्, तच्च विरुद्धमिति वाच्यम् । तथा सति प्रागभावसामानाधिकरण्यमपि न स्यात्। अनुभवात्तत्स्वीक्रियत इति चेत्, तर्हि '**नेह नाना**' इत्यादिश्रुत्या अत्यन्ताभावसामानाधिकरण्यमप्यनुभूयत इति तन्न विरुद्धम् । किं च प्रपञ्चसत्त्ववादिनापि प्रागभावप्रध्वंसान्योन्याभावसामानाधिकरण्यं घटस्य मृत्पिण्डे स्वीक्रियते । एवं च अत्यन्ताभावस्यापि घटसामानाधिकरण्यं वाच्यम्, घटाभावत्वात् । किं च मृत्पिण्डघटप्रागभावयोराश्रयाश्रयिभाव इत्यत्र तावन्न विवादः । तत्र प्रागभावस्याश्रयिता न प्रागभावत्वेन, गौरवात् । किं तु घटाभावत्वेन, लाघवात्प्रध्वंसादावनुगतत्वाच्च । तथा च मृत्पिण्डघटात्यन्ताभावयोरप्याश्रयाश्रयिभाव आवश्यकः । अपि च घटस्य प्रागभावसामानाधिकरण्यं च तदत्यन्ताभावसामानाधिकरण्यमुक्तमेव; अत्यन्ताभावातिरिक्तप्रागभावे मानाभावात्, प्राक्कालावच्छिन्नस्यैवात्यन्ताभावस्य प्रागभावत्वात् । 'इदानीं घटो नास्ति, किं तु भविष्यति' इति प्रतीत्यापि स एव विषयीक्रियत इति ।

तस्मादत्यन्ताभावसामानाधिकरण्यं न विरुद्धम् । ततश्च युक्तं प्रपञ्चस्यानिर्वचनीयत्वम् । अज्ञानं निरूपयति - **अज्ञानं त्विति** । सत्त्वे बाधो न स्यात्; असत्त्वेऽपरोक्षत्वप्रथा न स्यात् अतोऽनिर्वचनीयमित्यर्थः । **त्रिगुणात्मकं** सत्त्वरजस्तमोलक्षणगुणत्रयाश्रय इत्यर्थः । **यत्किंचिदिति** । अत्र यत्किञ्चिच्छब्देन नानिर्वचनीयत्वमुच्यते, तस्यानिर्वचनीयशब्देनैवोक्तत्वात् । नापि ज्ञानविरोधित्वम्, तस्यापि ज्ञानविरोधिशब्देनोक्तत्वात् । नापि मिथ्यात्वम्, तस्य पूर्वफक्किकायामुक्तत्वात् । किं तु भ्रमोपादानत्वम् । एतच्चाज्ञानलक्षणम् । भ्रमोपादानत्वं च भ्रमाकारेण विवर्तमानत्वम् । तेन विवर्तमानाविद्याधिष्ठानत्वरूपभ्रमोपादानत्ववतीश्वरे नातिव्याप्तिः । अज्ञानस्य भावत्वे प्रमाणमाह - **अहमज्ञ इति** । अयं भावः '**अहमज्ञः**' '**मामन्यं च न जानामि**' '**शास्त्रार्थं न जानामि**' इत्यनुगतः प्रत्ययो दृश्यते। स च अनुगतविषयमन्तरेण अनुपपन्न इत्यनुगतो विषयो वक्तव्यः । स च न ज्ञानसामान्याभावः, तस्यात्मन्यसंभवात् । नापि विशेषाभावः, तेषामननुगतत्वात् । तस्मादनुगतप्रत्ययान्यथानुपपत्त्या भावरूपमज्ञानं स्वीकर्तव्यं सत्तावत् । यथा हि '**घटः सन्**' '**पटः सन्**' इत्यनुगतप्रत्ययान्यथानुपपत्त्या सत्तासामान्यं परैः स्वीक्रियते तद्वद्रजतं स्वीकार्यम् । तस्य च अवश्यमुपादानत्वं वक्तव्यम्, निरुपादानस्याभावकार्यस्यासंभवात् । तच्चान्वयव्यतिरेकाभ्यामज्ञानमेव । तद्धि यद्यभावरूपं तदा नोपादानत्वयोग्यमिति भावरूपमेव स्वीकार्यम् । अभावत्वाद्भावत्वस्य लघुत्वाच्च । तस्माद्भावरूपमेवाज्ञानं स्वीकार्यमिति । **देवेति** । देवस्य ईश्वरस्य आत्मशक्तिम् आत्मनः कारणत्वनिर्वाहिकामित्यर्थः । **स्वगुणैः** सत्त्वरजस्तमोभिः । एवं च भावरूपमज्ञानं स्वीकर्तव्यम, विशेषादर्शनस्य गुणाश्रयत्वानुपपत्तेरिति भावः।

---

**इदमज्ञानं समष्टिव्यष्ट्यभिप्रायेणैकमनेकमिति च व्यवह्रियते । तथा हि- यथा वृक्षाणां समष्ट्यभिप्रायेण 'वनम्' इत्येकत्वव्यपदेशः, यथा वा जलानां समष्ट्यभिप्रायेण 'जलाशयः' इति, तथा नानात्वेन प्रतिभासमानानां जीवगताज्ञानानां समष्ट्यभिप्रायेण तदेकत्वव्यपदेशः, 'अजामेकाम्' इत्यादिश्रुतेः । इयं**

**समष्टिरुत्कृष्टोपाधितया विशुद्धसत्त्वप्रधाना । एतदुपहितं चैतन्यं सर्वज्ञत्वसर्वेश्वरत्वसर्वनियन्तृत्वादिगुणकमव्यक्तमन्तर्यामी जगत्कारणमीश्वर इति च व्यपदिश्यते सकलाज्ञानावभासकत्वात्, 'यः सर्वज्ञः सर्ववित्' इति श्रुतेः ।**

---

ननु किमज्ञानमनेकम्, उतैकम् ? नाद्यः, **'अजामेकाम्'** इति श्रुतिविरोधात् । नान्त्यः, **'इन्द्रो मायाभिः'** इति श्रुतिविरोधापत्तेः । तत्राह - **इदमज्ञानमिति** । व्यष्ट्यभिप्रायेणानेकमिति व्यवह्रियते, समष्ट्यभिप्रायेणैकमिति व्यवह्रियत इति योजना, एकपदस्य समष्टिपदेनाव्यवधानात् । अज्ञानान्यनेकान्येव ; श्रुतावेकत्वव्यपदेशस्तु समष्ट्यभिप्रायेण, अज्ञानसमुदायाभिप्रायेणेत्यर्थः, जात्यभिप्रायेण वा इत्यर्थः ; जात्यभिप्रायेणैकत्वव्यपदेश इत्यप्याहुः । अथाज्ञानं लाघवादेकमेव किं न स्यात्, अत आह- **नानात्वेनेति** । नानात्वेन प्रतिभासमानेति जीवविशेषणं साभिप्रायम् । अयमभिप्रायः जीवभेदस्तावदावश्यकः, बद्धमुक्तप्रतिभासात् । बद्धास्तावदस्मदादयः प्रतीयन्ते । मुक्ता अपि 'शुको मुक्तः' 'वामदेवो मुक्तः' इत्यादिशास्त्रे प्रतीयन्ते । न चैतस्य शास्त्रस्य मुख्येऽर्थे संभवत्यौपचारिकत्वं न्याय्यम् । न चैकस्य जीवस्य बद्धत्वं मुक्तत्वं च संभवति । अतो जीवभेद आवश्यकः । किं च क्रममुक्तिफलान्युपासनानि श्रूयन्ते । श्रूयते च **'न तस्य प्राणा उत्क्रामन्ति'** इत्यादि- शास्त्रादिहैव मुक्तिः । एतदुभयं जीवभेदे सत्युपपन्नं भवति कस्यचिज्जीवस्य उपासनाविशेषेण क्रममुक्तिः, अन्यस्य जीवस्य श्रवणाद्यभ्यासपरिपाकवशेन उत्पन्नतत्त्वज्ञानस्य इहैव मुक्तिरिति । जीवैक्ये तु एतदनुपपन्नं भवतीति जीवभेद आवश्यकः । जीवभेदेऽज्ञानभेदोऽपि वक्तव्यः, अन्यथा कस्यचिज्जीवस्य तत्त्वज्ञानेनाज्ञाने निवृत्ते जीवान्तरस्य बन्धानुपपत्तेः । तत्त्वज्ञानेनाज्ञानानिवृत्तौ तत्त्वज्ञानिनोऽपि मोक्षो न स्यात्, अज्ञानसत्त्वात् । तस्मादज्ञानभेदो वक्तव्यः । **'अजामेकाम्'** इति श्रुतौ त्वेकत्वव्यपदेशः समष्ट्यभिप्रायेण जात्यभिप्रायेण वेत्युक्तम् । श्रुतौ अजाशब्देन अनादिसिद्धाविद्या उच्यते । लोहितशुक्लकृष्णपदैश्च रजः सत्त्वतमांस्युच्यन्ते । सरूपां स्वसदृशीम्, अनिर्वचनीयामित्यर्थः । **विशुद्धेति** । यद्यपि समष्टेरीश्वरोपाधित्वे पालनार्थं

सत्त्वप्राधान्यवत्सृष्टिसंहारार्थं रजस्तमःप्राधान्यमप्यस्त्येव, तथा च सत्त्वतस्यैवोक्तिर्विरुद्धा; तथाप्यस्मिन् ग्रन्थे। सत्त्वप्राधान्यं न पालऱ्नार्थमुक्तम्, किं त्वीश्वरं प्रति समष्टेर्मोहानापादकत्वात् । अत एवाह - **उत्कृष्टेति** । व्यष्टेस्तु जीवं प्रति मोहापादकत्वान्मलिनसत्त्वप्राधान्यमुक्तमिति मन्तव्यम् । **एतदुपहितमिति** । अज्ञानसमष्ट्युपहितमित्यर्थः । नन्वीश्वरोपाधिरज्ञानसमष्टिः कुतः, अज्ञानव्यष्टिरेव किं न स्यात् ? अत आह **सकलेति** । जीवानां हि प्रत्येकमज्ञानव्यष्टयः स्फुरन्ति, नाज्ञानसमुदायः, मानाभावात् । ईश्वरस्य तु सकलान्यज्ञानानि स्फुरन्ति, तस्य सर्वज्ञत्वात् । अतोऽज्ञानसमष्टिरीश्वरोपाधिरित्यर्थः । अत्रास्मद्गुरवः - नाज्ञानसमष्टिरीश्वरोपाधिः । अज्ञानसमष्टिर्ह्यज्ञानसमुदायः, वनमिव वृक्षसमुदायः ; समुदायश्च न समुदायिभ्यो भिन्नः, मानाभावात् । एवं च वनमनेकवृक्षात्मकमेव । तथा अज्ञानसमष्टिरप्यनेकाज्ञानात्मिकैव । वनावच्छिन्नश्च आकाशः अनेकवृक्षावच्छिन्नाकाशसमुदायान्न भिन्नः, अनेकवृक्षातिरिक्तोपाधेरभावात् । उपाधिभेदाभावे च उपहितभेदाभावात् । एवं च अज्ञानसमूहोपहितं चैतन्यं नेश्वरः, अज्ञानसमूहोपहितस्य चैतन्यस्य प्रत्येकाज्ञानोपहितसमुदायरूपत्वात्, जीवसमुदायस्य च अनीश्वरत्वात् । ततश्च नाज्ञानसमष्टिरीश्वरोपाधिरिति । तस्मादत्राज्ञानसमष्टिपदेनानेकाज्ञाननिरूपिता वाचस्पतिमिश्रसंमतैका विषयतैवोक्तेति मन्तव्यम् । सैव च ईश्वरोपाधिः, अज्ञातस्य ब्रह्मण ईश्वरत्वात् । वनावच्छिन्नाकाशपदेनाप्यनेकवृक्षसंबन्धी य एकदेशस्तदवच्छिन्नाकाश एवोच्यते । स च प्रत्येकवृक्षावच्छिन्नाकाशेभ्यो भिन्न एव, उपाधेर्भिन्नत्वात् । एवं प्रत्येकाज्ञानोपहितजीवानामनेकत्वेऽपि तद्विषयताया एकत्वात्तदुपहितेश्वरस्यैकत्वमुपपद्यत एव । न च अज्ञानानामनेकत्वे तद्विषयता कथमेकेति वाच्यम् । समवायवदुपपत्तेः । यथा हि परेषां मते घटपटादीनामनेकत्वेऽपि तन्निरूपितसमवायस्यैकत्वम्, घटनाशे च तन्निरूपितत्वमेव नश्यति, न समवायः ; एवमेकैकाज्ञाननाशेऽपि विषयतायास्तन्निरूपितत्वमात्रं नश्यति, नाज्ञानविषयतेति तदुपहितेश्वरस्य यावत्सर्वमुक्त्यवस्थानमुपपद्यते । चरममुक्तिदशायां तु तत्त्वज्ञानेनाविद्यानिवृत्तौ तत्प्रयोज्या विषयतापि निवर्तत इति चिन्मात्रमवशिष्यते । तस्मात्सुष्ठूक्तमज्ञानविषयतोपहित ईश्वर इति ।

तदुक्तं कल्पतरौ - ' **जीवाश्रिताभिरविद्याभिर्विषयीकृतत्वमुपाधिः'** इति । स च सत्त्वप्रधानाज्ञानविषयतोपहितो विष्णुः । स च अखिलस्य जगतः पालकः । रजःप्रधानाज्ञानविषयतोपहितो ब्रह्मा । स चाखिलस्य जगतः स्रष्टा । तमःप्रधानाज्ञानविषयतोपहितो रुद्रः । स च अखिलस्य जगतः संहर्ता । एते च त्रयोऽनादिसिद्धा व्यापकाः सर्वज्ञाश्चेति । ईश्वरसर्वज्ञत्वे प्रमाणमाह - यः सर्वज्ञ इति । सर्वज्ञ इति सामान्यतः, सर्वविदिति विशेषतः ।

---

**ईश्वरस्येयं समष्टिरखिलकारणत्वात्कारणशरीरम्, आनन्दप्रचुरत्वात्कोशवदाच्छादकत्वाचानन्दमयकोशः, सर्वोपरमत्वात्सुषुप्तिः, अत एव स्थूलसूक्ष्मप्रपञ्चलयस्थानमिति चोच्यते । यथा वनस्य व्यष्ट्यभिप्रायेण 'वृक्षाः' इत्यनेकत्वव्यपदेशः, यथा वा जलाशयस्य व्यष्ट्यभिप्रायेण 'जलानि' इति, तथा ज्ञानस्य व्यष्ट्यभिप्रायेण तदनेकत्वव्यपदेशः, 'इन्द्रो मायाभिः पुरुरूप ईयते' इत्यादिश्रुतेः । अत्र व्यस्तसमस्तव्यापित्वेन व्यष्टिसमष्टिताव्यपदेशः । इयं व्यष्टिर्निकृष्टोपाधितया मलिनसत्त्वप्रधाना । एतदुपहितं चैतन्यम् अल्पज्ञत्वानीश्वरत्वादिगुणकं प्राज्ञ इत्युच्यते, एकाज्ञानावभासकत्वात् । अस्य प्राज्ञत्वमस्पष्टोपाधितयानतिप्रकाशकत्वात् । अस्यापीयमहंकारादिकारणत्वात् कारणशरीरम्, आनन्दप्रचुरत्वात्कोशवदाच्छादकत्वाच्चानन्दमयकोशः, सर्वोपरमत्वात्सुषुप्तिः, अत एव स्थूलसूक्ष्मप्रपञ्चलयस्थानमिति चोच्यते । तदानीमेतावीश्वरप्राज्ञौ चैतन्यदीप्ताभिरतिसूक्ष्माभिरज्ञानवृत्तिभिरानन्दमनुभवतः, 'आ- नन्द भक् चेतोमुखः प्राज्ञः' इति श्रुतेः, सुखमहमस्वाप्सम्, न किंचिदवेदिषम्' इत्युत्थितस्य परामर्शोपपत्तेश्च । अनयोः समष्टिव्यष्ट्योर्वनवृक्षयोरिव जलाशयजलयोरिव वाभेदः ।एतदुपहितयोरीश्वरप्राज्ञयोरपि वनवृक्षावच्छिन्नाकारायोरिव जलाशयजलगतप्रतिबिम्बाकाशयोरिव वाभेदः, 'एष सर्वेश्वरः' इत्यादिश्रुतेः ।**

---

**सर्वेति** । सर्वस्योपरमो यस्यां सा तस्या भावस्तत्त्वम्, तस्मादित्यर्थः । **अत एवेति** । सर्वोपरमत्वादेवेत्यर्थः ।पञ्चीकृतापञ्चीकृतरूपः स्थूलसूक्ष्मप्रपञ्चः । **उच्यत इति** ।श्रुताविति शेषः । व्यष्ट्यभिप्रायेणेति । प्रत्येकाज्ञानाभिप्रायेणेत्यर्थः । **इन्द्र इति** । इन्द्रः परमात्मा, प्रकरणात्, मायाभिरज्ञानैः पुरुरूपो बहुरूप ईयते प्रतीयत इत्यर्थः । **अत्रेति** ।अज्ञान इत्यर्थः । **व्यस्तसमस्तव्यापित्वेनेति** । प्रत्येकसमुदायाभिप्रायेणेत्यर्थः । **एतदुपहितमिति** । अविद्योपहितं चैतन्यं जीव इत्यर्थः । नन्वविद्याधीनं जीवत्वं जीवाश्रिता च अविद्येत्यन्योन्याश्रय इति चेत्, न, तस्य प्रकृतेऽदोषत्वात् । तथा हि - उत्पत्तिः प्रतिबन्धनीया। सा च न, अविद्याजीवयोरनादित्वात् । तया ज्ञप्तिः प्रतिबन्धनीया । न, जीवस्य स्वप्रकाशत्वेन स्फुरणात्; अविद्यायास्तत्राध्यस्तत्वेन स्फुरणादिति । व्यष्टेर्जीवोपाधित्वे हेतुमाह - **एकेति** । जीवाल्पज्ञत्वे प्रमाणमाह - **अस्येति** । अस्य प्राज्ञस्य अनतिप्रकाशकत्वात् । अनतिप्रकाशकत्वे हेतुमाह- **अस्पष्टेति** । मलिनसत्त्वप्रधानाज्ञानोपाधित्वादित्यर्थः । **अस्य** जीवस्य । उपाधिभूतेयं व्यष्टिरूपाविद्येत्यर्थः ॥

**तदानीमिति** । सुषुप्तिदशायामित्यर्थः । **ईश्वरेति** । यद्यपीश्वरस्य न सुषुप्तिः जागराद्यवस्थानां जीवसंबन्धित्वात्, तथापीश्वरसुषुप्तिपदेन प्रलयो द्रष्टव्यः । एतच्चोपलक्षणम्, ईश्वरस्य सदानन्दस्फुरणादिति बोध्यम् । अज्ञानवृत्त्या च आनन्दस्फुरणं जीवस्यैव, ईश्वरस्य च स्वत एवेति मन्तव्यम् । **चैतन्यदीप्ताभिरिति** । वृत्तिर्ह्युत्पद्यमाना चिद्व्याप्तैवोत्पद्यते, वृत्तेस्तथैव स्वभावात् । तदुक्तम्-

**'वियद्वस्तुस्वभावानुरोधादेव न कारकात् ।**

**तद्वत्संपूर्णतोत्पत्तौ कुम्भस्येवं दृशो धियाम्'** इति ।

अत एव च वृत्तौ परेषां चित्त्वभ्रम इति भावः । **अतिसूक्ष्माभिरिति** । अस्पष्टाभिरित्यर्थः । तासां कल्प्यत्वादिति भावः । **चेतोमुख इति** । चैतन्यं मुखवद्भासमानं यस्य स ईश्वर इत्यर्थः । ननु सुषुप्तिदशायां किमज्ञानवृत्त्या, आनन्दस्फुरणस्येश्वरवज्जीवस्यापि स्वत एव संभवात्, तत्राह-- **सुखमहमिति ।** प्रथमत उत्थितस्य 'सुखमहमस्वाप्सम्, न किंचिद्वेदिषम्' इति परामर्शस्तावज्जायते । स नानुमानम्,

लिङ्गाद्यनुसंधानमन्तरेणापि जायमानत्वात् । किंतु स्मरणम् । तच्च न दुःखाभावस्य, सुषुप्तौ दुःखानुभवाभावेन दुःखाभावानुभवाभावात्; अभावज्ञाने प्रतियोगिज्ञानस्य कारणत्वात्, असति च दुःखाभावानुभवे तद्विषयस्य स्मरणस्यानुपपन्नत्वात् । ततश्च सुखस्य स्मरणं वक्तव्यम् । तदपि न जन्यं सुखम्, तस्य सुषुप्तावनुभवायोगात् । किं तु नित्यस्यैव सुखस्य स्मरणं वक्तव्यम् । स्मरणं च संस्कारजन्यम् । संस्कारश्चानुभवजन्य इति नित्यसुखस्य सुषुप्तावनुभवो वक्तव्यः । स च चिद्रूपः । तस्य नित्यत्वेन संस्कारानाधायकत्वात्, प्रकारान्तरस्य च असंभवात् । अतोऽविद्यावृत्त्यैव नित्यानन्दस्फुरणं वक्तव्यम् । तया च संस्कारजनने उत्थितस्य 'सुखमहमस्वाप्सम्' इति स्मरणसंभवात् । स्वरूपचैतन्येनैवानन्दस्फुरणे तस्य नित्यत्वेन संस्कारानाधायकत्वात्स्मरणानुपपत्तिप्रसङ्गात् । तस्मात्स्मरणान्यथानुपपत्त्या सुषुप्तावविद्यावृत्तिरावश्यिकी । ईश्वरस्य तु न स्मरणमस्ति, किं तु केवलं सुखानुभवः । स च स्वरूपचैतन्येनैव संभवतीति किमर्थमज्ञानवृत्तिः स्वीकार्या । अतोऽज्ञानवृत्तिभिरित्यग्रे स्वरूपचैतन्येनेत्यपि ज्ञेयमिति । **एतदुपहितयोरिति** । ननु वनवृक्षावच्छिन्नाकाशयोरभेदो युक्तः, वृक्षातिरिक्तवनाभावेन वृक्षावच्छिन्नाकाशस्यैव वनाकाशत्वात्, स्वतन्त्रोपाधेरभावात् । नैवं जीवेश्वरयोरौपाधिकयोरभेदो युक्तः, उपाध्योर्भेदात्। न च तयोरप्यभेदो युक्तः; तथा सत्युपाध्योरभेदे उपहितयोरप्यभेदात्सर्वज्ञत्वकिंचिज्ज्ञत्वादिधर्मसंकरात्; उपाधिनिरूपणवैयर्थ्यापाताच्च । स्वरूपचैतन्यस्यैकत्वेन विरुद्धधर्मसांकर्यं मा भूदित्युपाधिभेदनिरूपणेन विरुद्धधर्मव्यवस्था क्रियते । उपाध्यभेदे च विरुद्धधर्मव्यवस्था न संभवतीति तन्निरूपणमनर्थकमापद्येत । **'एष सर्वेश्वरः'** इति श्रुतौ नोपहितयोरभेद उच्यते। किं तु विरुद्धधर्मपरित्यागेन स्वरूपचैतन्यस्याभेद उच्यते । उपहितयोरभेदे तत्त्वमसिवाक्ये लक्षणावैयर्थ्यप्रसङ्गाच्च । तत्र हि शक्त्योपहितयोरभेद उच्यते । स च उपाध्योर्भेदेन न संभवतीति लक्षणया उपाध्योः परित्यागेन स्वरूपचैतन्यमात्रं बोध्यते । उपाध्योरभेदे उपहितयोरप्यभेदः शक्त्या प्रतीयमानः संभवतीति किं लक्षणया । तस्मान्नोपहितयोरभेद इत्यनुपपन्नोऽयं ग्रन्थ इति चेत्; अत्रोच्यते - उपाध्योरभेद इत्यत्र अभेदशब्देन नैक्यमुच्यते, विरोधात् ।

किं तु भेदशब्देन भेदयतीति व्युत्पत्त्या भेदकत्वमुच्यते, तदभावोऽभेदः । एतदुक्तं भवति - उपाधिभ्यां हि वस्तुतो न वस्तु भिद्यते । न हि घटपटाभ्यां परशुच्छिन्नदारुवदाकाशो भिद्यते । किंतु उप समीपे स्थित्वा स्वनिष्ठभेदजातीयो भेदोऽनिर्वचनीयस्तत्रासज्यते । तस्मादुपाध्योर्न वास्तवं भेदकत्वमिति प्रथमाभेदशब्देनोच्यते । तत्र दृष्टान्तमाह - **वनेति** । यथा वनवृक्षयोः जलाशयजलयोर्वा न वास्तवं व्योमभेदकत्वम्, तद्वत्प्रकृतोपाध्योरपि न वास्तवं तदित्यर्थः । उपाध्योर्वास्तवभेदकत्वाभावे उपहितयोर्वास्तवोऽभेद इत्याह द्वितीयाभेदशब्देन । न त्वभेदशब्देनोपहितयोर्भेद एव नास्तीत्युच्यते । तस्मान्न विरोधः । यद्वा आत्मभेदवादिनं प्रति शाम्यतु दुर्जन इति न्यायेन औपाधिकयोरप्यभेदः, किं पुनः स्वरूपचैतन्यस्येति प्रौढिवादेन एतदुक्तमिति न दोषः।

---

**वनवृक्षतदवच्छिन्नाकाशयोः जलाशयजलतद्गतप्रतिविम्बाकाशयोःवा आधारभूतानुपहिताकाशवत्, अनयोःअज्ञानतदुपहितचैतन्ययोः आधारभूतं यदनुपहितं चैतन्यं तत्तुरीयमित्युच्यते, 'शिवमद्वैतं चतुर्थं मन्यन्ते' इत्यादिश्रुतेः । इदमेव तुरीयं शुद्धचैतन्यम् अज्ञानादितदुपहितचैतन्याभ्यां तप्तायःपिण्डवदविविक्तं सन्महावाक्यस्य वाच्यम्, विविक्तं सल्लक्ष्यमिति चोच्यते।**

**अस्याज्ञानस्य आवरणविक्षेपनामकमस्ति शक्तिद्वयम् । आवरणशक्तिस्तावदल्पोऽपि मेघोऽनेकयोजनायतमादित्यमण्डलमवलोकयितृ नयनपथपिधायकतया यथाच्छादयतीव, तथाज्ञानं परिच्छिन्नमप्यात्मानमपरिच्छिन्नम् असंसारिणमवलोकयितृ वुद्धिपिधायकतया आच्छादयतीव तादृशं सामर्थ्यम् । तदुक्तम्-**

**'घनच्छनदृष्टिर्धनच्छन्नमर्कं यथा मन्यते निष्प्रभं चातिमूढः ।**

**तथा बद्धवद्भाति यो मूढदृष्टेः स नित्योपलब्धिस्वरूपोऽहमात्मा' इति।।**

**अनयैव आवरणशक्त्यावच्छिन्नस्यात्मनः कर्तृत्वभोक्तृत्वसुखदुःखमोहात्मकतुच्छ ससारभावनापि संभाव्यते। यथा स्वाज्ञानेनावृतायां रज्ज्वां सर्पत्वसंभावना । विक्षेपशक्तिस्तु यथा रज्ज्वज्ञानं स्वावृतरज्जौ**

**स्वशक्त्या सर्पादिकमुद्भावयति, एवमज्ञानमपि स्वावृतात्मनि विक्षेपशक्तया आकाशादिप्रपञ्चमुद्भावयति, तादृशं सामर्थ्यम् । तदुक्तम्- 'विक्षेपशक्तिर्लिङ्गादि ब्रह्माण्डान्तं जगत्सृजेत्' इति ॥**

---

आधारभूतमधिष्ठानभूतमित्यर्थः । जीवेश्वरौ तदुपहितचैतन्यशब्दार्थः । तच्छब्द उक्तोपाधिपरामर्शी । तुरीयं चतुर्थम् । चतुर्थमित्यज्ञान जीवेश्वरेभ्य इत्यर्थः ; यद्वा जाग्रत्स्वप्नसुषुप्त्यवस्थाभ्य इत्यर्थः । **अज्ञानादीति** । अत्र विषयता आदिशब्दार्थः । **महावाक्यस्येति** तत्त्वमसिवाक्यस्येत्यर्थः ।

---

एवं जीवेश्वरौ निरूप्य अज्ञाने शक्तिद्वयं निरूपयति-**अस्येति** । अत्रावरणविक्षेपनामकमित्यनेनावरणविक्षेपस्वरूपं शक्तिद्वयमुक्तमिति न भ्रमितव्यम्, आवरणविक्षेपयोः शक्तित्वाभावात् । आवरणं हि चैतन्यनिष्ठम् । आवरणशक्तिस्त्वज्ञाननिष्ठत्वेन व्यवह्रियते सांप्रदायिकैः । विक्षेपस्तु कार्यम् । तत्राज्ञानं कारणम् । कारणं च सिद्धान्ते शक्तिमदित्यावश्यकी विक्षेपानुकूला अज्ञानशक्तिरिति । आवरणं चं यद्यपि नाज्ञानकार्यं तस्यानादित्वात्, तथापि तत्प्रयोज्यं भवत्येवेति तदनुकूलापि अज्ञाने शक्तिरावश्यकी । तस्मादावरणविक्षेपनामकमित्यावरण विक्षेपानुकूलमित्यर्थः । ननु कथं परिच्छिन्नमज्ञानमपरिच्छिन्नमात्मानमाच्छादयतीत्याशङ्क्य दृष्टत्वादित्याह - **अल्पोऽपीति** । **मृढदृष्टेरिति** । अज्ञानयुक्तस्येत्यर्थः । ननु किमिदमावरणम् ? शृणु - 'नास्ति 'न प्रकाशते इत्यादिव्यवहारालम्बनत्वयोग्यता । सा च आवश्यकी । अन्यथा स्वप्रकाशत्वेन ' अस्ति प्रकाशते' इत्यादिव्यवहारयोग्ये ब्रह्मणि 'नास्ति, न प्रकाशते ब्रह्म' इति व्यवहारानुपपत्तेः । **अनयेति** । आवरणशक्तियुक्तया अविद्ययेत्यर्थः । अधिष्ठानावरणे भ्रमः संभवति, तज्ज्ञाने भ्रमानुपपत्तेरिति भावः । स्वावृतरज्जाविति । अज्ञानेनावृते रज्ज्ववच्छिन्ने चैतन्य इत्यर्थः । न च रज्जुरेवावृता किं न स्यादिति वाच्यम्, तस्या जडत्वेन प्रकाशाप्रसक्तेः । प्रकाशप्रसक्तौ च प्रकाशाभावे आवरणकल्पनात् । नन्वेवं रज्ज्ववच्छिन्ने चैतन्येऽप्यावरणं न स्यात्, तश्च स्वप्रकाशत्वेऽपि पुरुषान्तरसंवेदनवद्भिन्नत्वेन प्रकाशाप्रसक्तेरिति चेत्,

अत्र वदन्ति इदमाकारवृत्तिदशायां प्रमातृचैतन्याभिन्नमपि रज्ज्ववच्छिन्नं चैतन्यं न स्फुरति । अतस्तत्रावरणं वक्तव्यम् । अन्यथाभेदापन्नत्वेन स्फुरणापत्तेः । न च इदमाकारवृत्या इदमंशावच्छिन्नमेव चैतन्यं प्रमातृचैतन्याभिन्नं न तु रज्ज्ववच्छिन्नमिति वाच्यम्, इदंत्वरज्जुत्वयोः व्याप्यवृत्तित्वेनेदमाकारवृत्तिदशायां रज्ज्ववच्छिन्नस्यापि प्रमातृचैतन्याभिन्नत्वादिति । तन्न ; इदंत्व रज्जुत्वयोर्व्याप्यवृत्तित्वेऽपि इदमंशावच्छिन्न चैतन्यं रज्ज्ववच्छिन्न चैतन्यम् उत नेति वक्तव्यम् । अभिन्नं चेत्, तदेदमंशावच्छिन्नस्य स्फुरणात् रज्ज्ववच्छिन्नस्यापि चैतन्यस्य स्फुरणं वक्तव्यम् । न ह्यभेदे स्फुरणतद्भावौ वक्तुं युक्तौ । ततश्च व्यर्थमावरणम्, स्फुरणप्रसक्तौ तदभावे सति तस्य कल्पनात्, इदंत्व रज्जुत्वयोर्भिन्नत्वेन तदवच्छिन्न चैतन्ययोरभेदानुपपत्तेश्च । भिन्नमिति चेत्, तर्हि इदं वृत्त्येदमंशावच्छिन्नमेव चैतन्यं प्रमातृचैतन्याभिन्नम, न तु रज्ज्ववच्छिन्नम् । न ह्यन्याकारवृत्त्यान्यदभेदापन्नं भवति । अन्यथा घटाकारवृत्त्या त्वगिन्द्रियजन्यया रूपावच्छिन्नमपि चैतन्यं प्रमातृचैतन्याभिन्नं स्यात्, इदंत्वरज्जुत्वयोरिव रूपघटत्वयोरपि व्याप्यवृत्तित्वात् । तस्मान्नेदंवृत्या रज्ज्ववच्छिन्नचैतन्यं प्रमातृचैतन्याभिन्नम् । भेदे च न प्रकाशप्रसक्तिरिति किमर्थं रज्ज्ववच्छिन्नचैतन्ये आवरणम । अत्रोच्यते-सत्यं न रज्ज्ववच्छिन्ने चैतन्ये प्रकाशप्रसक्तिः, तस्य भिन्नत्वात् । तथापि न रज्ज्वावावरणं वाच्यम, आवरणस्य चैतन्ये क्लृप्तत्वात् । मूलाज्ञानस्य चिन्मात्रविषयत्वेन तदावरणस्य चिन्निष्ठत्वात् । अतः परिच्छिन्नाज्ञानावरणमपि चैतन्ये एव वक्तव्यम्, न तु जडे । तदुक्तं जडे आवरणाभावादिति । किं च अतीतानागतस्थले विषयस्यासत्त्वेनावरणाश्रयत्वानुपपत्तेस्तदुपलक्षिते चैतन्ये आवरणं वाच्यमिति तस्यैव सर्वत्र तदाश्रयत्वम् । तस्माद्युक्तमुक्तं रज्ज्ववच्छिन्न चैतन्यस्यावृतत्वम् । रज्ज्वावावृतत्वं त्वदूरविप्रकर्षेण व्यपदिश्यत इति संप्रदायविदः । **एवमज्ञानमपीति** । मूलाज्ञानमित्यर्थः । **तादृशमिति** । प्रपञ्चजननानुकूलमित्यर्थः । **विक्षेपशक्तिरिति** । विक्षेपशक्तियुक्ताविद्येत्यर्थः । लिङ्गशब्देन लिङ्गशरीरमुच्यते । तच्चाग्रे वक्ष्यते ।

**बोधप्रश्नाः**

1. सच्चिदानन्द शब्दस्य कः अर्थः?
2. उपनिषत् शब्दार्थः कः?
3. अनुबन्धचतुष्टयं वर्णयत?
4. साधनचतुष्टयं किं?
5. कर्माणि कानि?
6. गुरूपशतदनं कथं कर्थव्यं?
7. अज्ञानस्य शक्तिद्वयं किं?
8. अधायाशेपः नाम किं?
9. अपवादो नाम कः?
10. समष्टिः का?

**अभ्यासप्रश्नः**

1. वेदान्तशास्त्रश्रवणे अधिकारी कः इति प्रतिपादयत।
2. अज्ञानस्य समष्टिव्यष्टी प्रतिपादयत।
3. खण्डेऽस्मिन् उद्दतश्रुतिवाक्यानां सान्दर्भिक विशेषं लिखत।

# खण्डः २

## प्रस्तावना

द्वितीयखण्डेऽस्मिन् आत्मपदार्थः कः इति चार्वाक- नैयायिका-प्राभाकर-बौद्ध-मतदृष्ट्या सरलया उपपादितः। पुनश्च तत्रैव आपनिषदात्मपदार्थः कः इति निरुपितम्। पञ्चिकरणप्रक्रिया वर्णिता। भूतानाम् उत्पत्तिः कथम्? इत्यदिविषयः वर्णिताः।

## उद्देश्यम्

1 औपनिषदात्मपदार्थस्यज्ञानं भवति भवति।

2 चार्वाकमतपरिचयः भवति।

3 पञ्चभूतानामुत्पत्तिः तत्र प्रमाणभूतश्रुतीनां परिचयज्ञानं भवति।

**शक्तिद्वयवदज्ञानोपहितं चैतन्यं स्वप्रधानतया निमित्तं स्वोपाधिप्रधानतयोपादानं च भवति, यथा लूता तन्तुकार्यं प्रति स्वप्रधानतया निमित्तं स्वशरीरप्रधानतयोपादानं च भवति ।तमः प्रधानविक्षेपशक्तिमदज्ञानोपहितचैतन्यादाकाश आकाशाद्वायुः वायोरग्निः अग्नेरापोऽद्भ्यः पृथिवी चोत्पद्यते, 'एतस्मादात्मन आकाशः संभूतः' इत्यादिश्रुतेः । तेषु जाड्याधिक्यदर्शनात्तमःप्राधान्यं तत्कारणस्य । तदानीं सत्त्वरजस्तमांसि कारणगुणप्रक्रमेण तेष्वाकाशादिषूत्पद्यन्ते । एतान्येव सूक्ष्मभूतानि तन्मात्राण्यपञ्चीकृतानि चोच्यन्ते । एतेभ्यः सूक्ष्मशरीराणि स्थूलभूतानि चोत्पद्यन्ते ।**

---

एवमज्ञाने निरूपिते तत्कार्यं निरूपयितुं तत्रोपादानं निमित्तं च निरूपयति — **शक्तीति** । **अज्ञानोपहितमिति** । अज्ञानविषयतोपहितमित्यर्थः, अज्ञानोपहितस्य जीवत्वाज्जीवस्य च अस्वतन्त्रत्वेन जगन्निमित्तत्वाभावात्तदुपादानत्वाभावाच्चेति द्रष्टव्यम् । **स्वप्रधानतयेति** । निमित्तशब्देन ह्यत्र नं दण्डादिसाधारणं निमित्तकारणत्वमात्रमुच्यते, किं तु कर्तृत्वम् । तच्च कार्यानुकूलज्ञानवत्त्वम् । तच्च स्वरूपेणैवेश्वरस्य संभवति । न अविद्याद्वारा, तस्या जडत्वादिति भावः । **स्वोपाधीति** । उपादानत्वं हि विवर्तमानत्वम् । न तु ' **यत्समवेतं कार्यमुत्पद्यते** ' इत्यादिपराभिमतम्, समवायानङ्गीकारात् । तच्च विवर्तमानत्वं न स्वरूपेण चैतन्यस्य, किं त्वविद्याद्वारेति तस्याः प्राधान्यम् । अत एव विवर्तमानाविद्याधिष्ठानत्वरूपम् उपादानत्वमीश्वरस्येत्युक्तमिति भावः । ननु कथमेकस्य निमित्तत्वम् उपादानत्वं च ? तत्र आह **यथेति** । लूता

ऊर्णनाभिः । **स्वशरीरेति** - लालारूपस्वशरीरावयवप्रधानतयेत्यर्थः । तन्त्वाकारेण हि लालारूपः ऊर्णनाभिशरीरावयवः परिणमते, न तु तच्छरीरम्, शरीरापाये तन्त्वपायप्रसङ्गात् । तदुक्तं **शारीरके- 'तन्तुनाभस्य क्षुद्रतरजन्तुभक्षणाल्लाला कठिनतामापद्यमाना तन्तुर्भवति'** इति। विक्षेपशक्तिप्रधानाज्ञानोपहितेत्यत्रापि पूर्ववदेव व्याख्या।

तमः प्राधान्ये हेतुमाह-**तेष्विति** । **तत्कारणस्येति**। आकाशादिकारणस्याज्ञानस्येत्यर्थः । **तदानीमिति,** सृष्टिकाले इत्यर्थः । यद्यप्यज्ञानगतसत्त्वरजस्तमोव्यतिरेकेण तत्कार्ये सत्वरजस्तमांसि न भिन्नानि सन्ति मानाभावात्, अज्ञानगतेषु तु तेषु **'देवात्मशक्तिं स्वगुणैर्निगूढाम्'** इत्यादिवचनमेव प्रमाणम् ,तथापि सत्त्वरजस्तमांस्युत्पद्यन्ते इत्यनेन अज्ञानगतसत्त्वरजस्तमःकार्यजाड्यादेरेव उत्पत्तिरुक्तेति मन्तव्यम् । **एतानीति,** आकाशादीनीत्यर्थः । **सूक्ष्मेति,** विरलावयवानीत्यर्थः । न तु सूक्ष्मत्वमणुपरिमाणवत्त्वम्, अपञ्चीकृतभूतानां व्यापकत्वात् । **उच्यन्त इति** । श्रुत्यादाविति शेषः । **स्थूलभूतानीति** । **अत्र गुरवः**-अपञ्चीकृतेभ्यः पञ्चीकृतात्मकस्थूलभूतानां नोत्पत्तिः, मानाभावात् । आत्मन आकाशाद्युत्पत्तिश्रवणवत् अपञ्चीकृतेभ्यः पञ्चीकृतभूतोत्पत्तेः श्रवणाभावात्, अपञ्चीकृताङ्गीकारे गौरवाच्च । तस्मात् यथा तन्तुभ्योऽतिरिक्तो न पटः, किं तु संयोगविशेषमापन्नास्तन्तव एव पटः, लाघवादतिरिक्तत्वे मानाभावाच्च। एवमपञ्चीकृतान्यपि पञ्चीकरणात्मकसंयोगविशेषमापन्नानि पञ्चीकृतानीत्युच्यन्ते, न त्वपञ्चीकृतेभ्यः पञ्चीकृतान्युत्पद्यन्ते आत्मन इवाकाशः । अत एव तत्त्वदीपने- **'अपञ्चीकृतानि प्रारब्धवशात्पञ्चीकृततामापधन्ते'** इत्युक्तम् । यदि च अपञ्चीकृतेभ्यः पञ्चीकृतभूतोत्पत्तिः स्यात्, तदा यथा तत्रापञ्चीकृतानि तत्तत्कर्मानुरोधेन लिङ्गशरीरं जनयन्तीत्युक्तम्, तथा अपञ्चीकृतानि पञ्चीकृतानि जनयन्तीत्येवोक्तं स्यात्, न तु पञ्चीकृततामापद्यन्ते इत्युक्तं स्यादिति । तस्मान्नापञ्चीकृतेभ्यः पञ्चीकृतोत्पत्तिरिति । तथा च एतेभ्यः स्थूलभूतान्युत्पद्यन्त इत्यनेन संयोगविशेषस्यैवोत्पत्तिरुक्ता भवतीति ज्ञेयम् ॥

---

**सूक्ष्मशरीराणि सप्तदशावयवानि लिङ्गशरीराणि । अवयवास्तु ज्ञानेन्द्रियपञ्चकं बुद्धिमनसी कर्मेन्द्रियपञ्चकं वायुपञ्चकं चेति । ज्ञानेन्द्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्यानि । एतान्याकाशादीनां सात्त्विकांशेभ्यो व्यस्तेभ्यः पृथक्पृथक् क्रमेणोत्पद्यन्ते । बुद्धिर्नाम निश्चयात्मिकान्तःकरणवृत्तिः । मनो नाम संकल्पविकल्पात्मिकान्तःकरणवृत्तिः । अनयोरेव चित्ताहंकारयोरन्तर्भावः । एते**

**पुनराकाशादिगतसात्त्विकांशेभ्यो मिलितेभ्य उत्पद्यन्ते । एतेषां प्रकाशात्मकत्वात्सात्त्विकांशकार्यत्वम् । इयं बुद्धिर्ज्ञानेन्द्रियैः सहिता विज्ञानमयकोशो भवति । अयं कर्तृत्वभोक्तृत्वसुखित्वदुःखित्वाद्यभिमानित्वेन इहलोकपरलोकगामी व्यावहारिको जीव इत्युच्यते ।मनस्तु ज्ञानेन्द्रियैः सहितं सन्मनोमयकोशो भवति । कर्मेन्द्रियाणि वाक्पाणिपादपायूपस्थाख्यानि । एतानि पुनराकाशादीनां रजोंशेभ्यो व्यस्तेभ्यः पृथक्पृथक् क्रमेणोत्पद्यन्ते ।**

---

सूक्ष्मशरीराणि निरूपयति - **सूक्ष्ममेति** । **सप्तेति** । सप्तदश अवयवा एकदेशा येषां तानि । श्रोत्रादीनां क्रमः तदुत्पादकभूतक्रमाद्द्रष्टव्यः । एते चित्तबुद्धिमनोहंकाररूपा अन्त:करणभेदाः । **मिलितेभ्य इति** । अन्तःकरणस्य गन्धाद्युपलब्धौ साधारणत्वात्पञ्चभूतारभ्यत्वम् । क्वचित्तैजसत्वव्यपदेशस्तु तेजोबाहुल्यात् । अतः अन्तःकरणपरिणामभूतचित्तादीनां पञ्चभूतारभ्यत्वमिति द्रष्टव्यम् । श्रोत्रादेस्तु शब्दाद्युपलब्धौ असाधारणत्वात् व्यस्तभूतारभ्यत्वमिति भावः । **एतेषामिति-** श्रोत्रादीनां चित्तादीनां च इत्यर्थः । प्रसङ्गादाह - **इयमित्यादिना** । **अयमिति,** विज्ञानमय इत्यर्थः । एतच्च उपलक्षणम् । लिङ्गशरीरोपहितस्य इहलोक परलोकगामित्वात् । पृथगिति । वाग्व्योमविकार: पाणिर्वायुविकार इत्यादि स्वयमूह्यम् ।

---

**वायवः प्राणापानव्यानोदानसमानाः । प्राणो नाम प्राग्गमनवान्नासाग्रस्थानवर्ती । अपानो नामावाग्गमनवान् पाय्वादिस्थानवर्ती । व्यानो नाम विष्वग्गमनवानखिलशरीरवर्ती । उदानो नाम कण्ठस्थानीय ऊर्ध्वगमनवानुत्क्रमणवायुः । समानो नाम शरीरमध्यगताशितपीतान्नादिसमीकरणकरः । केचित्तु नागकूर्मकृकलदेवदत्तधनंजयाख्याः पञ्चान्ये वायवः सन्तीति वदन्ति । तत्र नाग उद्गिरणकरः । कूर्म उन्मीलनकरः । कृकलः क्षुतकरः । देवदत्तो जृम्भणकरः । धनंजयः पोषणकरः । एतेषां प्राणादिष्वन्तर्भावात्प्राणादयः पञ्चैवेति केचित् । एतत्प्राणादिपञ्चकमाकाशादिगतरजोंशेभ्यो मिलितेभ्य उत्पद्यते । इदं प्राणादिपञ्चकं कर्मेन्द्रियैः सहितं सत् प्राणमयकोशो भवति । अस्य क्रियात्मकत्वेन**

**रजोंशकार्यत्वम् । एतेषु कोशेषु मध्ये विज्ञानमयो ज्ञानशक्तिमान्कर्तृरूपः । मनोमय इच्छाशक्तिमान्करणरूपः । प्राणमयः क्रियाशक्तिमान्कार्यरूपः । योग्यत्वादेवमेतेषां विभाग इति वर्णयन्ति । एतत्कोशत्रयं मिलितं सत् सूक्ष्मशरीरमित्युच्यते ।**

---

अननं गमनम् । विष्वक् समन्तात् । समीकरणं साम्यावस्था । उद्गिरणम् उद्गारः । उन्मीलनं निमीलनस्योपलक्षणम् । प्राणस्याप्यन्तःकरणवत्साधारणत्वात् अत्राप्यखिलसूक्ष्मशरीरमेकबुद्धिविषयतया पञ्चभूतारभ्यत्वम् । इदमित्यादि सुगमम् । अस्येति, कर्मेन्द्रियपञ्चकस्य वायुपञ्चकस्य च इत्यर्थः।

---

**अत्राप्यखिलसूक्ष्मशरीरमेकबुद्धिविषयतया वनवज्जलाशयवद्वा समष्टिः, अनेकबुद्धिविषयतया वृक्षवज्जलवद्वा व्यष्टिरपि भवति । एतत्समष्ट्युपहितं चैतन्यं सूत्रात्मा हिरण्यगर्भः प्राणश्चेत्युच्यते, सर्वत्रानुस्यूनत्वाज्ज्ञानेच्छाक्रियाशक्तिमदुपहितत्वाच्च । अस्यैषा समष्टिः स्थूलप्रपञ्चापेक्षया सूक्ष्मत्वात्सूक्ष्मशरीरं विज्ञानमयादिकोशत्रयं जाग्रद्वासनामयत्वात्स्वप्नः, अत एव स्थूलप्रपञ्चलयस्थानमिति चोच्यते । एतद्व्यष्ट्युपहितं चैतन्यं तैजसो भवति, तेजोमयान्तःकरणोपहितत्वात् । अस्यापीयं व्यष्टिः स्थूलशरीरापेक्षया सूक्ष्मत्वादिति हेतोरेव सूक्ष्मशरीरं विज्ञानमयादिकोशत्रयं जाग्रद्वासनामयत्वात्स्वप्नः, अत एव स्थूलशरीरलयस्थानमिति चोच्यते । एतौ सूत्रात्मतैजसौ तदानीं मनोवृत्तिभिः सूक्ष्मविषयाननुभवतः, 'प्रविविक्तभुक्तैजसः'इत्यादिश्रुतेः ।अत्रापि समष्टिव्यष्टयोस्तदुपहितसूत्रात्मतैजसयोः वनवृक्षवत्तदवच्छिन्नाकाशवच्च जलाशयजलवत्तद्गतप्रतिबिम्बाकाशवच्च अभेदः,एवं सूक्ष्मशरीरोत्पत्तिः ।**

**अत्रापीति** । ननु यथा वृक्षसमुदायो वनम्, तथा लिङ्गशरीरसमुदायो न समष्टिः । तथा सति वृक्षावच्छिन्नाकाशसमुदायो यथा वनावच्छिन्नाकाशो न त्वतिरिक्तोऽस्ति, अतिरिक्तोपाधेरभावात्; एवं

समष्टिलिङ्गशरीरोपहितहिरण्यगर्भोऽपि परिच्छिन्नलिङ्गशरीरोपहितास्मदाद्यनेकजीवसमूह इत्यापद्येत, अतिरिक्तोपाधेरभावात्। न च एतद्युक्तम्, हिरण्यगर्भस्य प्रभूतपुण्यजीवविशेषस्य अस्मदादिभ्यो भिन्नत्वेन श्रूयमाणत्वात्। किं च **'समः प्लुषिणा समो नागेन समो मशकेन'** इत्यादिना **'वायुना वै गौतमसूत्रेण '** इत्यादिना च हिरण्यगर्भलिङ्गशरीरस्य व्यापकत्वमेकत्वं चं प्रतीयते । तत्परिच्छिन्नलिङ्गशरीरोपहितास्मदाद्यनेकजीवसमूहस्य हिरण्यगर्भत्वे न युज्यते। किं च **' ज्ञानमप्रतिहतं यस्य'** इत्यादिना हिरण्यगर्भस्य सर्वज्ञत्वादि प्रतीयते। यदि च जीवसमूहस्य हिरण्यगर्भत्वं तदा समूहस्य समूहिभ्योऽतिरिक्तत्वाभावेनास्मदादीनामेव हिरण्यगर्भत्वेन सर्वज्ञत्वादिप्रसङ्गः । न चैतत्, अनुभवविरोधात्। तस्मान्न लिङ्गशरीरसमुदायः समष्टिरिति चेत्, सत्यम्। न लिङ्गशरीरममुदायः समष्टिः । किं तु व्यापकं लिङ्गशरीरं समष्टिशब्देनोच्यते । तदुपहितो हिरण्यगर्भ इति तस्य व्यापकत्वमेकत्वं च युज्यते । अयं चाधिकारिकः कश्चिज्जीव एव, न त्वीश्वरः, **'सोऽबिभेत्'** इत्यादिना भयवत्त्वादिश्रवणात्। व्यष्टिशब्देन च परिच्छिन्नानि लिङ्गशरीराण्युच्यन्ते। तदुपहिताश्चानेकेऽस्मदादयो जीवाः । व्यष्टिसमष्टिलिङ्गशरीरयोस्तु नाभेदः। तथा सति तदुपहितयोरप्यभेदे सर्वज्ञत्वादिधर्मसांकर्यप्रसङ्गात्। मूले त्वभेदशब्दः पूर्ववद्व्याख्येय इति सूत्रात्मेति व्यपदेशे युक्तिमाह **सर्वत्रेति** । **'वायुना वै गौतमसूत्रेणायं च लोकः परश्च लोकः सर्वाणि भूतानि संदब्धानि'** इति वचनादिति भावः। हिरण्यगर्भ इति व्यपदेशे युक्तिमाह — **ज्ञानेति** । प्राण इति व्यपदेशे तामाह-**क्रियेति** । **अत एवेति** । यतो वासनामयम् अत एवेत्यर्थः । अन्तःकरणस्य तेजोमयत्वं तेजोबाहुल्यात् । **तदानीमिति-** स्वप्नकाले इत्यर्थः । सूक्ष्मविषयान् प्रातिभासिकान् रथादीनित्यर्थः । यत्तु वासनानिर्मितत्वेन सूक्ष्मत्वमिति, तन्न । सत्कार्यवादे घटादेरपि वासनाजन्यत्वेन सूक्ष्मत्वापत्तेः । न च वासनामात्रजन्यत्वे तत्सूक्ष्मत्वमिति वाच्यम्, स्वानिकपदार्थानामज्ञानजन्यत्वेन वासनामात्राजन्यत्वात्। **मनोवृत्तिभिरिति** । यद्यपि स्वाप्निकपदार्थानां साक्षिण्यध्यस्तत्वेन सुखादिवत्साक्षिवेद्यत्वम्, न च साक्षिण्यध्यासे इदंतया प्रतिभासः कथमिति वाच्यम्, तथापि भ्रान्तत्वात् । एतच्च **' देशोऽपि तादृश एव'** इत्यादिना स्वप्नटीकायां स्पष्टम् । किं च मनोवृत्तेः

प्रमाणसहकारित्वेन तदानीं च प्रमाणोपरमात् न मनोवृत्तिगम्यत्वं स्वाप्निकानाम्, किं तु साक्षिवेद्यत्वमेव । तथापि मनसि वृत्तिः वर्तनं येषां ते निद्रादिदोषाः, तैः साहाय्यं प्राप्य स्वयं विषयाननुभवत इत्यर्थ इति द्रष्टव्यम् । स्वाप्निकपदार्थाश्च मूलाज्ञानकार्या इत्यन्यत्र विस्तरोऽस्मत्तातकृतौ । लिङ्गशरीरनिरूपणमुपसंहरति- **एवमिति** ।

---

**स्थूलभूतानि तु पञ्चीकृतानि । पञ्चीकरणं त्वाकाशादिषु पञ्चस्वेकैकं द्विधा समं विभज्य तेषु दशसु भागेषु प्राथमिकान्पञ्च भागान्प्रत्येकं चतुर्धा समं विभज्य तेषां चतुर्णां भागानां स्वस्वद्वितीयार्धभागपरित्यागेन भागान्तरेषु योजनम् । तदुक्तम्-**

**'द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः ।**

**स्वस्वेतरद्वितीयांशैर्योजना त्पञ्च पञ्च ते ' इति ।**

**अस्याप्रामाण्यं नाशङ्कनीयम्, त्रिवृत्करणश्रुतेः पञ्चीकरणस्याप्युपलक्षणत्वात् । पञ्चानां पञ्चात्मकत्वे समानेऽपि तेषु च 'वैशेष्यात्तद्वादस्तद्वादः' इति न्यायेनाकाशादिव्यपदेशः संभवति । तदानीमाकाशे शब्दोऽभिव्यज्यते, वायौ शब्दस्पर्शौ, अग्नौ शब्दस्पर्शरूपाणि, अप्सु शब्दस्पर्शरूपरसाः, पृथिव्यां शब्दस्पर्शरूपरसगन्धाश्च ।**

---

स्थूलानि निरूपयति-- **स्थूलेति** । ' **तासामेकैकां त्रिवृतं त्रिवृतं करवाणि**' इति त्रिवृत्करणश्रुतिः। त्रिवृत्करणे तु त्रयाणां भूतानां तेजोबन्नानामेकैकं द्विधा विभज्यार्धत्रयमपि प्रत्येकं द्विधा विभज्य तत्तदर्धस्य स्वार्धपरित्यागेनार्धान्तरयोर्योजनम् । **उपलक्षणत्वादिति** । **'आत्मन आकाशः संभूतः'** इत्यादिना पञ्चानामपि भूतानां सृष्ट्याम्नानात्पुराणादावाकाशवाय्वादेरपि स्थूलसूक्ष्मविभागाम्नानादिति भावः । ननु पञ्चानां पञ्चात्मकत्वे समाने, कथमसाधारण्येन पृथिव्यादिव्यपदेशः तत्राह - **पञ्चानामिति** । **वैशेष्यात्**पृथिव्यादिभागानामाधिक्यात्, **तद्वादः** पृथिव्यादिव्यपदेश इत्यर्थः । एवं च पञ्चीकरणे आकाशवाय्वोरपि रूपवत्त्वमहत्वाभ्यां चाक्षुषत्वं प्रसज्जत इति दूषणं परास्तम्,

रूपवत्त्वमहत्त्वयोर्विद्यमानत्वेऽप्याकाशादिभागयोराधिक्येन तदभिभवोपपत्तेः । अन्यथा त्रिवृत्करणपक्षेऽपि तेजसि गन्धोपलम्भप्रसङ्गः । पञ्चीकरणानङ्गीकारे दूषणान्तरमाह - **तदानीमिति**, पञ्चीकरणकाले इत्यर्थः।पञ्चीकरणानङ्गीकार आकाशवाय्वोः सूक्ष्मत्वेन सूक्ष्मपृथिव्यां गन्धानुपलम्भवत्तयोः शब्दस्पर्शानुपलम्भप्रसङ्ग इति भावः।

---

**एतेभ्यः पञ्चीकृतेभ्यो भूतेभ्यो भूर्भुवःस्वसत्यमित्येतन्नामकानाम् उपर्युपरि महर्जनस्तपःविद्यमानानाम्, अतलवितलसुतलरसातलतलातलमहातलपातालनामकानाम् अधोऽधो विद्यमानानां लोकानां ब्रह्माण्डस्य तदन्तर्वर्तिचतुर्विधस्थूलशरीराणां तदुचितानामन्नपानादीनां चोत्पत्तिर्भवति चतुर्विधशरीराणि तु जरायुजाण्डजोद्भिज्जस्वेदजाख्यानि । जरायुजानि जरायुभ्यो जातानि मनुष्यपश्वादीनि । अण्डजान्यण्डेभ्यो जातानि पक्षिपन्नगादीनि । उद्भिज्जानि भूमिमुद्भिद्य जातानि कक्षवृक्षादीनि । स्वेदजानि स्वेदेभ्यो जातानि यूकामशकादीनि।**

---

उपरि विद्यमानानामित्यादिषष्ठयन्तानाम् एतेभ्य उत्पत्तिर्भवतीत्यन्वयः । शरीराणीत्यादि स्पष्टम् ॥

---

**अत्रापि चतुर्विधसकलस्थूलशरीरमेकानेकबुद्धिविषयतया वनवज्जलाशयवद्वा समष्टिर्वृक्षवज्जलवद्वा व्यष्टिरपि भवति । एतत्समष्ट्युपहितं चैतन्यं वैश्वानरो विराडित्युच्यते, सर्वनराभिमानित्वाद्विविधं राजमानत्वाच्च । अस्यैषा समष्टिः स्थूलशरीरम्, अन्नविकारत्वादन्नमयकोशः, स्थूलभोगायतनत्वाच्च स्थूलशरीरं जाग्रदिति च व्यपदिश्यते । एतद्व्यष्ट्युपहितं चैतन्यं विश्व इत्युच्यते, सूक्ष्मशरीराभिमानमपरित्यज्य स्थूलशरीरादिप्रविष्टत्वात् । अस्याप्येषा व्यष्टिः स्थूलशरीरम्, अन्नविकारत्वादेव हेतोरन्नमयकोशो जाग्रदिति चोच्यते । तदानीमेतौ विश्ववैश्वानरौ दिग्वातार्कवरुणाश्विभिः क्रमान्नियन्त्रितेन श्रोत्रादीन्द्रियपञ्चकेन**

**क्रमाच्छब्दस्पर्शरूपरसगन्धानग्नीन्द्रोपेन्द्रयमप्रजापतिभिः क्रमान्नियन्त्रितेन वागादीन्द्रियपञ्चकेन क्रमाद्वचनादानगमनविसर्गानन्दांश्चन्द्रचतुर्मुखशंकराच्युतैः क्रमान्नियन्त्रितेन मनोबुद्ध्यहंकारचित्ताख्येनान्तरिन्द्रियचतुष्केण क्रमात्संकल्पनिश्चयाहंकार्यचैत्तांश्च सर्वानेतान्स्थूलविषयाननुभवतः, ' जागरितस्थानो बहिःप्रज्ञः ' इत्यादिश्रुतेः । अत्राप्यनयोः स्थूलव्यष्टिसमष्टयोस्तदुपहितविश्ववैश्वानरयोश्च वनवृक्षवत्तदवच्छिन्नाकाशवच्च जलाशयजलवत्तद्गतप्रतिबिम्बाकाशवच्च पूर्ववदभेदः । एवं पञ्चीकृतपञ्चभूतेभ्यः स्थूलप्रपञ्चोत्पत्तिः।**

---

**एतत्समष्टीति** । अत्राहुः - न स्थूलशरीरसमुदायः समष्टिः । तथा सति स्थूलशरीरोपहितास्मदादिजीवसमुदाय एव विराट् स्यात् । न चैतद्युक्तम्, विराजो भिन्नतया श्रवणात् । नापि व्यापकं स्थूलशरीरं समष्टिस्तदुपहितश्च विराडिति युक्तम्, अस्मदादिवद्विराजः प्रत्यक्षत्वप्रसङ्गात् । तस्मान्न समष्ट्युपहितो विराट् । किं तु परिच्छिन्न चतुर्मुखस्थूलशरीरोपहितः सत्यलोकाधिपतिः सर्वज्ञो हिरण्यगर्भाच्छतगुणापकृष्टानन्दभुग्जीवविशेष एव विराट् । तस्य च समष्ट्यपहितत्वमस्मदादिसकलस्थूलशरीराभिमानात्कचिद्यपदिश्यते ।न तु वस्तुतः समष्ट्युपहितत्वम् उक्तहेतोः । स च अस्मदादिभ्यो भिन्नः । अन्यथा सर्वज्ञत्वादिधर्मसांकर्यं स्यादिति । अन्नं पृथिवी । अज्ञानोपहित आनन्दमयः, बुद्ध्युपहितो विज्ञानमयः, मन उपहितो मनोमयः, प्राणोपहितः प्राणमयः, स्थूलशरीरोपहितश्चान्नमय इत्याखण्डलार्थः । **विश्व इति** । अज्ञानोपहितः प्राज्ञः, लिङ्गशरीरोपहितस्तैजसः, स्थूलशरीरोपहितश्च विश्व इत्याखण्डलार्थः । **जाग्रदिति,** जाग्रद्दशायां विद्यमानत्वादित्यर्थः । **तदानीमिति,** जाग्रद्दशायामित्यर्थः । द्वितीयान्तानां गन्धानित्यादीनामनुभवत इत्यनेन संबन्धः । वागादीन्द्रियपञ्चकेनेत्यस्याग्रे जनितानिति शेषः । वचनादीनानन्दान्तान्यथायथं ज्ञानेन्द्रियैः साक्षिणा वा अनुभवत इत्यर्थ इति द्रष्टव्यम्, कर्मेन्द्रियाणामनुभावकत्वाभावात् । चतुर्मुखो विराट् । मनोबुद्ध्यादीनामिन्द्रियत्वं संकल्पादिग्राहकत्वं च उपचारादुक्तम्, तेषां तैः सहाभेदात् ।

उपचारश्च संकल्पादीनां स्वसाक्षिप्रत्यक्षे विषयत्वेन हेतुत्वात् । **अत्रापीति** । एतदेकदेशिमतम्, औपाधिकयोगाद्विराजः समष्ट्युपहितत्वाभावाच्चेति केचित् । अभेदशब्दो भेदयतीति व्युत्पत्त्या पूर्ववद्व्याख्येयः । समष्ट्युपहितत्वं तु स्थूलाभिमानित्वादिति वा अर्थः । स्थूलनिरूपणमुपसंहरति — **एवमिति** ।

---

**एतेषां स्थूलसूक्ष्मकारणप्रपञ्चानामपि समष्टिरेको महान्प्रपञ्चो भवति, यथावान्तरवनानां समष्टिरेकं महद्वनं भवति यथा वा अवान्तरजलाशयानां समष्टिरेको महाञ्जलाशयः । एतदुपहितं वैश्वानरादीश्वरपर्यन्तं चैतन्यमप्यवान्तरवनावच्छिन्नाकाशवत् अवान्तरजलाशयगतप्रतिबिम्बाकाशवच्चैकमेव । आभ्यां महाप्रपञ्चेतदुपहितचैतन्याभ्यां तप्तायः पिण्डवदविविक्तं सदनुपहितं चैतन्यम् 'सर्वं खल्विदं ब्रह्म' इति वाक्यस्य वाच्यं भवति, विविक्तं सल्लक्ष्यमपि भवति । एवं वस्तुन्यवस्त्वारोपोऽध्यारोपः सामान्येन प्रदर्शितः ।**

---

**स्थूलेति** । यद्यपि न स्थूलसमष्टिः, तथापि स्थूलव्यष्टिरेव विराजः समष्टिरुक्तेति मन्तव्यम् । **एकमेवेति** । एतच्च उपासनार्थम्, विराड्हिरण्यगर्भयोः जीवत्वेनेश्वराभेदायोगात् । जीवत्वं च ' **भयात्**' इत्यादिश्रवणादित्युक्तम् । वास्तवाभेदाभिप्रायं वा एतदिति संप्रदायः ।

---

**इदानीं प्रत्यगात्मनीदमिदमयमयमारोपयतीति विशेषत उच्यते - अतिप्राकृतस्तु आत्मा वै पुत्र' इत्यादिश्रुतेः स्वस्मिन्निव पुत्रेऽपि प्रेमदर्शनात्पुत्रे पुष्टे नष्टे चाहमेव पुष्टो नष्टश्चेत्याद्यनुभवाच्च पुत्र आत्मेति वदति । चार्वाकस्तु - 'स वा एष पुरुषोऽन्नरसमयः 'इत्यादिश्रुतेः, प्रदीप्तगृहात्स्वपुत्रं परित्यज्यापि स्वस्य निर्गमदर्शनात्, 'स्थूलोऽहम्' 'कृशोऽहम्' इत्याद्यनुभवाच्च स्थूलशरीरमात्मेति वदति ।**

---

**इदानीमिति,** सामान्यतोऽध्यारोपनिरूपणानन्तरमित्यर्थः । **इदमिदमिति,** वक्ष्यमाणं पुत्रत्वादीत्यर्थः । **अयमयमिति,** स स वादीत्यर्थः । **आत्मा वै पुत्रेति** । यद्यपि प्राकृतानां श्रुत्युपन्यासो न युक्तस्तत्प्रामाण्यानङ्गीकारात्, तथापि सिद्धान्तिना तत्तत्प्रामाण्याङ्गीकारेण तं प्रति तदुपन्यासो युक्त इति भावः । एवमग्रेऽपि द्रष्टव्यम् । अतिप्राकृताद्विशेषमाह — प्रदीप्तेति । **'आत्मा वै पुत्र'** इत्यादिश्रुतिस्तु पुत्रस्य प्रियत्वमाहेत्यर्थः ।

**अपरश्चार्वाकः - 'ते ह प्राणाः प्रजापतिं पितरमेत्योचुः' इत्यादिश्रुतेः, इन्द्रियाणामभावे शरीरचलनाभावात्, 'काणोऽहम्' 'बधिरोऽहम्' इत्याद्यनुभवाच्चेन्द्रियाण्यात्मेति वदति । अपरश्चार्वाकः - 'अन्योऽन्तर आत्मा ।प्राणमयः' इत्यादिश्रुतेः प्राणाभाव इन्द्रियादिचलनायोगात्, 'अहमशनायावान्' 'अहं पिपासावान्' इत्याद्यनुभवाच प्राण आत्मेति वदति । अन्यस्तु चार्वाकः - 'अन्योऽन्तर आत्मा मनोमयः' इत्यादिश्रुतेः, मनसि सुप्ते प्राणादेरभावात्, 'अहं संकल्पवान्' 'अहं विकल्पवान्' इत्याद्यनुभवाच्च मन आत्मेति वदति । बौद्धस्तु— 'अन्योऽन्तर आत्मा वि ज्ञानमयः' इति श्रुतेः, कर्तुरभावे करणस्य शक्त्यभावात्, 'अहं कर्ता' 'अहं भोक्ता' इत्याद्यनुभवाच्च बुद्धिरात्मेति वदति । प्राभाकरतार्किकौ तु 'अन्योऽन्तर आत्मानन्दम- यः' इत्यादिश्रुतेः, बुद्ध्यादीनामज्ञाने लयदर्शनात्, 'अहमज्ञः ' ' अहमज्ञानी' इत्याद्यनुभवाच्चाज्ञानमात्मेति वदतः । भाट्टस्तु — 'प्रज्ञानघन एवानन्दमयः' इत्यादिश्रुतेः, सुषुप्तौ प्रकाशाप्रकाशसद्भावात्, 'मामहं न जानामि' इत्याद्यनुभवाच्चाज्ञानोपहितं चैतन्यमात्मेति वदति । अपरो बौद्धः - 'असदेवेदमग्र आसीत्' इत्यादिश्रुतेः, सुषुप्तौ सर्वाभावात्, 'अहं सुषुप्तौ नासम्' इत्युत्थितस्य स्वाभावपरामर्शविषयानुभवाच्च शून्यमात्मेति वदति ॥**

---

प्राणा: इन्द्रियाणि । **ऊचुरिति** । तथा च इन्द्रियाणां चेतनत्वमाश्रयणीयम्; अन्यथा वचनासंभव इति भावः । शरीराद्विशेषमाह **इन्द्रियाणामिति**। उपजीव्यत्वादिन्द्रियाणामात्मत्वमिति भावः । **'स वा एषः'** इत्यादिश्रुतिस्तु स्थूलदृष्ट्यभिप्राया, अन्यथोत्तरश्रुतिविरोध इत्यर्थः । स्थूलस्यात्मत्वे बाल्यचेष्टाः

कौमारादौ न स्मरेदित्यादि द्रष्टव्यम् । 'स्थूलोऽहम्' इत्याद्यनुभवस्तु देहस्य तादात्म्याध्यासात् । न च प्रामाणिकस्य कथमध्यास इति वाच्यम् । शरीरत्वादिना प्रामाणिकत्वेऽपि तादात्म्याभिनिविष्टमनुष्यत्वेनाध्यासात् । **अन्योऽन्तर आत्मेति,** अन्नमयादित्यर्थः । **प्राणाभाव इति** । मरणकाले इति शेषः । तथा च उपजीव्यत्वात्प्राणस्यैव आत्मत्वम् । ' **ते ह प्राणाः**' इति श्रुतिस्त्विन्द्रियाधिष्ठातृदेवताभिप्राया । इन्द्रियाणामेवात्मत्वे '**पुरुषं प्राप्यास्तं यन्ति** ' इत्यादिश्रुतिविरोधः, "**यश्चक्षुषा रूपमद्राक्षं स एवाहं त्वगिन्द्रियेण स्पर्शमनुभवामि** इत्याद्यनुभवविरोधश्च स्यात् । ' बधिरोऽहम्' इत्याद्यनुभवस्तु बधिरत्वादिधर्माध्यासादिति केचित् ।

अन्ये तु - बधिरत्वादिनेन्द्रियाणां तादात्म्याध्यास इत्याहुः । अशनाया अशितुमिच्छा; पातुमिच्छा पिपासा ; एते च प्राणधर्मौ । **अन्योऽन्तर आत्मेति,** प्राणमयादित्यर्थः । **मनसीति** । मूर्च्छादाविति शेषः । प्राणप्रवृत्तेर्मनोधीनत्वाच्च । तदुक्तं विवरणे— '**मनोधीनतादर्शनात्प्राणप्रवृत्तेः**' इति । अत उपजीव्यत्वान्मनस एव आत्मत्वम् ; न तु प्राणस्य, मनोधीनत्वानुपपत्तेः, चेतनस्य जडाधीनप्रवृत्त्यभावात् । किं च प्राणस्य आत्मत्वं तत्समानयोगक्षेमत्वेन अपानादेरप्यात्मत्वप्रसङ्गः । तथा च अनेकात्माधिष्ठितशरीरस्य युगपद्विरुद्धप्रवृत्तिप्रसङ्गेनोन्मथनं स्यात् । ततश्च प्राणस्य नात्मत्वम् । किं त्वेकस्य मनस एव । ' **प्राणमयः**' इति श्रुतिस्तु '**अन्नमयः**' इति वद्व्याख्येया । 'अहमशनायावान्' इति प्रत्ययस्तु ' बधिरोऽहम्' इति प्रत्ययवन्नेयः । **अन्योऽन्तर आत्मा** मनोमयादित्यर्थः । **करणस्येति** । सुखादिज्ञानकरणत्वेन हि मनोऽनुमीयते । अतस्तत्करणम् । ततस्तदतिरिक्तः कर्ता वाच्यः, करणातिरिक्तस्य कर्तुर्दर्शनात् । यश्च कर्ता स आत्मा, सा च बुद्धिरित्यर्थः **। प्राभाकरेति** । यद्यपि गुरुभिस्तार्किकैर्वा आत्मा न आनन्दरूपत्वेन स्वीक्रियते, तस्य सुखाश्रयत्वेन स्वीकारात् ; नाप्यज्ञानरूपत्वेन स्वीक्रियते, ज्ञानाश्रयत्वेन स्वीकारात्, ज्ञानाश्रयस्य च अज्ञानत्वायोगात्, सिद्धान्ताभिमतस्य अज्ञानस्य तैरनङ्गीकाराच्च । तथापि तैर्न चिद्रूप आत्मा स्वीक्रियते ; किं तु ज्ञानाश्रयो जडः, तस्यानादित्वं च स्वीक्रियते । एवंभूतश्च वस्तुतो नात्मा, '**सत्यं ज्ञानम्**' इत्यादिश्रुत्या तस्य

चिद्रूपतया श्रवणात् । तस्मात्परस्यात्मत्वेनाभिमतो योऽनादिसिद्धो जडः पदार्थः, तद्वस्तुतोऽज्ञानमेव, तस्य जडत्वे सति अनादित्वात् । अतः परेषामज्ञान एव आत्मत्वभ्रम इति भाव: । बुद्धेरात्मत्वं दूषयति- **बुद्ध्यादीनामिति** । '**यदा वै पुरुषः स्वपिति**' इत्यादिश्रुतिष्विति शेषः, अहमज्ञ इत्यन्वाचयोक्तेः। **प्रज्ञानघन** इति, ज्ञानस्वरूप इत्यर्थ: । भाट्टैः हि आत्मनो द्रव्यबोधात्मकत्वं स्वीक्रियते । अतस्तेषामज्ञानोपहिते चैतन्ये एव आत्मत्वभ्रम इति भावः । द्रव्यबोधात्मकत्वे युक्तिमाह-- **सुषुप्तावित्यादिना** । **अपर** इति, स्पष्टम् । श्रुतेश्च वस्तुतोऽनभिव्यक्तनामरूपात्मनावस्थाने तात्पर्यम्, '**सदेव सोम्येदमग्र आसीत्**' इति श्रुतेः, असत: सज्जननायोगाच्चेति ध्येयम्।

---

**एतेषां पुत्रादीनामनात्मत्वमुच्यते - एतैरतिप्राकृतादिवादिभिरुक्तेषु श्रुतियुक्त्यनुभवाभासेषु पूर्वपूर्वोक्तश्रुतियुक्तयनुभवाभासानाम् उत्तरोत्तरश्रुतियुक्त्यनुभवाभासैरात्मत्व बाधदर्शनात्पुत्रादीनामनात्मत्वं स्पष्टमेव । किं च 'प्रत्यक्' 'अस्थूलः ' ' अचक्षुः ' 'अप्राणः' 'अमनाः 'अकर्ता' 'चैतन्यम्' 'चिन्मात्रम्' 'सत्'इत्यादिप्रबलश्रुतिविरोधात्,अस्य पुत्रादिशुन्यपर्यन्तस्य जडस्य चैतन्यभास्यत्वेन घटादिवदनित्यत्वात्, 'अहं ब्रह्म' इति विद्वदनुभवप्राबल्याच्च तत्तच्छ्रुतियुक्त्यनुभवाभासानां वाधितत्वादपि पुत्रादिशून्यपर्यन्तमखिलमनात्मैव । अतस्तत्तद्भासकं नित्यशुद्धबुद्धमुक्तसत्यस्वभावं प्रत्यक्चैतन्यमेवात्मवस्त्विति वेदान्तविद्वदनुभवः । एवमध्यारोपः।**

---

विशेषाध्यारोपं प्रदर्श्य तस्यारोपत्वं दर्शयति -**एतेषामिति** । उत्तरश्रुतियुक्त्यनुभवाभासैः पूर्वश्रुतियुक्त्यनुभवाभासानां बाधनात्पुत्रादीनामनात्मत्वमित्युक्त्वा प्रकारान्तरेण पुत्रादीनामनात्मत्वमाह- **किंचेति** । प्रत्यक्पदेन पुत्रस्यानात्मत्वमुच्यते, तस्य परात्त्वात् । अकर्तृपदेन च बुद्धेः, आत्मचैतन्यपदेन जडस्याज्ञानस्य । चिन्मात्रमिति द्रव्यबोधात्मकस्यानात्मत्वमुच्यते । प्रत्यगस्थूलाद्यात्मना ह्यात्मा

श्रुत्योच्यते । पुत्रादीनामात्मत्वे तद्विरुद्धमित्यर्थः । **प्रबलेति**, उपक्रमोपसंहारादिना प्राबल्यनिश्चयादित्यर्थः । **अस्येति** । तथा च '**विमतं नात्मा चिद्भास्यत्वाद्घटवत्** इत्यनुमानमुक्तं भवति । पुत्रादीनामनात्मत्वे प्रत्यवायमप्याह - **अहमिति** ।**अत इति** । तथा च तत्तद्वादिनां पुत्राद्यात्मत्वोक्तिरारोपमात्रमित्यर्थः । शुद्धपदेन संसाररराहित्यमुच्यते । तच्च संसाररराहित्यं न मुक्तिदशायामेव, किं तु सर्वदेत्याह - **मुक्तेति** । '**विमुक्तश्च विमुच्यते**' इति श्रुतेरित्यर्थः । **बुद्धिपदेन** स्वप्रकाशत्वमुच्यते । दीपसाधारण्यं निराकरोति-**चैतन्यमिति**।

---

**अपवादो नाम रज्जुविवर्तस्य सर्पस्य रज्जुमात्रत्ववद्वस्तुविवर्तस्यावस्तुनोऽज्ञानादेः प्रपञ्चस्य वस्तुमात्रत्वम् । तदुक्तम्- '**

**स तत्त्वतोऽन्यथाप्रथा विकार इत्युदीरितः ।**

**अतत्त्वतोऽन्यथाप्रथा विवर्त इत्युदीरितः' इति ।**

**तथा हि - एतद्भोगायतनं चतुर्विधसकलस्थूलशरीरजातम्, भोग्यरूपान्नपानादिकम् एतदायतनभूतभूरादि चतुर्दश भुवनानि, एतदायतनभूतं ब्रह्माण्डं चैतत्सर्वमेतेषां कारणरूपपञ्चीकृतभूतमात्रं भवति । एतानि शब्दादिविषयसहितानि पञ्चीकृतानि भूतानि, सूक्ष्मशरीरजातं चैतत्सर्वमेतेषां कारणरूपापञ्चीकृतभूतमात्रं भवति । एतानि सत्त्वादिगुणसहितान्यपञ्चीकृतानि उत्पत्तिव्युत्क्रमेणैतत्कारणभूताज्ञानोपहितचैतन्यमात्रं भवन्ति । एतदज्ञानमज्ञानोपहितं चैतन्यं च ईश्वरादिकमेतत् आधारभूतानुपहितचैतन्यरूपं तुरीयं ब्रह्ममात्रं भवति । आभ्यामध्यारोपापवादाभ्यां तत्त्वंपदार्थशोधनमपि सिद्धं भवति । तथा हि- अज्ञानादिसमष्टिः, एतदुपहितं सर्वज्ञत्वादिविशिष्टं चैतन्यम्, एतदनुपहितं चैतत्त्रयं तप्तायःपिण्डवदेकत्वेनावभासमानं तत्पदवाच्यार्थो भवति । एतदुपाध्युपहिताधारभूतमनुपहितं चैतन्यं तत्पदलक्ष्यार्थो भवति । अज्ञानादिव्यष्टिः, एतदुपहितमल्पज्ञत्वादिविशिष्टं चैतन्यम्, एतदनुपहितं चैतत्त्रयं**

**तप्तायःपिण्डवदेकत्वेनावभासमानं त्वंपदवाच्यार्थो भवति । एतदुपाध्युपहिताधारभूतमनुपहितं प्रत्यगानन्दरूपं तुरीयं चैतन्यं त्वंपदलक्ष्यार्थो भवति ।**

---

---

इदानीमपवादं निरूपयति — **अपवादो नामेति** । संगतिश्च हेतुहेतुमद्भावलक्षणा बोध्या । अवस्तुभूतस्य वस्त्वात्मनोपदेशोऽपवाद इत्यर्थः । **एतत्सर्वमिति** । यथा घटो मृत्स्वरूपस्तत्कार्यत्वात्, तथैतदित्यर्थः । **व्युत्क्रमेणेति** । पृथिवी जलमात्रम् जलं तेजोमात्रम्, तेजो वायुमात्रम्, वायुराकाशमात्रमित्यर्थः । तदुक्तम् – ' **विपर्ययेण तु क्रमोऽत उपपद्यते च**' इति, '**जगत्प्रतिष्ठा देवर्षे पृथिव्यप्सु प्रलीयते । ज्योतिष्यापः प्रलीयन्ते ज्योतिर्वायौ प्रलीयते । वायुर्व्योम्नि....**' इति च । **अज्ञानोपहितेति** । अज्ञानविषयतोपहितचैतन्यमात्रमित्यर्थः । **एतदाधारभूतेति**। एतदधिष्ठानभूतेत्यर्थः ।अध्यारोपापवादनिरूपणप्रयोजनमाह - **आभ्यामिति** । **अज्ञानादिसमष्टिरिति** । अज्ञानमादिर्निरूपकं यस्याः सा समष्टिर्विषयतेत्यर्थः । यत्त्वादिशब्देन लिङ्गशरीरसमष्टिरुच्यत इति, तन्न । तदुपहितस्य हिरण्यगर्भस्य जीवत्वात् त्वम्पदवाच्यत्वेन तत्पदवाच्यत्वाभावात् । **सर्वज्ञत्वादीति** । अत्र आदिशब्देन सर्वनियन्तृत्वाद्युच्यते । **चैतन्यमिति,** ईश्वरचैतन्यमित्यर्थः, तस्य तत्पदवाच्यत्वात्। **अज्ञानादिव्यष्टिरिति** । अत्र आदिशब्देन व्यावहारिकजीवोपाधिलिङ्गशरीरमुच्यते, तदुपहितस्यापि त्वंपदवाच्यत्वात्।

---

**अथ महावाक्यार्थो वर्ण्यते - इदं तत्त्वमसिवाक्यं संबन्धत्रयेणाखण्डार्थबोधकं भवति ।संबन्धत्रयं नाम पदयोः सामानाधिकरण्यं पदार्थयोर्विशेषणविशेष्यभावः प्रत्यगात्मलक्षणयोर्लक्ष्यलक्षणभावश्चेति । तदुक्तम्-'सामानाधिकरण्यं च विशेषणविशेष्यता । लक्ष्यलक्षणसंबन्धःपदार्थप्रत्यगात्मनाम्'।इति सामानाधिकरण्यसंबन्धस्तावत् - यथा 'सोऽयं देवदत्तः' इत्यस्मिन्वाक्ये तत्कालविशिष्टदेवदत्तवाचकसशब्दस्य एतत्कालविशिष्टदेवदत्तवाचकायंशब्दस्य चैकस्मिन्पिण्डे तात्पर्यसंबन्धः ; तथात्र 'तत्त्वमसि' इति वाक्येऽपि परोक्षत्वादिविशिष्टचैतन्यवाचकतत्पदस्य, अपरोक्षत्वादिविशिष्टचैतन्यवाचकत्वंपदस्य चैकस्मिंश्चैतन्ये तात्पर्यसंबन्धः ।**

**विशेषणविशेष्यभावसंबन्धस्तु — यथा तत्रैव वाक्ये सशब्दार्थतत्कालविशिष्टदेवदत्तस्य, अयंशव्दार्थैतत्कालविशिष्टदेवदत्तस्य चान्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभावः, तथात्रापि वाक्ये तत्पदार्थपरोक्षत्वादिविशिष्टचैतन्यस्य, त्वंपदार्था परोक्षत्वादिविशिष्टचैतन्यस्य चान्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभावः । लक्ष्यलक्षणसंबन्धस्तु - यथा तत्रैव सशब्दायंशब्दयोस्तदर्थयोर्वा विरुद्धतत्कालैतत्कालविशिष्टत्वपरित्यागेन अविरुद्धदेवदत्तेन सह लक्ष्यलक्षणभावः, तथात्रापि वाक्ये तत्त्वंपदयोस्तदर्थयोर्वा विरुद्धपरोक्षत्वापरोक्षत्वादिविशिष्टत्वपरित्यागेन अविरुद्धचैतन्येन सह लक्ष्यलक्षणभावः । इयमेव भागलक्षणेत्युच्यते।**

---

पदार्थनिरूपणानन्तरं वाक्यार्थं निरूपयति - **अथेति** । अत्र वाक्यं द्विविधम् - संसृष्टार्थमखण्डार्थं चेति । तत्र संसृष्टार्थं संसर्गगोचरप्रतीतिजनकम्, यथा ' गामानय " इत्यादि । अखण्डार्थं तु संसर्गागोचरप्रतीतिजनकम्, यथा 'प्रकृष्टप्रकाशश्चन्द्रः' इत्यादि । तथा हि-' अस्मिञ्ज्योतिर्मण्डले कतमश्चन्द्रः' इति चन्द्रस्वरूपमात्रविवक्षया प्रश्ने, कश्चिदाह ' यः प्रकृष्टप्रकाशः स चन्द्रः' इति । तथा च चन्द्रवाक्यं चन्द्रस्वरूपमात्रं बोधयति ; न तु संसर्गम्, प्रश्नप्रतिवचनयोर्वैरूप्यापत्तेः । ' सोऽयं देवदत्तः' इत्यपि वाक्यमखण्डार्थम् । एवं तत्त्वमसिवाक्यमपि स्वरूपमात्रविवक्षया प्रयुक्तत्वादखण्डार्थमित्याह- इदमिति।**अखण्डार्थबोधकमिति**-संसर्गागोचरप्रमितिविषयबोधकमित्यर्थः। **प्रत्यगात्मलक्षणयोरिति** । अत्र लक्षणपदेन लक्षकमुच्यते । **पदार्थैति** । पदार्थो च प्रत्यगात्मा च तेषामित्यर्थः । यद्वा पदं च अर्थश्च प्रत्यगात्मा च तेषामित्यर्थः । **सामानाधिकरण्येति** । समानविभक्त्यन्तयोः पदयोरेकस्मिन्नर्थे तात्पर्यं सामानाधिकरण्यमित्यर्थः । ' **अभिधेयाविनाभूते प्रतीतिर्लक्षणोच्यते** ' ' **शक्यसंबन्धो लक्षणा'** इत्येतन्मतद्वयाभिप्रायेण तत्त्वंपदयोस्तदर्थयोर्वेत्युक्तमिति मन्तव्यम्।

**अस्मिन्वाक्ये 'नीलमुत्पलम्' इति वाक्यवद् वाक्यार्थो न संगच्छते । तत्र नीलपदार्थनीलगुणस्य उत्पलपदार्थोत्पलद्रव्यस्य च शौक्ल्यपटादिभेदव्यावर्तकतया अन्योन्यविशेषणविशेष्यभावसंसर्गस्यान्यतरविशिष्टस्यान्यतरस्य तदैक्यस्य वा वाक्यार्थत्वाङ्गीकारे**

**प्रमाणान्तरविरोधाभावात्तद्वाक्यार्थः संगच्छते । अत्र तु तदर्थपरोक्षत्वादिविशिष्टचैतन्यस्य त्वमर्थापरोक्षत्वादिविशिष्टचैतन्यस्य च अन्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभावसंसर्गस्यान्यतरविशिष्टस्यान्यतरस्य तदैक्यस्य च वाक्यार्थत्वाङ्गीकारे प्रत्यक्षादिप्रमाणविरोधाद्वाक्यार्थो न संगच्छते । तदुक्तम्-**

**'संसर्गो वा विशिष्टो वा वाक्यार्थो नात्र संमतः ।**

**अखण्डैकरसत्वेन वाक्यार्थो विदुषां मतः' इति ॥**

**अत्र 'गङ्गायां घोषः प्रतिवसति' इति वाक्यवज्जहल्लक्षणापि न संगच्छते । तत्र गङ्गाघोषयोराधाराधेयभावलक्षणस्य वाक्यार्थस्याशेषतो विरुद्धत्वाद्वाक्यार्थमशेषतः परित्यज्य तत्संवन्धितीरलक्षणाया युक्तत्वाज्जहल्लक्षणा संगच्छते । अत्र तु परोक्षापरोक्षचैतन्यैकत्वलक्षणस्य वाक्यार्थस्य भागमात्रे विरोधाद्भागान्तरमपि परित्यज्यान्यलक्षणाया अयुक्तत्वाज्जहल्लक्षणा न संगच्छते । न च गङ्गापदं स्वार्थपरित्यागेन तीरपदार्थं यथा लक्षयति, तथा तत्पदं त्वंपदं वा स्वार्थपरित्यागेन त्वंपदार्थं तत्पदार्थं वा लक्षयतु; अतः कुतो जहल्लक्षणा न संगच्छत' इति वाच्यम् । तत्र तीरपदाश्रवणेन तदर्थाप्रतीतौ लक्षणया तत्प्रतीत्यपेक्षायामपि तत्त्वंपदयोः श्रूयमाणत्वेन तदर्थप्रतीतौ लक्षणया पुनरन्यतरपदेनान्यतरपदार्थप्रतीत्यपेक्षाभावात्।**

---

भागलक्षणां समर्थयितुं प्रकारान्तरं व्युदस्यति -**अस्मिन्नित्यादिना** । **प्रत्यक्षादीति** । ननु यदीश्वरः प्रत्यक्षः स्यात् तदा जीवेश्वरयोर्भेदः प्रत्यक्षसिद्ध इति तयोरभेदलक्षणो वाक्यार्थो न संगच्छेत- प्रत्यक्षविरोधात्; न चैतत्, ईश्वरस्याप्रत्यक्षत्वादिति चेत्, न । जीवस्तावत्प्रत्यक्ष एव। ईश्वरस्तु यद्यपि न प्रत्यक्षः, तथापि ' तर्कितयत्सत्त्वं यदनुपलम्भविरोधि, तदभावः प्रत्यक्षः' इति न्यायेन वायौ रूपवदन्योन्याभाववद्धटे परमाण्वन्योन्याभाववद्वा जीवेश्वरभेदः प्रत्यक्ष एव । यद्यहमीश्वरः, तदा किंचिज्ज्ञत्वाद्युपलम्भो न स्यात्, न स्याच्च सर्वज्ञत्वाद्यनुपलम्भ इति प्रकृतेऽपि तर्कसंभवात् । तस्माद्भेदस्य प्रत्यक्षत्वाद्युक्तमुक्तं

प्रत्यक्षादिप्रमाणविरोधादिति। प्रत्यक्षे च योग्यानुपलब्धिः परं द्रष्टव्या। यद्वा परोक्षत्वादिविशिष्टचैतन्यस्य जीवभेदे जीवस्य परोक्षत्वादि स्यात्। तथा च अपरोक्षत्वादिबोधकप्रत्यक्षादिप्रमाणविरोधः।

अन्ये तु प्रत्यक्षमादिर्यस्येत्यतद्गुणबहुव्रीहिणानुमानादिकमेवोक्तमित्याहुः । तन्न ; अतद्गुणसंविज्ञानतस्तद्गुणसंविज्ञानस्य समीचीनत्वात्। किं च यत्र विशेष्यैकदेशो विशेषणत्वेन संबध्यते स तद्गुणसंविज्ञानः, यथा 'लम्बकर्णः इत्यादौ । यत्र च न संबध्यते, किंत्वन्य एव विशेषणत्वेन संबध्यते सोऽतद्गुणसंविज्ञानः, यथा 'बहुधनः' इत्यादौ ।एवं च प्रकृते प्रमाणस्य विशेष्यत्वात्तत्तदेकदेशस्य च प्रत्यक्षस्य विशेषणत्वेन संबन्धात्तद्गुण एवायम्, न त्वतद्गुणः । न च यत्र विशेषणं क्रियान्वयि स तद्गुणः, यत्र च विशेषणं न तथा सोऽतद्गुणः ;

एवं च अत्र विशेषणस्य प्रत्यक्षस्य क्रियानन्वयादतद्गुणबहुव्रीहिरेवायमिति वाच्यम्। विशेषणस्य क्रियान्वयित्वेन तद्गुणत्वे ' लम्बकर्णाय देहि' इत्यादौ कर्ण विशेषणस्य दानानन्वयेन तद्गुणबहुव्रीहित्वं न स्यात् । 'बहुधन आस्ते ' इत्यादौ धनस्याप्यस्ति क्रियान्वयेन तद्गुणबहुव्रीहित्वमेव स्यात् न स्याच्चातगुणत्वमिति । न च इष्टापत्तिः, तथा व्यवहाराभावात्। तस्माद्यत्र विशेष्यैकदेशो विशेषणत्वेन संबध्यते, स तद्गुणसंविज्ञान इत्येव लक्षणम्। अत एव द्वितीयसूत्रे 'जन्म आदिर्यस्येति तद्गुणसंविज्ञानो बहुव्रीहिः ' इति भाष्यटीकाव्याख्यानावसरे विवरणाचार्यैः 'विशेष्यैकदेशमेव विशेषणं कृत्वा समासः' इत्युक्तम् । उक्तरीत्या प्रत्यक्षस्यापि विरोधक्रियान्वयेनातद्गुणबहुव्रीहित्वानुपपत्तेश्चेति दिक् । तत्त्वमसिवाक्ये 'नीलमुत्पलम्' इत्यादिवाक्यवन्न सामानाधिकरण्यं गुणगुणिभावाद्यसंभवाच्चेत्यपि द्रष्टव्यम ।।**भागान्तरमपीति,** वैशिष्ट्यांशमित्यर्थः । **अन्येति,** जहदजहल्लक्षणयेत्यर्थः । तत्रैव स्वार्थागमनादिति भावः।

**बोधप्रश्नाः**

1. पुत्रः अत्मा इति पक्षः निराकुरुत।

2. शरीरं अत्मा इति पक्षः निराकुरुत।

3. इन्द्रियं अत्मा इति पक्षः निराकुरुत।

4. ज्ञानाश्रयः अत्मा इति पक्षः निराकुरुत।

5. आत्मनः निर्गुणत्वप्रतिपादकश्रुतयः काः।

6. पञ्चीकणं वाम किं।

**अभ्यासप्रश्नाः**

1. पञ्चिकरणप्रक्रियां वर्णयत।

2. मतभेदेन आत्मपदार्थं निरूपयत।

# खण्डः ३

## प्रस्तावना

तृतीयखण्डेस्मिन्आत्मसाक्षात्कारोपायभूतानि श्रवण-मनन- निदिध्यासनानि वर्तानि। महावाक्यस्वरूपम् तत्त्वमसि महावाक्यार्थवर्णनम्। तत्र तात्पर्यलिङ्गानि कानि इति वर्णीतं। पुनश्च तत्र का लक्षणा उपपद्यते इति विचारोऽपि कुतः।

## उद्देश्यम्

- औपनिषदात्मवर्णनेन आत्मपदार्थज्ञानं भवति।
- तत्त्वमसि महावाक्यार्थज्ञानं भवति।
- आत्मसाक्षात्कारोपायभूतानां श्रवणमनन निदिध्यासनानुष्ठानज्ञानं भवतिः।
- लक्षणाख्यवृत्तेः ज्ञानं भवति।

**अत्र ' शोणो धावति' इति वाक्यवदजहल्लणापि न संभवति । तत्र शोणगुणगमनलक्षणस्य वाक्यार्थस्य विरुद्धत्वात्तदपरित्यागेन तदाश्रयाश्वादिलक्षणया तद्विरोधपरिहारसंभवादजहल्लक्षणा संभवति । अत्र तु परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वस्य वाक्यार्थस्य विरुद्धत्वात्तदपरित्यागेन तत्संबन्धिनो यस्य कस्यचिदर्थस्य लक्षितत्वेऽपि तद्विरोधपरिहारासंभवादजहल्लक्षणा न संभवत्येव । न च तत्पदं त्वंपदं वा स्वार्थविरुद्धांशपरित्यागेन अंशान्तरसहितं त्वंपदार्थं तत्पदार्थं वा लक्षयतु । अतः कथं प्रकारान्तरेण भागलक्षणाङ्गीकरणमिति वाच्यम् । एकेन पदेन स्वार्थांशपदार्थान्तरोभयलक्षणाया असंभवात्पदान्तरेण तदर्थप्रतीतौ लक्षणया पुनस्तत्प्रतीत्यपेक्षाभावाच्च तस्माद्यथा 'सोऽयं देवदत्तः' इति वाक्यं तदर्थो वा तत्कालैतत्कालविशिष्टदेवदत्तलक्षणस्य वाक्यार्थस्यांशे विरोधाद्विरुद्धतत्कालैतत्कालविशिष्टांशं परित्यज्याविरुद्धं देवदत्तांशमात्रं लक्षयति, तथा 'तत्त्वमसि' इति वाक्यं तदर्थो वा परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वलक्षणस्य वाक्यार्थस्यांशे विरोधाद्विरुद्धपरोक्षत्वापरोक्षत्वविशिष्टांशं परित्यज्याविरुद्धमखण्डचैतन्यमात्रं लक्षयतीति।**

---

**तदाश्रयेति।** शोणगुणाश्रयेत्यर्थः । **विरुद्धत्वादिति** । विशिष्टयोरभेदे विशेषणयोरप्यभेदः स्यात्, विशिष्टेऽन्वितस्य विशेषणेऽन्वयादित्यर्थ इत्याहुः । उक्तविस्मरणशीलः शङ्कते **न चेति** । शुद्धं चैतन्यमंशान्तरम् । **प्रकारान्तरेणेति** । पदद्वयेनापि शुद्धचैतन्यलक्षणैव कुतः, पदार्थान्त-रलक्षणैव किं न स्यादित्यर्थः । **एकेनेति** । यद्यपि शोणो धावति' इत्यत्र यथा शोणपदं स्वार्थं पदार्थान्तरं च अश्वादिलक्षणं लक्षणयोपस्थापयति, एवं तत्पदादेरपि स्वार्थांशपदार्थान्तरोभयलक्षकत्वे न बाधकम्, तथाप्युभयलक्षणायां गौरवाच्चैतन्यलक्षणैव युक्तेति भावः । यत्तु भागलक्षणायां गौरवादजहल्लक्षणैवास्त्विति शङ्कते — **न चेति** । अजहल्लक्षणायां शक्यलक्ष्यसाधारण एको धर्मो वक्तव्यः, 'काकेभ्यो दधि रक्ष्यताम् इत्यत्र शक्याशक्यसाधारणदध्युपघातुकत्वरूपधर्मदर्शनात् । न च प्रकृते स्वार्थांशपदार्थान्तरसाधारण एको धर्मोऽस्ति । ततो नाजहल्लक्षणेत्यभिप्रायेणैकेनेत्युक्तमिति । तन्न, भागलक्षणाक्षेपे प्रकारान्तरेणेत्येतद्वयर्थम् । अतः कथंत्वसिद्धयर्थं शक्तिजन्योपस्थितिं त्यक्त्वा

शुद्धचैतन्योपस्थित्यर्थं लक्षणावश्यमङ्गीकर्तव्येति । सा चेयं लक्षणा पदद्वयेऽपि । न च एकेनैव पदेन लक्षणया चैतन्योपस्थितौ पदान्तरवैयर्थ्यम्। पदस्याप्रमाणत्वेन वाक्यत्वसिद्ध्यर्थं पदान्तरस्याप्यावश्यकत्वादिति ।

---

**अथाधुना 'अहं ब्रह्मास्मि' इत्यनुभववाक्यार्थो वर्ण्यते । एवमाचार्येणाध्यारोपापवादपुरःसरं तत्त्वंपदार्थौ शोधयित्वा वाक्येनाखण्डार्थेऽवबोधिते, अधिकारिणः 'अहं नित्यशुद्धबुद्धमुक्तसत्यस्वभावपरमानन्दानन्ताद्वयं ब्रह्मास्मि' इत्यखण्डाकाराकारिता चित्तवृत्तिरुदेति । सा तु चित्प्रतिबिम्बसहिता सती प्रत्यगभिन्नं परं ब्रह्म विषयीकृत्य तद्गताज्ञानमेव बाधते । तदा पटकारणतन्तुदाहे पटदाहवदखिलकारणेऽज्ञाने बाधिते सति, तत्कार्यस्याखिलस्य बाधितत्वात्तदन्तर्भूताखण्डाकाराकारिता चित्तवृत्तिरपि बाधिता भवति । तत्र प्रतिबिम्बितं चैतन्यमपि यथा दीपप्रभा आदित्यप्रभावभासनासमर्था सती तया अभिभूता भवति, तथा स्वयंप्रकाशमानप्रत्यगभिन्नपरब्रह्मावभासनानर्हतया तेनाभिभूतं सत्स्वोपाधिभूताखण्डवृत्तेर्बाधितत्वाद्दर्पणाभावे मुखप्रतिबिम्बस्य मुखमात्रत्ववत् प्रत्यगभिन्नपरब्रह्ममात्रं भवति ।**

**एवं च सति 'मनसैवानुद्रष्टव्यम्' 'यन्मनसा न मनुते' इत्यनयोः श्रुत्योरविरोधः, वृत्तिव्याप्यत्वाङ्गीकारेण फलव्याप्यत्वप्रतिषेधप्रतिपादनात्। तदुक्तम्- 'फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवारितम् । ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षिता' इति, 'स्वयं प्रकाशमानत्वान्नाभास उपयुज्यते' इति च । जडपदार्थाकाराकारितचित्तवृत्तेर्विशेषोऽस्ति । तथा हि - 'अयं घटः ' इति घटाकाराकारितचित्तवृत्तिरज्ञातं घटं विषयीकृत्य तद्गताज्ञाननिरसनपुरःसरं स्वगतचिदाभासेन जडं घटमपि भासयति । तदुक्तम्— 'बुद्धितत्स्थचिदाभासौ द्वावपि व्याप्नुतो घटम् । तत्राज्ञानं धिया नश्येदाभासेन घटः स्फुरेत् इति । यथा दीपप्रभामण्डलमन्धकारगतं घटपटादिकं विषयीकृत्य तद्गतान्धकारनिरसनपुरःसरं स्वप्रभया तदपि भासयतीति ।**

---

**अनुभववाक्येति** । अनुभवस्य ब्रह्मतत्त्वसाक्षात्कारस्य प्रतिपादकं यद्वाक्यं तस्येत्यर्थः । यद्यप्येतस्यापि वाक्यस्याखण्डार्थत्वेन तत्त्वमसिवाक्यान्न स्वतन्त्रोऽर्थोऽस्ति, तथापि शक्त्या प्रतीयमानोऽर्थोऽत्र प्रतिपाद्यत इति ध्येयम् । अनन्तशब्देन व्यापकत्वमुच्यते । **अखण्डाकाराकारितेति**, अखण्डाकारगोचरेत्यर्थः । **उदेति,** सा एतद्वाक्यस्य शक्योऽर्थ इति शेषः । वृत्तेः प्रयोजनमाह — **सा त्विति** । अज्ञानमेवेत्यत्र एवकारेण चैतन्यस्फोरकत्वं वृत्तेर्व्यावर्त्यते । नन्वज्ञाननिवर्तकवृत्तिनिवृत्त्यर्थं वृत्त्यन्तरमपेक्षणीयं न वा । आद्ये, अनवस्था । अन्त्ये, तन्निवर्तकाभावेन तस्याः सत्त्वात्तयैव सद्वितीयत्वम्, तत्राह - **तदेति** । अज्ञाननिवर्तिका वृत्तिः स्वस्या अपि बाधिका कतकरजोन्यायेनेति भावः । वृत्त्या अज्ञानमात्रं निवर्त्यते, न चैतन्यं स्फोर्यत इत्युक्तम् ॥ ।तदुपपादनफलमाह -- **एवमिति** । विषयेऽभिव्यक्तं चैतन्यं फलम् । चैतन्ये च न चैतन्याभिव्यक्तिः, आत्माश्रयात्स्वयंप्रकाशत्वाच्चेति भावः । अस्येति, चैतन्यस्येत्यर्थः । आभासो वृत्तिप्रतिबिम्बितं चैतन्यम् । उपयुज्यत इति, आवरण- शुद्धचैतन्यस्फोरण इत्यर्थ: । घटमिति, घटावच्छिन्नं चैतन्यमित्यर्थः । अज्ञानस्य चैतन्यविषयत्वेन वृत्तेरपि चैतन्यविषयत्वात्, ज्ञानाज्ञानयोः समानविषयत्वनियमात् । अज्ञानस्य च चैतन्यविषयत्वमुपपादितमधस्तात् । अज्ञानेति । एतच्च तूलाज्ञानपक्षे । तथा हि--' घटं न जानामि' इति प्रतीतिश्चतुर्धा व्याख्याता विवरणे — वृत्त्यभावविषयत्वेन, संसर्गविषयत्वेन, आवरणान्तराविषयत्वेन, तूलाज्ञानविषयत्वेन च । तत्र यदा' घटं न जानामि' इति प्रतीतेर्वृत्त्यभावविषयत्वम्, तदा अखण्डचैतन्यविषयक मूलाज्ञानातिरिक्तमज्ञानं नास्ति, वृत्त्यभावोपलक्षितान्मूलाज्ञानादेवोपपत्तेः । वृत्त्या तु रजतमात्रं निवर्तते ; नाज्ञानम्, तस्याखण्डचैतन्यविषयवृत्तिनिवर्त्यत्वात् । तदुक्तम्- 'स्वाकारे प्रविलयमात्रं क्रि। यते' इति । यदाप्यनिर्वचनीयमूलावरण संसर्गमादाय 'घटं न जानामि' इति प्रतीतिव्याख्यानम्, तदापि नाज्ञाननिवृत्तिः । तथा हि- अज्ञानं तावच्चिन्मात्रविषयम् ।अतस्तदावरणं चिन्मात्रनिष्ठमितीश्वरेऽपि मूलावरणमध्यस्तमिति वक्तव्यम् । ईश्वरे घटादयोऽप्यध्यस्ताः, तस्य सर्वज्ञत्वात् । अतो

घटावरणयोरेकत्राध्यासादावरणस्यानिर्वचनीयसंसर्गो घटे उत्पद्यते । तं च संसर्गमादाय " घटं न जानामि' इति प्रतीतिः । यथैकस्मिन्स्फटिकाचले प्रतिबिम्बितयोर्लौहित्य मुखयोः 'लोहितं मुखम् ' इति परस्परसंसर्गोऽवभासते, तद्वत् । तदुक्तम् — ' ' विषयैः सहाज्ञानस्य साक्षिचैतन्येऽध्यासात्प्रतिभास:' इति । अज्ञानस्याज्ञानावरणस्य साक्षिचैतन्ये ईश्वरचैतन्येऽध्यासाच्चिन्मात्रविषय इति 'घटं न जानामि इति प्रतिभास इत्यर्थः । एवं च अज्ञानस्य चिन्मात्रविषयत्वेऽप्यनिर्वचनीयावरणसंसर्गमादाय घटस्याप्यज्ञानविषयत्वाद्युक्तैव 'घटं न जानामि इति प्रतीतिः । रजतं तु शुक्तौ जनितावरणसंसर्गान्मूलाज्ञानादेवोत्पद्यते । वृत्त्या तु प्रावरणसंसर्गमात्रनिवृत्तिः, नाज्ञाननिवृत्ति:, तस्य ब्रह्मज्ञाननिवर्त्यत्वात् । यदापि 'घटं न जानामि' इति प्रतीतिं व्याख्यातुं तन्मात्रनिष्ठावरणातिरिक्तं परिच्छिन्नं घटे आवरणं स्वीक्रियते, तदापि वृत्त्या आवरणमात्रनिवृत्तिः ; नाज्ञाननिवृत्तिः, उक्तहेतोः । यदा तु सविलासाज्ञाननिवृत्तिर्बाधः, अज्ञानं प्रमाणमित्यादिव्यवहारसौक यार्थं तूलाज्ञानं स्वीक्रियते, तदा तु तदेव 'घटं न जानामि इति प्रतीतेर्विषयः । तस्मादेव च रजतमुत्पद्यते । वृया तु सकार्यस्य तस्य निवृत्तिः क्रियते। ततश्च तूलाज्ञानपक्ष एवाज्ञानवृत्तिः। तस्माद्युक्तमुक्तमेतच्च तूलाज्ञानपक्ष इति । चिदाभासेनेति । केवलाया वृत्तेजडत्वेन अभासकत्वादिति भावः ।

---

**एवंभूतस्वस्वरूपचैतन्यसाक्षात्कारपर्यन्तं श्रवणमननिदिध्यासनसमाध्यनुष्ठानस्यापेक्षितत्वात्तेऽपि प्रदर्श्यन्ते - श्रवणं नाम षड्विधलिङ्गैरशेष वेदान्तानामद्वितीयवस्तुनि तात्पर्यावधारणम् । लिङ्गानि तु उपक्रमोपसंहाराभ्यासापूर्वता फलार्थवादोपपत्त्याख्यानि । प्रकरणप्रतिपाद्यस्यार्थस्य तदाद्यन्तयोरुपपादनमुपक्रमोपसंहारौ । यथा च्छान्दोग्ये षष्ठाध्याये प्रकरणप्रति पाद्यस्याद्वितीयवस्तुनः 'एकमेवाद्वितीयम्' इत्यादौ ' ऐतदात्म्यमिदं सर्वम्' इत्यन्ते च प्रतिपादनम् । प्रकरणप्रतिपाद्यस्य वस्तुनस्तन्मध्ये पौनःपुन्येन प्रतिपादनमभ्यासः । यथा तत्रैवाद्वितीयवस्तुनि मध्ये 'तत्त्वमसि' इति नवकृत्वः प्रतिपादनम् । प्रकरणप्रतिपाद्यस्याद्वितीयवस्तुनः प्रमाणान्तराविषयीकरणमपूर्वता । यथा तत्रैवाद्वितीयवस्तुनो मानान्तराविषयीकरणम् । फलं तु प्रकरणप्रतिपाद्यस्यात्मज्ञानस्य तदनुष्ठानस्य वा**

**तत्र तत्र श्रूयमाणं प्रयोजनम् । यथा तत्र 'आचार्यवान्पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये ' इत्यद्वितीयवस्तुज्ञानस्य तत्प्राप्तिः प्रयोजनं भूयते । प्रकरणप्रतिपाद्यस्य तत्र तत्र प्रशंसनमर्थवादः । यथा तत्रैव 'उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम्' इत्यद्वितीयवस्तुप्रशंसनम् । प्रकरणप्रतिपाद्यार्थसाधने तत्र तत्र श्रूयमाणा युक्तिरुपपत्तिः । यथा तत्र 'यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' इत्यादावद्वितीयवस्तुसाधने विकारस्य वाचारम्भणमात्रत्वे युक्तिः श्रूयते । मननं तु श्रुतस्याद्वितीयवस्तुनो वेदान्तानुगुणयुक्तिभिरनवरतमनुचिन्तनम् । विजातीय देहादिप्रत्ययरहिताद्वितीयवस्तुसजातीयप्रत्ययप्रवाहो निदिध्यासनम् । समाधिर्द्विविधः सविकल्पको निर्विकल्पकश्चेति । तत्र सविकल्पको नाम ज्ञातृज्ञानादिविकल्पलयानपेक्षयाद्वितीयवस्तुनि तदाकाराकारितायाचित्तवृत्तेरवस्थानम् । तदा मृन्मयगजादिभानेऽपि मृद्भानवद्वैतभानेऽप्यद्वैतं वस्तु भामते । तदुक्तम्- 'दृशिस्वरूपं गगनोपमं परं सकृद्विभातं त्वजमेकमक्षरम् । अलेपकं सर्वगतं यदद्वयं तदेव चाहं सततं विमुक्त ओम्' इति । निर्विकल्पकस्तु ज्ञातृज्ञानादिविकल्पलयापेक्षया अद्वितीयवस्तुनि तदाकाराकारितायाश्चित्तवृत्ते- रतितरामेकीभावेनावस्थानम् । तदा तु जला- काराकारितलवणानवभासेन जलमात्रावभास- वदद्वितीयवस्त्वाकाराकारितचित्तवृत्त्यनवभा- सेनाद्वितीयवस्तुमात्रमवभासते । ततश्चास्य सुषुप्तेश्चाभेदशङ्का न भवति । उभयत्र वृत्त्य- भाने समानेऽपि तत्सद्भावासद्भावमात्रेणानयोर्भेदोपपत्तेः ॥**

---

तात्पर्यावधारणमिति । तात्पर्यावधारणानुकूलो विचार इत्यर्थः । अवधारणस्यैव श्रवणत्वे श्रवणविधिविधेयत्वं न स्यात्, सिद्धान्ते ज्ञाने विध्यभावात्, अवधारणस्यैव ज्ञानत्वात् । ननु 'श्रोतव्यः' इति श्रवणविधिः । तेन च न श्रवणं विधातुं शक्यते, उपक्रमोपसंहारादिपर्यालोचनया तस्यात्मपरत्वावगमात् । अतः श्रवणस्याविधेयत्वान्नोक्तदोष इति चेत्, न, ' श्रोतव्यः' इति वाक्येन श्रवणस्याविधेयत्वेऽपि श्रवणेऽधिकविध्यङ्गीकारात् । अन्ये पुनराचार्याः'श्रोतव्यः' इति वाक्येनैव श्रवणं विधीयते,

उपक्रमोपसंहारादिपर्यालोचनया आत्मपरतावगमेऽप्यवान्तरतात्पर्येण श्रवणपरत्वात् । यथा 'विविदिषन्ति' इति वाक्यमात्मपरमप्यवान्तरतात्पर्येण यज्ञादि विधत्ते, तद्वदित्याहुः । एवं च श्रवणस्यावधारणरूपत्वे विधानमनुपपन्नमिति तदनुकूलो विचार एव श्रवणम् । उपक्रमोपसंहाराविति समस्य वचनमुपक्रमोपसंहारयोरैकरूप्यमेकं लिङ्गमिति सूचनार्थम् । तदाद्यन्तयोरिति, प्रकरणाद्यन्तयोरित्यर्थः । तन्मध्य इति, प्रकरणमध्ये इत्यर्थः । तत्रैवेति, छान्दोग्ये इत्यर्थः । मानान्तरेति, तस्योपनिषन्मात्रगम्यत्वादिति भावः । तदजुष्ठानस्येति, ज्ञानानुकूलश्रवणाद्यनुष्ठानस्येत्यर्थः, श्रवणाद्यनुष्ठानस्योपस्थितत्वात् । तत्प्रयोजनश्रुतिं तावदुदाहरति आचार्येति । ज्ञानप्रयोजनश्रुतिमुदाहरति-तस्येति । तस्योत्पन्नतत्त्वसाक्षात्कारस्य तावदेव चिरमज्ञाननिवृत्तौ तावानेव विलम्बः, यावन्न विमोक्ष्ये यावत्प्रारब्धकर्मणा न विमुक्तो भवतीत्यर्थः । अद्वितीयवस्तुज्ञानस्येत्य श्रवणाद्यनुष्ठानस्य वेति शेषः । तत्प्राप्तिः, ज्ञानप्राप्तिश्चैतन्यप्राप्तिश्चेत्यर्थः । आदिश्यतेऽसावादेशोऽर्थः, तमर्थमप्राक्ष्यः पृष्टवानसीत्यर्थः ।अनवरतमिति । शरीरयात्रासमयातिरिक्तसमय इत्यर्थः । व्यवधानेन कृतस्य फलाजनकत्वादिति भावः । ज्ञानादीत्यत्र आदिशब्देन ज्ञेयमुच्यते । दृशिस्वरूपमिति, चिद्रूपमित्यर्थः । गगनोपममिति, असङ्गमित्यर्थः । सकृदिति, स्वप्रकाशमित्यर्थः । अक्षरमिति, नाशशून्यमित्यर्थः । अलेपकमिति । लेपः संसारः । तदेव चेति, तथा च न ज्ञातृज्ञे यादिविकल्पलय इति भावः । अतितरामिति, विस्पष्टमनवभासनादिति भावः । दृष्टान्तमाह — जलेति । निर्विकल्पक समाधेर्निद्रातो विशेषमाह - ततश्चेति । यद्यपि सुषुप्रिदशायामविद्यावृत्तिसद्भावोऽस्त्येव, तथाप्यन्तःकरणवृत्त्यभावेन वैषम्यम ।।

**अस्याङ्गानि यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयः । तत्राहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः । शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः । करचरणादिसंस्थानविशेषलक्षणानि पद्मस्वस्तिकादीन्यासनानि । रेचकपूरककुम्भकलक्षणाः प्राणनिग्रहोपायाः प्राणायामाः । इन्द्रियाणां स्वस्वविषयेभ्यः प्रत्याहरणं प्रत्याहारः ।**

अद्वितीयवस्तुन्यन्तरिन्द्रियधारणं धारणा । तवाद्वितीयवस्तुनि विच्छिद्य विच्छिद्यान्तरिन्द्रियवृत्तिप्रवाहो ध्यानम् । समाधिस्तूक्तः सविकल्पक एव ॥ एवमस्याङ्गिनो निर्विकल्पकस्य लयविक्षेपकषायरसास्वादलक्षणाश्चत्वारो विघ्नाः संभवन्ति । लयस्तावदखण्डवस्त्वनवलम्बनेन चित्तवृत्तेर्निद्रा । अखण्डवस्त्वनवलम्बनेन चित्तवृत्तेरन्यावलम्बनं विक्षेपः । लयविक्षेपाभावेऽपि चित्तवृत्ते रागादिवासनया स्तब्धीभावादखण्डवस्त्वनवलम्बनं कषायः । अखण्डवस्त्वनवलम्बनेनापि चित्तवृत्तेः सविकल्पकानन्दास्वादनं रसास्वादः, समाध्यारम्भसमये सविकल्पकानन्दास्वादनं वा ॥

अनेन विघ्नचतुष्टयेन विरहितं चित्तं निवातदीपवदचलं सदखण्डचैतन्यमात्रमवतिष्ठते यदा, तदा निर्विकल्पकः समाधिरित्युच्यते । तदुक्तम् — 'लये संबोधयेच्चित्तं विक्षिप्तं शमयेत्पुनः । सकषायं विजानीयात्समप्राप्तं न चालयेत् ॥ नास्वादयेत्सुखं तत्र निःसङ्गः प्रज्ञया भवेत्' इति 'यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता' इति च ॥

अथ जीवन्मुक्तलक्षणमुच्यते - जीवन्मुक्तो नाम स्वस्वरूपाखण्डब्रह्मज्ञानेन तदज्ञानबाधनद्वारा स्वस्वरूपाखण्डब्रह्मणि साक्षात्कृते, अज्ञानतत्कार्य संचित कर्म संशयविपर्ययादीनामपि बाधितत्वादखिलबन्धरहितो ब्रह्मनिष्ठः ; 'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे' इत्यादिश्रुतेः । अयं तु व्युत्थानसमये मांसशोणितमूत्रपुरीषादिभाजनेन शरीरेण, आन्ध्यमान्द्यापटुत्वादिभाजनेनेन्द्रियग्रामेण, अशनायापिपासाशोकमोहादिभाजनेनान्तःकरणेन च पूर्वपूर्ववासनया क्रियमाणानि कर्माणि भुज्यमानानि ज्ञानाविरुद्धारब्धफलानि च पश्यन्नपि बाधितत्वात्परमार्थतो न पश्यति यथेन्द्रजालमिति ज्ञानवांस्तदिन्द्रजालं पश्यन्नपि परमार्थमिदमिति न पश्यति, 'सचक्षुरचक्षुरिव सकर्णोऽकर्ण इव' इत्यादिश्रुतेः । उक्तं च- 'सुषुप्तवज्जाग्रति यो न पश्यति द्वयं च पश्यन्नपि चाद्रयत्वतः । तथा च कुर्वन्नपि निष्क्रियश्च यः स आत्मविन्नान्य इतीह निश्चयः' इति ।अस्य ज्ञानात्पूर्वं विद्यमानानामेवाहारविहारा- दीनामनुवृत्तिच्छुभवासनानामेवानुवृत्तिर्भव ति,

**शुभाशुभगोरौदासीन्यं वा । तदुक्तम् — 'बुद्धाद्वैतस्तत्त्वस्य यथेष्टाचरणं यदि । शुनां तत्त्वदृशां चैव को भेदोऽशुचिभक्षणे' इति 'ब्रह्मवित्त्वं तथा मुक्त्वा स आत्मज्ञो न चेतरः'**

**इति च । तदानीममानित्वादीनि ज्ञानसाधनान्यद्वेष्टृत्वादयः सद्गुणाश्चालंकारवदनुवर्तन्ते । तदुक्तम्— 'उत्पन्नात्मावबोधस्य द्वेष्टृत्वादयो गुणाः । अयत्नतो भवन्त्यस्य न तु साधनरूपिणः' इति । किं बहुना । अयं देहयात्रामात्रार्थमिच्छानिच्छा परेच्छाप्रापितानि सुखदुःखलक्षणान्यारब्धफलान्यनुभवन्नन्तःकरणाभासादीनामवभासकः संस्तदवसाने प्रत्यगानन्दपरब्रह्मणि प्राणे लीने सति, अज्ञानतत्कार्यसंस्काराणामपि विनाशात्परमकैवल्यमानन्दैकर समखिलभेदप्रतिभासरहितमखण्डद्ब्रह्मावतिष्ठते; 'न तस्य प्राणा उत्क्रामन्ति ' 'अत्रैव समवनीयन्ते' 'विमुक्तश्च विमुच्यते ' इत्यादिश्रुतेः ॥**

---

अस्येति, निर्विकल्पकसमाधेरित्यर्थः । समाधिशब्देन सविकल्पकः समाधिरुच्यते । अस्तेयेति पदच्छेदः । प्रणिधानं सेवनम् । उत्तरो ग्रन्थः स्पष्टः ॥ विक्षेपादीनां दोषत्वे संमतिमाह — तदुक्तमिति ॥ प्रसङ्गादाह — **अथेति** । जीवन्मुक्तो नाम ब्रह्मनिष्ठ इति संबन्धः ।प्रपञ्चसत्त्वात्कथं ब्रह्मनिष्ठत्वम्? तत्राह-अखिलेति । बन्धराहित्ये हेतुमाह-- अज्ञानेति । संचितेति । प्रारब्धकर्मणां तु भोगेनैव क्षयः, 'नाभुक्तं क्षीयते कर्म' इति वचनात् । न च संचितस्यापि ज्ञानेन नाशे मानाभावः । 'ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुन इति वचनस्यैव मानत्वात् । न च प्रारब्धसंचितयोरभेदः ; प्रायणकाले चोगुद्धवृत्तिकस्य प्रारब्धत्वात्, अनुद्बुद्धवृत्तिकम्य तु संचितत्वादिति भावः । अज्ञानादिबाधने हेतुमाहस्वेति । तत्र संमतिमाह-- भिद्यत इति । हृदयग्रन्थिः चिदचिद्ग्रन्थिः, अहंकार इति यावत् । अज्ञानादिसकलस्य , बाधनात्परममुक्तित्वमेव युक्तम, न तु जीवन्मुक्तित्वम्,। तत्राह - अयमित्यादिना । व्युत्थानेति । समाधेः सकाशादिति शेषः । ज्ञानेति । ज्ञानाविरुद्धानि च तान्यारब्धफलानि चेति समास: । बाधितत्वादिति । अयं भावः— ब्रह्मतत्त्वसाक्षात्कारेणाज्ञानादिसकलप्रपञ्चनिवृत्तावपि भोगैकनाश्यप्रारब्धस्यानिवृत्तेः पुनर्निवृत्तमपि प्रपञ्चं बाधितानुवृत्त्या पश्यति । अतो जीवन्मुक्तित्वम् ।

न च तदानीं सकलकार्योपादानभूताज्ञानस्य निवृत्तेः कथं तत्कार्यस्य बाधितानुवृत्त्यापि सत्त्वम् उपादानाभावे उपादेयस्यायोगादिति वाच्यम्, अज्ञानस्य सर्वथा अनिवृत्तेः । तथा हि- अज्ञानेऽस्मिञ्शक्तित्रयम् । एका तावत्पारमार्थिक सत्त्वसंपादनपटीयसी शक्तिः । तया च शक्त्या प्रपञ्चे पारमार्थिकत्वं स्फुरति । श्रवणाद्यभ्यासपरिपाकवशेन च सा निवर्तते । तस्यां च निवृत्तायां प्रपञ्चः पारमार्थिकतया न स्फुरति, किं तु व्यावहारिकतया । अतोऽज्ञाने व्यावहारिकसत्त्व संपादनपटीयस्वपरा शक्तिर्विद्यते । सा च शक्तिरात्मतत्त्वसाक्षात्कारेण निवर्तते । निवृत्तायां च तस्यां प्रपञ्चो न व्यावहारिकतया स्फुरति । किं तु प्रारब्धस्य सत्त्वाद्बाधितानुवृत्त्या स्फुरति । अतः प्रातिभासिकसत्त्वसंपादनपटीयस्यपि शक्तिरज्ञाने विद्यते। सा च भोगेन प्रारब्धक्षयेऽन्तिमतत्त्वसाक्षात्कारेणाज्ञानेन सह निवर्तते । ततो न प्रपञ्चस्फुरणम् । न च अत्र 'तस्याभिध्यानाद्योजनात्तत्त्वभावाद्भूयश्चान्ते विश्वमायानिवृत्तिः' इति श्रुतेर्मानत्वात् ।

अत्र च अभिध्यानशब्देन श्रवणाद्यभ्यासपरिपाक उच्यते । तस्माद्विश्वमायानिवृत्तिरिति प्रथमं संबन्धः । पारमार्थिकसत्त्वसंपादनपटी यस्याः शक्तेर्नाशेन विशिष्टस्याज्ञानस्यापि नाशान्मायेत्युक्तम् । युज्यतेऽनेनेति योजनमात्मतत्त्वसाक्षात्कारः । तस्मादपि मायानिवृत्तिः, व्यावहारिकसत्त्व संपादनपटीयस्याः शक्तेर्नाशेन तद्विशिष्टस्याज्ञानस्यापि नाशात् । तत्त्वभावस्तत्त्वसाक्षात्कारस्तस्मात्, अन्ते प्रारब्धकर्मणां भोगेन क्षये विश्वमायानिवृत्तिः प्रातिभासिकसत्त्वसंपादनपटीयस्या शक्त्या सहाज्ञानस्य निवृत्तिः । भूयः शब्दश्च पारमार्थिकसत्त्व संपादनपटीय सीव्यावहारिक सत्त्वसंपादनपटीयसीशक्तिविशिष्टाज्ञाननाशाय क्षयाभ्यासार्थक इत्यर्थः । एवं च तत्त्वसाक्षात्कारे विद्यमानेऽपि प्रारब्धस्य विद्यमानत्वात्प्रातिभासिकसत्त्वसंपादनपटीयस्याः शक्तेः स्वविशिष्टस्याज्ञानस्य च अनिवृत्तिरिति युक्तं प्रपञ्चस्य बाधितानुवृत्या सत्त्वम्, उपादानस्याज्ञानस्यानिवृत्तेः । ततश्च यस्य केवलं बाधितानुवृत्त्या प्रपञ्चः स्फुरति स जीवन्मुक्त इति जीवन्मुक्तलक्षणं सिद्धम् । जीवन्मुक्तस्य नाशुभे

प्रवृत्तिरित्याह — अस्येति ; तत्त्वज्ञानस्य तथैव स्वभाव इति भावः । तदानीमिति, ज्ञानस्य सिद्धत्वादिति भावः । उपसंहरति-- किं बहुनेति । तदवसाने इति प्रारब्धक्षये सतीत्यर्थः।

**इति श्रीमत्परमहंसपरिव्राजकाचार्य सदानन्दविरचितो वेदान्तसारः समाप्तः ।**

**अनन्ताङ्घ्रियुगं स्मृत्वा रचिता बालबोधिनी । आपदेवेन वेदान्तसारतत्त्वस्य दीपिका ॥**

**इति श्री आपदेवविरचिता बालबोधिन्याख्या वेदान्तसारव्याख्या समाप्ता ॥**

**बोधप्रश्नः**

1 महावाक्यं नाम किम्।

2 तत्त्वमसि वाक्यार्थः कः।

3 जहल्लक्षणा नाम का।

4 अजहल्लक्षणा नाम का।

5 जहदजहल्लक्षणा नाम का।

6 लक्षणा नाम का।

7 यमाः के।

8 मोक्षः नाम किं।

9 नियमाः के।

10 वेदान्तसारःकेन प्रणीतः।

**अभ्यासप्श्नाः**

1 तत्वमसि महावाक्यं प्रतिपादयत।

2 जहल्- अजहल्- जहदजहल् लक्षणाः प्रतिपादयत।

3 आत्मसात्कारोपायान् प्रतिपादयत।

# खण्डः ४

## प्रस्तावना

चतुर्थखण्डेऽस्मिन् सांख्यदर्नस्य परिचयः सांख्यदर्शनप्रवर्तककपिलमुनीनां परिचयः भवति। पुनश्च इदं दर्शनं किमर्थं आदरणीयम् इति विषयमधिकृत्य मङ्गश्लोकः अत्र प्रणीतः। तत्र दुःखत्रयं किमिति स्पष्टतया वर्णितं। सांख्यमते कति तत्त्वानि, तत्र प्रमाणानि विशिष्य तत्तत्प्रमाणानां स्वरूपं तत्प्रभेदश्च वर्णितः। सत्त्वं रजः तमः इत्येतेषां त्रयाणां पदार्थानां वर्णानं कृतं। तत्रापि अन्तः करणं किं तत्प्रभेदः कः इत्येतत्सर्वं अत्र विचारितं भवति।

## उद्देश्यम्

सांख्यदर्शनतत्वज्ञानं भवति

अव्यक्तव्यक्त पुरुषपदार्थानां ज्ञानं भवति

अन्तःकरणस्य प्रभेदज्ञानं भवति

# साङ्ख्यकारिका

**दुःखत्रयाभिघाताजिज्ञासा तदभिघातके हेतौ ।**

**दृष्टे सापार्था चेन्नैकान्तात्यन्ततोऽभावात् ॥ १ ॥**

कपिलाय नमस्तस्मै, येनाविद्योदधौ जगति मग्ने ।

कारुण्यात् सांख्यमयी, नौरिव विहिता प्रतरणाय ॥ (१)

अल्पग्रन्थं स्पष्टं, प्रमाणसिद्धान्त हेतुभिर्युक्तम् ।

शास्त्रं शिष्यहिताय, समासतोऽहं प्रवक्ष्यामि ॥ ( २ )

दुःखत्रयेति - अस्या आर्याया उपोद्घातः क्रियते । इह भगवान् ब्रह्मसुतः कपिलो नाम, तद् यथा-

'सनकश्च सनन्दश्च तृतीयश्च सनातनः ।

आसुरिः कपिलश्चैव वोढुः पञ्चशिखस्तथा ।

" इत्येते ब्रह्मणः पुत्राः सप्त प्रोक्ता महर्षयः ॥

कपिलस्य सहोत्पन्नानि 'धर्मो ज्ञानं वैराग्यमैश्वर्यञ्च' इति । एवं स उत्पन्नः सन् अन्धे तमसि मज्जज्जगदालोक्य संसारपारम्पर्येण सत्कारुण्यो जिज्ञासमानाय आसुरिगोत्राय ब्राह्मणाय इदं पञ्चविंशतितत्त्वानां ज्ञानम् उक्तवान्, यस्य ज्ञानाद्दुः खक्षयो भवति, -

'पञ्चविंशतितत्त्वज्ञो यत्र तत्राश्रमे वसेत् ।

जटी मुण्डी शिखी वापि मुच्यते नात्र संशयः ॥

तदिदमाहुः । दुःखत्रयाभिघाताजिज्ञासेति । - तत्र दुःखत्रयम् आध्यात्मिकम, आधिभौतिकम्, आधिदैविकश्चेति । तत्राध्यात्मिकं द्विविधं शारीरं मानसं चेति । शारीरं वातपित्तश्लेष्मविपर्ययकृतं ज्वरातीसारादि । मानसं प्रियवियोगाप्रियसंयोगादि । आधिभौतिकं चतुर्विधभूतग्रामनिमित्तं मनुष्यपशुमृगपक्षि-सरीसृपदंशमशकयूकामत्कुणमत्स्यमकरग्राहस्थावरेभ्यो जरायुजाण्डज स्वेदजोद्भिजेभ्यः सकाशादुपजायते । आधिदैविकं देवानामिदं दैवं, दिवः प्रभवतीति वा दैवं तदधिकृत्य

यदुपजायते शीतोष्णवातवर्षाशनिपातादिकम् । एवं यथा दुःखत्रयाभिघाताजिज्ञासा कार्या व ? तदभिघातके तौ । तस्य दुःखत्रयस्य अभिघातको योसौ हेतुस्तत्रेति । दृष्टे . सापार्था चेत्, दृष्टे हेतौ दुःखत्रयाभिघातके सा जिज्ञासाऽपार्था चेद् यदि । तत्राध्यात्मिकस्य द्विविधस्यापि आयुर्वेदशास्त्र क्रियया प्रियसमागमा प्रियपरिहारकइतिक्तकषायक्काथादिभिर्दृष्ट एव आध्यात्मिकोपायः आधिभौतिकस्य रक्षादिनाऽभिघातो दृष्टः । दृष्टे साऽपार्था चेदेवं मन्यसे, न, एकान्तात्यन्ततोऽभावात् । यत एकान्ततोऽवश्यमत्यततो नित्यं दृष्टेन हेतुनाऽभिघातो न भवति, तस्मादन्यत्र एकान्तात्यन्ताभिघातके हेतौ जिज्ञासा विविदिषा कार्येति ॥ १ ॥

**दृष्टवदानुविकः सह्यविशुद्धिक्षयातिशययुक्तः ।**

यदि दृष्टादन्यत्र जिज्ञासा कार्या, ततोऽपि नैव । यत आनुश्रविको हेतुः दुःखत्रयाभिघातकः । अनुश्रूयत इत्यनुश्रवस्तत्र भवः आनुश्रविकः । स च आगमात् सिद्धः । यथा- " अपाम सोमममृता अभूमागन्म ज्योतिरविदाम देवान् ।

किं नूनमस्मान तृणवदरातिः किमु धूर्तिरमृतमर्त्यस्य ॥"

कदाचिदिन्द्रादीनां देवानां कल्प आसीत् । कथं वयममृता अभूमेति विचार्य । यस्माद्वयमपाम सोमं पीतवन्तः सोमं तस्मादमृता अभूम अमरा भूतवन्त इत्यर्थः । किञ्च, अगन्म ज्योतिः, गतवन्तः लब्धवन्तः ज्योतिः स्वर्गमिति । अविदाम देवान् दिव्यान् विदितवन्तः । एवं च किं नूनमस्मान् तृणवदरातिः, नूनं निश्चितं किमरातिः शत्रुरस्मान् तृणवत् कर्तेति । किमु धूर्तिरमृतमर्त्यस्य, धूर्तिजरा हिंसा वा किं करिष्यति अमृतमर्त्यस्य । अन्यच्च वेदे श्रूयते आत्यन्तिकं फलं पशुवधेन । “सर्वाल्लोकान् जयति मृत्युं तरति पाप्मानं तरति ब्रह्महत्यां तरति यो योऽश्वमेधेन यजते " इति । ऐका-मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त । प्रभवतीति वा दैवं तदधिकृत्य यदुपजायते शीतोष्णवातवर्षाशनिपातादिकम् । एवं यथा दुःखत्रयाभिघाताजिज्ञासा कार्या व ? तदभिघातके तौ । तस्य दुःखत्रयस्य अभिघातको योसौ हेतुस्तत्रेति । दृष्टे . सापार्था चेत्, दृष्टे हेतौ दुःखत्रयाभिघातके सा

जिज्ञासाऽपार्था चेद् यदि । तत्राध्यात्मिकस्य द्विविधस्यापि आयुर्वेदशास्त्र क्रियया प्रियसमागमा प्रियपरिहारकइतिक्तकषायक्काथादिभिर्दृष्ट एव आध्यात्मिकोपायः आधिभौतिकस्य रक्षादिनाऽभिघातो दृष्टः । दृष्टे साऽपार्था चेदेवं मन्यसे, न, एकान्तात्यन्ततोऽभावात् । यत एकान्ततोऽवश्यमत्यततो नित्यं दृष्टेन हेतुनाऽभिघातो न भवति, तस्मादन्यत्र एकान्तात्यन्ताभिघातके हेतौ जिज्ञासा विविदिषा कार्येति ॥ १ ॥

**षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः ॥ ३ ॥**

अथ व्यक्ताव्यक्तज्ञानां को विशेष इत्युच्यते - मूलप्रकृतिः प्रधानम् । प्रकृतिविकृतिसप्तकस्य मूलभूतत्वात्, मूलं च सा प्रकृतिश्च मूलप्रकृतिः । अविकृतिः अन्यस्मान्नोत्पद्यते, तेन प्रकृतिः कस्यचि द्विकारो न भवति । महदाद्याः प्रकृतिविकृतयः सप्त । महान् बुद्धिः । बुद्ध्याद्याः सप्त, बुद्धिः १ अहङ्कारः १ पञ्च तन्मात्राणि ५ एताः सप्त प्रकृतिविकृतयः । तद् यथा । प्रधानाद् बुद्धिरुत्पद्यते तेन विकृतिः प्रधानस्य विकार इति । सैवाहङ्कारमुत्पादयति, अतः प्रकृतिः । अहङ्कारोऽपि बुद्धेरुत्पद्यत इति विकृतिः, स च पञ्च तन्मात्राण्युत्पादयतीति प्रकृतिः । तत्र शब्दतन्मात्रमहङ्कारादुत्पद्यत इति विकृतिस्तस्मादाकाशमुत्पद्यत इति प्रकृतिः । तथा स्पर्शतन्मात्रमहङ्कारादुत्पद्यत इति विकृतिस्तदेवं वायुमुत्पादयतीति प्रकृतिः । गन्धतन्मात्र , महङ्कारादुत्पद्यत इति विकृतिस्तदेवं पृथिवीमुत्पादयतीति प्रकृतिः । रूपतन्मात्रमहङ्कारादुत्पद्यत इति विकृतिस्तदेवं तेज उत्पादयतीति प्रकृतिः । रसतन्मात्रमहङ्कारादुत्पद्यत इति विकृतिस्तदेवमप उत्पादयतीति प्रकृतिः । एवं महदाद्याः सप्त प्रकृतयो विकृतयश्च । षोडशकस्तु विकारः, पञ्च बुद्धीन्द्रियाणि पञ्च कर्मेन्द्रियाणि एकादशं मनः पञ्च महाभूतानि एष षोड़शको गणो विकृतिरेव । विकारो विकृतिः । न प्रकृतिर्न विकृतिः पुरुषः ॥ ३ ॥

**दृष्टमनुमानमातवचनं च सर्वप्रमाणसिद्धत्वात् ।**

**त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणाद्धि ॥ ४ ॥**

एवमेषां व्यक्ताव्यक्तज्ञानां त्रयाणां पदार्थानां कैः क्रियद्भिः प्रमाणैः केन कस्य वा प्रमाणेन सिद्धिर्भवति । इह लोके प्रमेयवस्तु प्रमाणेन साध्यते । यथा प्रस्थादिभिर्ब्रहयस्तुलया चन्दनादि । तस्मात्

प्रमाणमभिधेयम् । दृष्टमिति - दृष्टं यथा श्रोत्रं त्वक् चक्षुर्जिह्वा घ्राणमिति पञ्च बुद्धीन्द्रियाणि, शब्द् स्पर्शरूपरसगन्धा एषां पञ्चानां पञ्चैव विषया यथासंख्यम् । शब्दं श्रोत्रं गृह्णाति, त्वक् स्पर्शं, चक्षू रूपं, जिह्वा रसं, घ्राणं गन्धमिति । एतद् दृष्टमित्युच्यते प्रमाणम् । प्रत्यक्षेणानुमानेन वायोऽर्थो न गृह्यते स आप्तवचनाद् ग्राह्यः । यथेन्द्रो देवराजः उत्तराः कुरवः, स्वर्गेऽप्सरसः, इत्यादि । प्रत्यक्षानुमानाग्राह्यमप्यामवचनाद् गृह्यते । अपिचोक्तम्-

"आगमो ह्याप्तवचनमाप्तं दोषक्षयाद्विदुः ।
क्षीणदोषोऽनृतं वाक्यं न ब्रूयाद्धेत्वसम्भवात् ॥ ॥
स्वकर्मण्यभियुक्तो यः सङ्गद्वेषविवर्जितः ।
पूजितस्तद्विधैर्नित्यमातो ज्ञेयः स तादृशः ॥

"एतेषु प्रमाणेषु सर्वप्रमाणानि सिद्धानि भवन्ति । षट् प्रमाणानि जैमिनिः । अथ कानि तानि प्रमाणानि ? - " अर्थापत्तिः सम्भवः अभावः प्रतिभा ऐतिह्यम् उपमानं च" इति षट् प्रमाणानि । तत्रार्थापत्तिद्विविधा, दृष्टा श्रुता च । तत्र दृष्टा - एकस्मिन् पक्षे आत्मभावो गृहीतश्चेदन्यस्मिन्नप्यात्मभावो गृह्यत एव । श्रुता यथादिवा देवदत्तो न भुङ्क्ते, अथ च पीनो दृश्यते, अतोऽवगम्यते रात्रौ भुङ्क्त इति । संम्भवो यथा -- प्रस्थ इत्युक्ते चत्वारः कुडवाः सम्भाव्यन्ते । अभावो नाम प्रागितरेतरात्यन्तसर्वाभावलक्षणः । प्रागभावो यथा - देवदत्तः कौमारयौवनादिषु । इतरेतराभावः -पटे घटाभावः । अत्यन्ताभावः -- खरविषाणवन्ध्यासुतखपुष्पवदिति । सर्वाभावः -- प्रध्वंसाभावो दग्धपटवदिति । यथा शुष्कधान्यदर्शनाद् वृष्टेरभावोऽवगम्यते । एवमभावोऽनेकधा । प्रतिभा यथा - 'दक्षिणेन च विन्ध्यस्य सह्यस्य च यदुत्तरम् । पृथिव्यामासमुद्रायां स प्रदेशो मनोरमः । " एवमुक्ते तस्मिन् प्रदेशे शोभनाः गुणाः सन्तीति प्रतिभोत्पद्यते, प्रतिभा च जानतां ज्ञानमिति । ऐतिह्यं यथा -- ब्रवीति लोको यथात्र वटे यक्षिणी प्रतिवसतीति एव ऐतिह्यम् । उपमानं यथा - गौरिव गवयः, समुद्र इव तड़ागः । एतानि षट् प्रमाणानि त्रिषु दृष्टादिष्वन्तर्भूतानि । तत्रानुमाने तावदर्थापत्तिरन्तर्भूता । सम्भवाभावप्रतिभैतिह्योपमाश्चाप्तवचने । तस्मात् त्रिष्वेव

सर्वप्रमाणसिद्धत्वात् त्रिविधं प्रमाणमिष्टं, तदाह-- तेन त्रिविधेन प्रमाणेन प्रमाणसिद्धिर्भवतीति वाक्यशेषः । प्रमेयसिद्धिः प्रमाणाद्धि । प्रमेयं प्रधानं बुद्धिरहङ्कारः पञ्चतन्मात्राणि एकादशेन्द्रियाणि पञ्च महाभूतानि पुरुष इति । एतानि पञ्चविंशतितत्त्वानि व्यक्ताव्यक्तज्ञा इत्युच्यन्ते । तत्र किञ्चित् प्रत्यक्षेण साध्यं किञ्चिदनुमानेन किञ्चिदागमेनेति त्रिविधं प्रमाणमुक्तम् ॥ ४ ॥

**प्रतिविषयाध्यवसायो दृष्टं त्रिविधमनुमानमाख्यातम् ।**

**तल्लिङ्गलिङ्गिपूर्वकमाप्तश्रुतिराप्तवचनं तु ॥ ५ ॥**

तस्य किं लक्षणमेतदाह - प्रतिविषयेषु श्रोत्रादीनां शब्दादिविषयेषु अध्यवसायो दृष्टं, प्रत्यक्षमित्यर्थः । त्रिविधमनुमानमाख्यातं, पूर्ववत् शेषवत् सामान्यतोदृष्टं चेति । पूर्वमस्यास्तीति पूर्ववद्, यथा मेघोन्नत्या वृष्टिं साधयति पूर्वदृष्टत्वात् । शेषवद् यथा - समुद्रादेकं जलपलं लवणमासाद्य शेषस्याप्यस्ति लवणभाव इति सामान्यतोदृष्टम् - देशान्तराद्देशान्तरं प्राप्तं दृष्टम् गतिमच्चन्द्रतारकं चैत्रवत् । यथा चैत्रनामानं देशान्तराद्देशान्तरं प्राप्तमवलोक्य गतिमानयमिति तद्वच्चन्द्रतारकमिति । तथा पुष्पिताम्रदर्शनादन्यत्र पुष्पिता आम्रा इति सामान्यतोदृष्टेन साधयति । एतत्सामान्यतोदृष्टम् । किञ्च तल्लिङ्गलिङ्गिपूर्वकमिति, तदनुमानं लिङ्गपूर्वकं यत्र लिङ्गेन लिङ्गी अनुमीयते, यथा-दण्डेन यतिः । लिङ्गिपूर्वकं च यत्र लिङ्गिना लिङ्गमनुमीयते, यथा-- दृष्ट्वा यतिमस्येदं त्रिदण्डमिति । आप्तश्रुतिराप्तवचनं च ! आप्ता आचार्या ब्रह्मादयः । श्रुतिर्वेदः । आप्ताश्च श्रुतिश्च आप्तश्रुतिः तदुक्तमाप्तवचनमिति । एवं त्रिविधं प्रमाणमुक्तम् ॥ ५ ॥

**सामान्यतस्तु दृष्टादतीन्द्रियाणां प्रतीतिरनुमानात् ।**

**तस्मादपि चासिद्धं परोक्षमाप्तागमात् सिद्धम् ॥ ६ ॥**

तत्र केन प्रमाणेन किं साध्यमुच्यते-- सामान्यतोदृष्टादनुमानादतीन्द्रियाणामिन्द्रियाण्यतीत्य वर्तमानानां सिद्धिः । प्रधानपुरुषावतीन्द्रियौ सामान्यतोदृष्टेनानुमानेन साध्येते यस्मान्महदादिलिङ्गं त्रिगुणम् । यस्येदं त्रिगुणं कार्यं तत् प्रधानमिति । यतश्चाचेतनं चेतनमिवाभाति अतोऽन्योधिष्ठाता पुरुष

इति । व्यक्तं प्रत्यक्षसाध्यम् । तस्मादपि चासिद्धं परोक्षमाप्तागमात् सिद्धम् -- यथेन्द्रो देवराजः, उत्तराः कुरवः, स्वर्गेऽप्सरस इति परोक्षमाप्तवचनात् सिद्धम् ॥ ६ ॥

**अतिदूरात्सामीप्यादिन्द्रियघातान्मनोऽनवस्थानात् ।**

**सौक्ष्म्याद्यवधानादभिभवात्समानाभिहाराच्च ॥ ७ ॥**

अत्र कश्चिदाह प्रधानं पुरुषो वा नोपलभ्यते यच्च नोपलभ्यते लोके तन्नास्ति तस्मात् तावपि न स्तः । यथा द्वितीयं शिरस्तृतीयो बाहुरिति । तदुच्यते । अत्र सतामप्यर्थानामष्टधोपलब्धिर्न भवति । तद् यथा - इह सतामप्यर्थानामतिदूरादनुपलब्धिर्दृष्टा यथा -- देशान्तर स्थानां चैत्रमैत्रविष्णुमित्राणाम् । सामीप्याद् यथा--चक्षुषोऽञ्जनानुपलब्धिः । इन्द्रियाभिघाताद् यथा बधिरान्धयोः शब्दरूपानुपलब्धिः । मनोऽनवस्थानाद् यथा -- व्यग्रचित्तः सम्यक्कथितमपि नावधारयति । सौक्ष्म्याद् यथा -- धूमोमजलनीहारपरमाणवो गगनगता नोपल भ्यन्ते । व्यवधानाद् यथा -- कुडयेन पिहितं वस्तु नोपलभ्यते अभिभवाद् यथा -- सूर्यतेजसाभिभूताः ग्रहनक्षत्रतारकादयः नोपलभ्यन्ते । समानाभिहारा यथा -- मुद्गराशौ मुद्गः क्षिप्तः कुवलयामलकमध्ये कुवलयामलके क्षिप्ते, कपोतमध्ये कपोतो नोपलभ्यते समानद्रव्यमध्याहृतत्वात्। एवमष्टधानुपलब्धिः सतामर्थानामिह दृष्टा ॥ ७ ॥

**सौक्ष्म्यात्तदनुपलब्धिर्नाभावात्कार्यतस्तदुपलब्धिः ।**

**महदादि तच्च कार्यं प्रकृतिविरूपं सरूपं च ॥ ८**

एवं चास्ति किमभ्युपगम्यते प्रधानपुरुषयोरप्येतयोर्वानुपलब्धिः केन हेतुना केन चोपलब्धिस्तदुच्यते--सौक्ष्म्यात् तदनुपलब्धिः, प्रधानस्येत्यर्थः । प्रधानं सौक्ष्म्यान्नोपलभ्यते यथाकाशे धूमोष्मजलनीहारपरमाणवः सन्तोऽपि नोपलभ्यन्ते । कथं तर्हि तदुपलब्धिः ? कार्यतस्तदुपलब्धिः । कार्यं दृष्ट्वा कारणमनुमीयते । अस्ति प्रधानं कारणं यस्येदं कार्यम् । बुद्धिरहङ्कारः पञ्चतन्मात्राणि एकादशेन्द्रियाणि पञ्चमहाभूतानि एव तत्कार्यम् । तच्च कार्यं, प्रकृतिविरूपम् । प्रकृतिः प्रधानं तस्य विरूपं

प्रकृतेरसदृशम् । सरूपं च समानरूपं च, यथा लोकेऽपि पितुस्तुल्य इव पुत्रो भवत्यतुल्यश्च । येन हेतुना तुल्यमतुल्यं तदुपरिष्टाद्वक्ष्यामः ॥ ८ ॥

**असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात् ।**

**शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम् ॥ ९ ॥**

'यदिदं महदादिकार्यं तत् किं प्रधाने सदुताहोस्विदसत् आचार्यविप्रत्तिपत्तेरयं संशयः । यतोऽत्र सांख्यदर्शने सत्कार्यं बौद्धादीनामसत्कार्यम् । यदि सदसन्न भवत्यथासत्सन्न भवतीति विप्रतिषेधस्तत्राह- असदकरणात् । न सदसदसतोऽकरणं तस्मात्सत्कार्यम् । इह लोकेऽसतु करणं नास्ति यथा सिकताभ्यस्तैलोत्पत्तिः, तस्मात् सतःकरणादस्ति प्रागुत्पत्तेः प्रधाने व्यक्तम् । अतः सत्कार्यम् । किंचान्यदुपादानग्रहणात्, उपादानं कारणं तस्य ग्रहणात्, इह लोके यो येनार्थी स तदुपादानग्रहणं करोति दध्यर्थी क्षीरस्य न तु जलस्य तस्मात् सत्कार्यम् । इतश्च सर्वसम्भवाभावात्, सर्वस्य सर्वत्र सम्भवो नास्ति, यथा सुवर्णस्य रजतादौ तृणपांशुसिकतासु तस्मात् सर्वसम्भवाभावात् सत्कार्यम् । इतश्च शक्तस्य शक्यकरणात्, इह कुलालः शक्तो मृद्दण्डचक्रचीवररज्जुनीरादिकरणोपकरणं वा शक्यमेव घटं मृत्पिण्डादुत्पादयति, तस्मात् सत्कार्यम् । इतश्च कारणभावाच्च सत्कार्यम् । कारणं यल्लक्षणं तल्लक्षणमेव कार्यमपि, यथा यवेभ्यो यवाः, व्रीहिभ्यो व्रीहयः यदाऽसत्कार्यं स्यात् ततः कोद्रवेभ्यः शालयः स्युर्न च सन्तीति, तस्मात् सत्कार्यम् । एवं पञ्चभिर्हेतुभिः प्रधाने महदादिलिङ्गमस्ति, तस्मात् सत उत्पत्तिनसत इति ॥ ९ ॥

**हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम् ।**

**सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम् ॥ १० ॥**

प्रकृतिविरूपं सरूपं च यदुक्तं तत् कथमित्युच्यते-- व्यक्तं महदादिकार्यं हेतुमदिति । हेतुरस्यास्ति हेतुमत् । उपादानं हेतुः कारणं निमित्तमिति पर्यायाः । व्यक्तस्य प्रधानं हेतुरस्ति, अतो हेतुमद् व्यक्तं भूतपर्यन्तम् । हेतुमद् बुद्धितत्त्वं प्रधानेन हेतुमानहङ्कारो बुद्ध्या, पञ्चतन्मात्राणि एकादशेन्द्रियाणि

हेतुमन्त्यहङ्कारेण । आकाशं शब्दतन्मात्रेण हेतुमत् । वायुः स्पर्शतन्मात्रेण हेतुमान् । तेजो रूपतन्मात्रेण हेतुमत् । आपो रसतन्मात्रेण हेतुमत्यः । पृथिवी गन्धतन्मात्रेण हेतुमती । एवं भूतपर्यन्तं व्यक्तं हेतुमत् । किंचान्यत्, अनित्यं यस्मादन्यस्मादुत्पद्यते यथा -- मृत्पिण्डादुत्पद्यते घटः स चानित्यः किंचाव्यापि, असर्वगमित्यर्थः, यथा प्रधानपुरुषौ सर्वगत नैवं व्यक्तम् । किंचान्यत्, सक्रियं, संसारकाले संसरति, त्रयोदश. विधेन करणेन संयुक्तं सूक्ष्मं शरीरमाश्रित्य संसरति, तस्मात् सक्रियम् किंचान्यत्, अनेकं, बुद्धिरहङ्कारः पञ्चतन्मात्राण्येकादशेन्द्रियाणि पञ्चमहाभूतानि चेति । किंचान्यत्, आश्रितम्, स्वकारणमाश्रयते, प्रधानाश्रिता बुद्धिः, बुद्धिमाश्रितोऽहङ्कारः, अहङ्काराश्रिता न्येकादशेन्द्रियाणि पञ्चतन्मात्राणि पञ्चतन्मात्राश्रितानि पञ्चमहाभूतानीति । किञ्च लिङ्गं लययुक्तं, लयकाले पञ्चमहाभूतानि तन्मात्रेषु लीयन्ते तान्येकादशेन्द्रियैः सहाहङ्कारे स च बुद्धौ सा च प्रधाने लयं यातीति । तथा सावयवम्, अवयवाः शब्दस्पर्शरसरूपगन्धाः, तैः सह । किञ्च परतन्त्रं, नात्मनः प्रभवति, यथा प्रधानतन्त्रा बुद्धि, बुद्धितन्त्रोऽहङ्कारः, अहङ्कारतन्त्राणि तन्मात्राणीन्द्रियाणि च, तन्मात्रतन्त्राणि पञ्च महाभूतानि च । एवं परतन्त्रं परायत्तं व्याख्यातं व्यक्तम् । अथोऽव्यक्तं व्याख्यास्यामः। विपरीतमव्यक्तम् । एतैरेव गुणैर्यथोक्तैर्विपरीतमव्यक्तं, हेतुमद् व्यक्तमुक्तम् । न हि प्रधानात् परं किञ्चिदस्ति यतः प्रधानस्यानुत्पत्तिः, तस्मादहेतुमदव्यक्तम् । तथानित्यं च व्यक्तं नित्यमव्यक्तमनुत्पाद्यत्वात् न हि भूतानीव कुतश्चिदुत्पद्यत इत्यव्यक्तं प्रधानम् । किंचाव्यापि व्यक्तं, व्यापि प्रधानं सर्वगतत्वात् । सक्रियं व्यक्तमक्रियमव्यक्तं सर्वगतत्वादेव । तथानेकं व्यक्तमेकं प्रधानं कारणत्वात्, त्रयाणां लोकानां प्रधानमेकं कारणं, तस्मादेकं प्रधानम् । तथाश्रितं व्यक्तमनाश्रितमव्यक्तमकार्यत्वात्, न हि प्रधानात् किञ्चिदस्ति परं यस्य प्रधानं कार्यं स्यात् । तथा व्यक्तं लिङ्गम्, अलिङ्गमव्यक्तं नित्यत्वात्, महदादिलिङ्गं प्रल- , > ८ सांख्यकारिका । सांख्यकारिका । । यकाले परस्परं प्रलीयते नवं प्रधानं, तस्मादलिङ्गं प्रधानम् । तथा सावयवं व्यक्तं, निरवयवमव्यक्तं, न हि शब्दस्पर्शरसरूपगन्धाः प्रधाने सन्ति । तथा परतन्त्रं व्यक्तं, स्वतन्त्रमव्यक्तं प्रभवत्यात्मनः ।।१० ।।

**त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि**

**व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान् ॥ ११ ॥**

एवं व्यक्ताव्यक्तयोर्वैधर्म्यमुक्तं साधर्म्यमुच्यते यदुक्तं 'सरूपं च'त्रिगुणं व्यक्तं सत्त्वरजस्तमांसि त्रयो गुणा यस्येति । अविवेकि व्यक्तं न विवेकोऽस्यास्तीति । इदं व्यक्तमिमे गुणा इति न विवेकं कर्तुं याति, अयं गौरयमश्व इति यथा, ये गुणास्तद्व्यक्तं यद्व्यक्तं ते च गुणा इति । तथा विषयो व्यक्तं, भोग्यमित्यर्थः सर्वपुरुषाणां विषयभूतत्वात् । तथा सामान्यं व्यक्तं, मूल्यदासीवत् सर्वसाधारणत्वात् । अचेतनं व्यक्तं, सुखदुःखमोहान् न चेतयतीत्यर्थः । तथा प्रसवधर्मि व्यक्तं, तद् यथा-बुद्धेरहङ्कारः प्रसूयते तस्मात् पञ्चतन्मात्राणि एकादशेन्द्रियाणि च प्रसूयन्ते तन्मात्रेभ्यः पञ्चमहाभूतानि । एवमेते व्यक्तधर्माः प्रसवधर्मान्ता उक्ताः, एवमेभिरव्यक्तं सरूपं, यथा व्यक्तं तथा प्रधानमिति । तत्र त्रिगुणं व्यक्तमव्यक्तमपि त्रिगुणं यस्यैतन्महदादिकार्यं त्रिगुणम् । इह यदात्मकं कारणं तदात्मकं कार्यमिति, यथा कृष्णतन्तुकृतः कृष्ण एव पटो भवति । तथाऽविवेकि व्यक्तं, प्रधानमपि गुणैर्न भिद्यते, अन्ये गुणाः अन्यत् प्रधानमेवं विवेक्तुं न याति तदविवेकि प्रधानम् । तथा विषयो व्यक्तं प्रधानमपि सर्वपुरुषविषयभूतत्वात् विषय इति । तथा सामान्यं व्यक्तं प्रधानमपि, सर्वसाधारणत्वात् । तथाऽचेतनं व्यक्तं प्रधानमपि सुखदुःखमोहान् न चेतयतीति कथमनुमीयते इह ह्यचेतनान्मृत्पिण्डादचेतनो घट उत्पद्यते । तथा प्रसवधर्मि व्यक्तं प्रधानमपि प्रसवधर्मि, यतः प्रधानाद् बुद्धिरुत्पद्यते । एवं प्रधानमपि व्याख्यातम् । इदानीं तद्विपरीतस्तथा च पुमानित्येतद् व्याख्यायते । तद्विपरीतस्ताभ्यां व्यक्ताव्यक्ताभ्यां विपरीतः पुमान् । तद् यथा - त्रिगुणं व्यक्तमव्यक्तं च, अगुणः पुरुषः । अविवेकि व्यक्तमव्यक्तं च, विवेकी पुरुषः । तथा प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः । विषयो व्यक्तमव्यक्तं च, अविषयः पुरुषः । तथा सामान्यं व्यक्तमव्यक्तं च, असामान्यः पुरुषः । अचेतनं व्यक्तमव्यक्तं च, चेतनः पुरुषः । सुखदुःखमोहांश्चेतयति सञ्जानीते तस्माच्चेतनः पुरुष इति । प्रसवधर्मि व्यक्तं प्रधानं च, अप्रसवधर्मी पुरुषः, न हि किञ्चित् पुरुषात् प्रसूयते । तस्मादुक्तं तद्विपरीतः पुमानिति । तदुक्तं ' तथा च पुमान्' इति ।

तत्पूर्वस्यामार्यायां प्रधानमहेतुमद् यथा व्याख्यातं तथा च पुमान्, तद् यथा हेतुमदनित्यमित्यादि व्यक्तं तद्विपरीतमव्यक्तं, तत्र हेतुमद् व्यक्तमहेतुमत् प्रधानं, तथा च पुमानहेतुमान्, अनुत्पाद्यत्वात् । अनित्यं व्यक्तं नित्यं प्रधानं, तथा च नित्यः पुमान् । अव्यापि व्यक्तं व्यापि प्रधानम्, तथा च व्यापी पुमान्, सर्वगतत्वात् । सक्रियं व्यक्तमक्रियं प्रधानम्, तथा च पुमानक्रियः, सर्वगतत्वादेव । अनेकं व्यक्तमेकमव्यक्तं, तथा च पुमानप्येकः । आश्रितं व्यक्तमनाश्रितमव्यक्तं, तथा च पुमाननाश्रितः । लिङ्गं व्यक्तमलिङ्गं प्रधानं, तथा च पुमानप्यलिङ्गः । न क्वचिल्लीयत इति । सावयवं व्यक्तं निरवयवमव्यक्तं तथा च पुमान् निरवयवः । न हि पुरुषे शब्दादयोऽवयवाः सन्ति । किञ्च परतन्त्रं व्यक्तं स्वतन्त्रमव्यक्तं तथा च पुमानपि स्वतन्त्रः, आत्मनः प्रभवतीत्यर्थः ॥ ११ ॥

**प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः ।**

**अन्योऽन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः ॥ १२**

एवमेतदव्यक्तपुरुषयोः साधं व्याख्यातं पूर्वस्यामार्यायाम् । व्यक्तप्रधानयोः साधर्म्यं पुरुषस्य वैधर्म्यं च त्रिगुणमविवेकीत्यादि प्रकृत्यार्यायां व्याख्यातम् । तत्र यदुक्तं त्रिगुणमिति व्यक्तमव्यक्तं च तत् के ते गुणा इति तत्स्वरूपप्रतिपादनायेदमाह - प्रीत्यात्मका अप्रीत्यात्मका विषादात्मकाश्च, गुणाः सत्त्वरजस्तमांसीत्यर्थः । तत्र प्रीत्यात्मकं सत्त्वं, प्रीतिः सुखं तदात्मकमिति । अप्रीत्यात्मकं रजः । अप्रीतिर्दुःखम् । विषादात्मकं तमः । विषादो मोहः । तथा प्रकाशप्रवृत्तिनियमार्थाः । अर्थशब्दः सामर्थ्यवाची, प्रकाशार्थं सत्त्वं, प्रकाशसमर्थमित्यर्थः । प्रवृत्त्यर्थं रजः । नियमार्थ तमः स्थितौ समर्थमित्यर्थः । प्रकाशक्रियास्थितिशीला गुणा इति । तथाऽन्योऽन्याभिभवाश्रयजननमिथुनवृत्तयश्च । अन्योऽन्याभिभवाः अन्योऽन्याश्रयाः अन्योऽन्यजननाः अन्योऽन्यमिथुनाः अन्योऽन्यवृत्तयश्च ते तथोक्ताःअन्योऽन्याभिभवा इति, अन्योऽन्यं परस्परमभिभवन्तीति, प्रीत्यप्रीत्यादिभिर्धर्मैराविर्भवन्ति, यथा यदा सत्त्वमुत्कटं भवति तदा रजस्तमसी अभिभूय स्वगुणेन प्रीतिप्रकाशात्मकेनावतिष्ठते यदा रजस्तदा सत्त्वतमसी अप्रीतिप्रवृत्त्यात्मना धर्मेण यदा तमस्तदा सत्त्वरजसी विषादस्थित्यात्मकेन इति ।

तथाऽन्योन्याश्रयाश्च द्यणुकवत्गुणाः । अन्योऽन्यजननाः, यथा मृत्पिण्डो घटं जनयति । तथाऽन्योऽन्यमिथुनाश्च यथा स्त्रीपुंसौ अन्योऽन्यमिथुनौ तथा गुणाः । उक्तं च-

अन्योऽन्यमिथुनाः सर्वे सर्वे सर्वत्रगामिनः । रजसो मिथुनं सत्त्वं सत्त्वस्य मिथुनं रजः॥

तमसश्चापि मिथुने ते सत्त्वरजसी उभे । उभयोः सत्त्वरजसोर्मिथुनं तम उच्यते ।

नैषामादिः सम्प्रयोगो वियोगो वोपलभ्यते ॥ "

परस्परसहाया इत्यर्थः । अन्योऽन्यवृत्तयश्च परस्परं वर्तन्ते "" **गुणाः गुणेषु वर्तन्त**" इति वचनात् । यथा सुरूपा सुशीला स्त्री सर्वसुखहेतुः सपत्नीनां सैव दुःखहेतुः, सैव रागिणां मोहं जनयति, एवं सत्त्वं रजस्तमसोर्वृत्तिहेतुः, यथा राजा सदोद्युक्तः प्रजापालने दुष्टनिग्रहे शिष्टानां सुखमुत्पादयति, दुष्टानां दुःखं मोहं च, एवं रजः सत्त्वतमसोवृत्तिं जनयति । तथा तमः स्वरूपेणावरणात्मकेन सत्त्वरजसोर्वृत्तिं जनयति, यथा मेघाः खमावृत्य जगतः सुखमुत्पादयन्ति ते वृष्ट्या कर्षकाणां कर्षणोद्योगं जनयन्ति विरहिणां मोहम्, एवमन्योऽन्यवृत्तयो गुणाः ॥ १२ ॥

**सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलश्च रजः ।**

**गुरु वरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः ॥ १३ ॥**

अविवेक्यादिः सिद्धस्त्रैगुण्यात्तद्विपर्ययाभावात् । कारणगुणात्मकत्वात् कार्यस्याव्यक्तमपि सिद्धम् ॥ १४॥ किञ्चान्यत् - सत्त्वं लघु प्रकाशकं च यदा सत्त्वमुत्कटं भवति तदा लघून्यङ्गानि बुद्धिप्रकाशश्च प्रसन्नतेन्द्रियाणां भवति । उपष्टम्भकं चलं च रजः, उपष्टनातीत्युपष्टम्भक मुद्द्योतकं, यथा वृषो वृषदर्शने उत्कटमुपष्टम्भं करोति, एवं रजोवृत्तिः, तथा रजश्च चलं दृष्टं, रजोवृत्तिश्चलचित्तो भवति । गुरुवरणकमेव तमः, यदा तम उत्कटं भवति तदा गुरूण्यङ्गाभ्यावृतानीन्द्रियाणि भवन्ति स्वार्थां समर्थानि । अत्राह यदि गुणाः परस्परं विरुद्धाः स्वमतेनैव कमर्थं निष्पादयन्ति, तर्हि कथं प्रदीपवच्चार्थतो वृत्तिः, प्रदीपेन तुल्यं प्रदीपवत्, अर्थतः साधना वृत्तिरिष्टा, यथा प्रदीपः परस्परविरुद्धतैलाग्निवर्तिसंयोगादर्शप्रका शान् जनयति एवं सत्त्वरजस्तमांसि परस्परं विरुद्धान्यर्थं निष्पादयन्ति ॥ १३ ॥

'अन्तरप्रश्नो भवति त्रिगुणमविवेकिविषय इत्यादिना प्रधानं व्यक्तं च व्याख्यातं, तत्र प्रधानमुपलभ्यमानं महदादि च त्रिगुणमविवेक्यादीति च कथमवगम्यते ? तत्राह - योऽयमविवेक्यादिर्गुणः स त्रैगुयान्महदादौ व्यक्तेनायं सिध्यति । अत्रोच्यते तद्विपर्ययाभावात्, तस्य विपर्ययस्तद्विपर्ययस्तस्याभावस्तद्विपर्ययाभावः, तस्मात् सिद्धमव्यक्तम् । यथा यत्रैव तन्तवस्तत्रैव पटः, अन्ये तन्तवोऽन्यः पटो न, कुतः ? तद्विपर्ययाभावात् । एवं व्यक्ताव्यक्तसम्पन्नो भवति, दूरं प्रधानमासन्नं व्यक्तं, यो व्यक्तं पश्यति स प्रधानमपि पश्यति, तद्विपर्ययाभावात् । इतश्चाव्यक्तं सिद्धं कारणगुणात्मकत्वात् कार्यस्य । लोके यदात्मकं कारणं तदात्मकं कार्यमपि, यथा कृष्णेभ्यस्तन्तुभ्यः कृष्ण एव पटो भवति । एवं महदादिलिङ्गमविवेकिविषयः सामान्यमचेतनं प्रसवधर्मि, यदात्मकं लिङ्गं तदात्मकमव्यक्तमपि सिद्धम् । १४। १३ १२ ।

**भेदानां परिमाणात्समन्वयाच्छक्तितः प्रवृत्तेश्च ।**

**कारणकार्यविभागादविभागाद्वैश्वरूपस्य ॥ १५ ॥**

त्रैगुण्यादविवेक्यादिर्व्यक्ते सिद्धस्तद्विपर्ययाभावात् एवं कारणगुणात्मकत्वात् कार्यस्याव्यक्तमपि सिद्धमित्येतन्मिथ्या, लोके यन्नोपलभ्यते तन्नास्ति, इति न वाच्यम्, सतोऽपि पाषाणगन्धादेरनुपलम्भात्, एवं प्रधानमप्यस्ति किन्तु नोपलभ्यते तदाह-कारणमस्त्यव्यक्तमिति क्रियाकारकसम्बन्धः । भेदानां परिमाणात्, लोके यत्र कर्तास्ति तस्य परिमाणं दृष्टं यथा कुलालः परिमितैर्मृत्पिण्डैः परिमितानेव घटान् करोति, एवं महदपि महदादिलिङ्गं परिमितं भेदतः, प्रधानकार्यमेका बुद्धिरेकोऽहङ्कारः पञ्चतन्मात्राणि एकादशेन्द्रियाणि पञ्चमहाभूतानीत्येवं भेदानां परिमाणादस्ति प्रधानं कारणं यद् व्यक्तं परिमितमुत्पादयति । यदि प्रधानं न स्यात्, तदा निष्परिमाणमिदं व्यक्तमपि न स्यात्, परिमाणाच्च भेदानामस्ति प्रधानं यस्माद् व्यक्तमुत्पन्नम् । तथा समन्वयात्, इह लोके प्रसिद्धिर्दृष्टा यथा व्रतधारिणं बटुं दृष्ट्वा समन्वयति नूनमस्य पितरौ ब्राह्मणाविति, एवमिदं त्रिगुणं महदादिलिङ्गं दृष्ट्वा साधयामोऽस्य यत् कारणं भविष्यतीति, अतः समन्वयादस्ति प्रधानम् । तथाशक्तितः प्रवृत्तेश्च, इह यो यस्मिन् शक्तः स तस्मिन्नेवार्थे प्रवर्तते, यथा

कुलालो घटस्य करणे समर्थो घटमेव करोति न पटं रथं वा । तथा अस्ति प्रधानं कारणं, कुतः ? कारणकार्यविभागात् । करोतीति कारणम् । क्रियत इति कार्यम् । कारणस्य कार्यस्य च विभागो यथा - घटोदधिमधूकपयसां धारणे समर्थो न तथा तत्कारणं मृत्पिण्डः । मृत्पिण्डो वा घटं निष्पादयति न चैवं घटो मृत्पिण्डम् । एवं महदादिलिङ्गं दृष्ट्वानुमीयते । अस्ति विभक्तं तत्कारणं यस्य विभाग इदं व्यक्तमिति । इतश्च अविभागाद् वैश्वरूपस्य, विश्वं जगत्, तस्य रूपं व्यक्तिः । विश्वरूपस्य भावो वैश्वरूपं, तस्याविभागादस्ति प्रधानं, यस्मात् त्रैलोक्यस्य पञ्चानां पृथिव्यादीनां महाभूतानां पर कारणमस्त्यव्यक्त प्रवर्तते त्रिगुणतः समुदयाच्च ।स्परं विभागो नास्ति महाभूतेष्वन्तर्भूतास्त्रयो लोका इति, पृथिव्यापस्तेजो वायुराकाशमिति एतानि पञ्चमहाभूतानि प्रलयकाले सृष्टिक्रमेणैवाविभागं यान्ति तन्मात्रेषु परिणामिषु तन्मात्राण्येकादशेन्द्रियाणि चाहङ्कारे अहङ्कारो बुद्धौ बुद्धिः प्रधाने, एवं त्रयो लोकाः प्रलयकाले प्रकृताववविभागं गच्छन्ति, तस्मादविभागात् क्षीरदधि- वद् व्यक्ताव्यक्तयो रस्त्यव्यक्तं कारणम् ॥ १५ ॥

**कारणमस्त्यव्यक्त प्रवर्तते त्रिगुणतः समुदयाच्च ।**

**परिणामतः सलिलवत्प्रतिप्रतिगुणाश्रयविशेषात् ॥ १६ ॥**

अतश्च - अव्यक्तं प्रख्यातं कारणमस्ति यस्मान्महदादिलिङ्गं प्रवर्तते । त्रिगुणतः त्रिगुणात् सत्त्वरजस्तमांसि गुणा यस्मिन् तत् त्रिगुणं, तत किमुक्तं भवति, सत्त्वरजस्तमसां साम्यावस्था प्रधानम् । तथा समुदयात्, यथा गङ्गास्त्रोतांसि त्रीणि रुद्रमूर्द्धनि पतितानि एक स्त्रोतो जनयन्ति, एवं त्रिगुणमव्यक्तमेकं व्यक्तं जनयति, यथा वा तन्तवः समुदिताः परं जनयन्ति, एवमव्यक्तं गुणसमुदयान्महदादि जनयतीति त्रिगुणतः समुदयाच्च व्यक्तं जगत् प्रवर्तते । यस्मादेकस्मात् प्रधानाद् व्यक्त तस्मादेकरूपेण भवितव्यम् । नैष दोषः, परिणामतः सलिलवत् प्रतिप्रतिगुणाश्रयविशेषात् एकस्मात् प्रधानात् त्रयो लोकाः समुत्पन्नास्तुल्यभावा न भवन्ति देवाः सुखेन युक्ता मनुष्या दुःखेन तिर्यञ्चो मोहेन, एकस्मात् प्रधानात् प्रवृत्तं व्यक्तं प्रतिप्रतिगुणाश्रयविशेषात् परिणामतः सलिलवद्भवति । प्रतिप्रतीति वीप्सा । गुणानामाश्रयो गुणाश्रयस्तद्विशेषस्तं गुणाश्रयविशेषं प्रतिनिधाय प्रतिप्रतिगुणाश्रयविशेषं परिणामात् प्रवर्तते व्यक्तं यथा

आकाशादेकरसं सलिलं पतितं नानारूपात् संश्लेषाद्भिद्यते तत्तद्रसान्तरैः एवमेकस्मात् प्रधानात् प्रवृत्तास्त्रयो लोका नैकस्वभावा भवन्ति, देवेषु सत्त्वमुत्कटं रजस्तमसी उदासीने तेन तेऽत्यन्त सुखिनः, मनुष्येषु रज उत्कटं भवति सत्त्वतमसी उदासीने तेन तेऽत्यन्तदुःखिनः, तिर्यक्षु तम उत्कटं भवति सत्त्वरजसी उदासीने तेन तेऽत्यन्तमूढाः ॥ १६ ॥

**सङ्घातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात् ।**

**पुरुषोऽस्ति भोक्तृभावात् कैवल्यार्थं प्रवृत्तेश्च ॥ १७ ॥**

जन्ममरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च । एवमार्याद्वयेन प्रधानस्यास्तित्वमवगम्यते । इतश्चोत्तरं पुरुषास्तित्वप्रतिपादनार्थमाह । यदुक्तं व्यक्ताव्यक्तज्ञविज्ञानान्मोक्षः प्राप्यत इति, तत्र व्यक्तादनन्तरमव्यक्तं पञ्चभिः कारणैरधिगतं व्यक्तवत्, पुरुषोऽपि सूक्ष्मस्तस्याधुनानुमितास्तित्वं प्रतिक्रियते । अस्ति पुरुषः कस्मात् सङ्घातपरार्थत्वात् । योऽयं महदादिसङ्घातः स पुरुषार्थ इत्यनुमीयते, अचेतनत्वात् पर्यङ्कवत् । यथा पर्यङ्कः प्रत्येकं गात्रोत्पलकपादपीठतूली प्रच्छादन पटोपधान संङ्घातः परार्थो न हि स्वार्थः, पर्यङ्कस्य न हि किञ्चिदपि गात्रोत्पलाद्यवयवानां परस्परं कृत्यमस्ति । अतोऽवगम्यतेऽस्ति पुरुषो यः पर्यङ्के शेते यस्यार्थे पर्यङ्कस्तत्परार्थम्, इदं शरीरं पञ्चानां महाभूतानां सङ्घातो वर्तते, अस्ति पुरुषो यस्येदं भोग्यं शरीरं भोग्यमहदादिसङ्घातरूपं संमुत्पन्नमिति । इतश्चात्माऽस्ति त्रिगुणादिविपर्ययात् । यदुक्तं पूर्वस्यामार्यायां त्रिगुणमविवेकिविषय इत्यादि । तस्माद्विपर्ययात्, येनोक्तं तद्विपरीतस्तथा च पुमान् अधिष्ठानात् यथेह लङ्घनप्लवनधावनसमर्थैरश्वैर्युक्तो रथः सारथि नाऽधिष्ठितः प्रवर्तते तथात्माऽधिष्ठानाच्छरीरमिति । तथा चोक्तं षष्टितन्त्रे " पुरुषाधिष्ठितं प्रधानं प्रवर्तते" । अतोऽस्त्यात्मा, भोक्तत्वात् । यथा मधुराम्ललवणकटुतिक्तकषायषड् सोपबृंहितस्य संयुतस्यान्नस्य साध्यते, एवं महदादिलिङ्गस्य भोक्तृत्वाभावादस्ति स आत्मा यस्येदं भोग्यं शरीरमिति । इतश्च कैवल्यार्थं प्रवृत्तेश्च, केवलस्य भावः कैवल्यं तन्निमित्तं या च प्रवृत्तिस्तस्याः स्वकैवल्यार्थं प्रवृत्तेः सकाशादनुमीयते अस्त्यात्मेति, यतः सर्वो विद्वानविद्वांश्च संसार सन्तानक्षयमिच्छति । एवमेभिर्हेतुभिरस्त्यात्मा शरीराद् व्यतिरिक्तः ॥ १७ ॥

**जन्ममरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च ।**

**पुरुषबहुत्वं सिद्धम् त्रैगुण्यविपर्ययाच्चैव**

अथ सः किमेकः सर्वशरीरेऽधिष्ठातामणिरसनात्मकसूत्रवत् आहोस्विद् बहव आत्मानः प्रतिशरीरमधिष्ठातार इत्यत्रोच्यते - जन्म च मरणञ्च करणानि च जन्ममरणकरणानि तेषां प्रतिनियमात्, प्रत्येकनियमादित्यर्थः । यद्येक एव आत्मा स्यात् तत एकस्य जन्मनि सर्व एव जायेरन्, एकस्य मरणे सर्वेऽपि म्रियेरन्, एकस्य करणवैकल्ये बाधिर्यान्धत्वमूकत्वकुणित्वखञ्जत्वलक्षणे सर्वेऽपि वधिरान्धकुणिखञ्जाः स्युः, न चैवं भवति, तस्माजन्ममरणकरणानां प्रतिनियमात् पुरुषबहुत्वं सिद्धम् । इतश्च, अयुगपत् प्रवृत्तेश्च युगपदेककालं, न युगपदयुगपत् प्रवर्तनं, यस्मादयुगपद्धर्मादिषु प्रवृत्तिर्दृश्यते, एके धर्मे प्रवृत्ता अन्येऽधर्मे वैराग्येऽन्ये ज्ञानेऽन्ये प्रवृत्ताः, तस्मादयुगपत् प्रवृत्तेश्च बहव इति सिद्धम् । किञ्चान्यत् त्रैगुण्यविपर्ययाच्चैव, त्रिगुणभावविपर्ययाश्च पुरुषबहुत्वं सिद्धम् । यथा सामान्ये जन्मनि एकः सात्त्विकः सुखी, अन्यो राजसो दुःखी, अन्यस्तामसो मोहवान्, एवं त्रैगुण्यविपर्ययाद्बहुत्वं सिद्धमिति ॥ १८ ॥

**तस्माच्च विपर्यासात्सिद्धं साक्षित्वमस्य पुरुषस्य ।**

**कैवल्यं माध्यस्थ्यं द्रष्टृत्वकर्तृभावश्च ॥ १९ ॥**

अकर्ता पुरुष इत्येतदुच्यते तस्माच्च विपर्यासात् तस्माच्च यथोतत्रैगुण्यविपर्यासाद्विपर्ययान्निर्गुणः पुरुषो विवेकी भोक्तेत्यादिगुणानां पुरुषस्य यो विपर्यास उक्तस्तस्मात् सत्त्वरजस्तमःसु कर्तृभूतेषु साक्षित्वं सिद्धं पुरुषस्येति, योऽयमधिकृतो बहुत्वं प्रति । गुणा एव कर्तारः प्रवर्तन्ते, साक्षी न प्रवर्तते नापि निवर्तत एव । किञ्चान्यत्, कैवल्यं केवलभावः, कैवल्यमन्यत्वमित्यर्थः, त्रिगुणेभ्यः केवलोऽन्यः । माध्यस्थ्यं मध्यस्थभावः, परिव्राजकवत् मध्यस्थः पुरुषः । यथा कश्चित् परिव्राजको ग्रामीणेषु कर्षणार्थेषु प्रवृत्तेषु केवलो मध्यस्थः, पुरुषोऽप्येवं गुणेषु प्रवर्तमानेषु न प्रवर्तते तस्माद्रष्टृत्वम कर्तृभावश्च,

यस्मान्मध्यस्थस्तस्माद्दृष्टा तस्मादकर्ता पुरुषस्तेषां कर्मणामिति सत्त्वरजस्तमांसि त्रयो गुणाः कर्मकर्तृभावेन प्रवर्तन्ते, न पुरुषः, एवं पुरुषस्यास्तित्वं च सिद्धम् ॥ १९ ॥

**तस्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम् ।**

**गुणकर्तृत्वे च तथा कर्तेव भवत्युदासीनः ॥ २० ॥**

यस्मादकर्ता पुरुषस्तत् कथमध्यवसायं करोति धर्मं करिष्याम्यधर्मं न करिष्यामीत्यतः कर्ता भवति, नच कर्ता पुरुष एवमुभयथा दोषः स्यादिति, अत उच्यते - इह पुरुषश्चेतनावान् तेन चेतनावभाससंयुक्तं महदादिलिङ्गं चेतनावदिव भवति, यथा लोके घटः शीतसंयुक्तः शीतः, उष्णसंयुक्त उष्णः, एवं महदादि लिङ्गं तस्य संयोगात् पुरुषसंयोगाश्चेतनावदिव भवति । तस्माद् गुणा अध्यवसायं कुर्वन्ति न पुरुषः । यद्यपि लोके पुरुषः कर्ता गन्तेत्यादि प्रयुज्यते तथाप्यकर्ता पुरुषः । कथम् ? " गुणकर्तृत्वे च तथा कर्तेव भवत्युदासीनः " गुणानां कर्तृत्वे सति उदासीनोऽपि पुरुषः कर्तेव भवति, न कर्ता । अत्र दृष्टान्तो भवति, यथाऽचौरश्चौरैः सह गृहीतचौर इत्यवगम्यते, एवं त्रयो गुणाः कर्तारः, तैः संयुक्तः पुरुषोऽकर्ताऽपि कर्त्ता भवति कर्तृसंयोगात् एवं व्यक्ताव्यक्तज्ञानां विभागो विख्यातः, यद्विभागान्मोक्षप्राप्तिरिति ॥ २० ॥

**पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य ।**

**पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः ॥ २१ ॥**

अथैतयोः प्रधानपुरुषयोः किं हेतुः सङ्घात उच्यते- पुरुषस्य प्रधा नेन सह संयोगो दर्शनार्थं, प्रकृतिं महदादि कार्यं भूतपर्यन्तं पुरुषः पश्यति, एतदर्थं प्रधानस्यापि पुरुषेण संयोगः कैवल्यार्थम् । स च संयोगः पङ्ग्वन्धवदुभयोरपि द्रष्टव्यः, यथा एकः पङ्गुरेकश्चान्ध एतौ द्वावपि गच्छन्तौ महता सामर्थ्येनाटव्यां सार्थस्य स्तेनकृतादुपप्लवात् स्वबन्धुपरित्यक्तौ दैवादितश्चेतश्च चेरतुः स्वगत्या च तौ संयोगमुपयातौ पुनस्तयोः स्ववचसोर्विश्वस्तत्वेन संयोगो गमनार्थं दर्शनार्थं च भवति, अन्धेन पङ्गुः, स्कन्धमारोपितः, एवं शरीरारूढपदर्शि तेन मार्गेणान्धो याति पश्चान्धस्कन्धारूढः । एवं पुरुषे दर्शनशक्तिरस्ति पङ्गुवन्न क्रिया,

प्रधाने क्रियाशक्तिरस्त्यन्धवन दर्शन- शक्तिः । यथावानयोः पङ्गन्धयोः कृतार्थयोर्विभागो भविष्यतीप्सितस्थानप्राप्तयोः, एवं प्रधानमपि पुरुषस्य मोक्षं कृत्वा निवर्तते पोऽपि प्रधानं दृष्ट्वा कैवल्यं गच्छति, तयोः कृतार्थयोर्विभागो भविष्यति । किञ्चान्यत्, तत्कृतः सर्गः तेन संयोगेन कृतस्तत्कृतः, सर्गः सृष्टिः, यथा स्त्रीपुरुषसंयोगात् सुतोत्पत्तिस्तथा प्रधानपुरुषसंयोगात् सर्गस्योत्पत्तिः ॥ २१ ॥,

**प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद्गणश्च षोडशकः ।**

**तस्मादपि षोडशकात्पञ्चभ्यः पञ्च भूतानि ॥ २२ ॥**

इदानीं सर्गविभागदर्शनार्थमाह-प्रकृतिः प्रधानं ब्रह्म अव्यक्तं बहुधानकं मायेति पर्यायाः । अलिङ्गस्य प्रकृतेः सकाशान्महानुत्पद्यते, महान् बुद्धिरासुरी मतिः ख्यातिर्ज्ञानमिति प्रज्ञापर्यायैरुत्पद्यते । तस्माच्च महतोहङ्कार उत्पद्यते, अहङ्कारो भूतादिर्वैकृतस्तैजसोऽभिमान इति पर्यायाः । तस्माद्गणश्च षोडशकः, तस्मादहङ्कारात् षोडशकः षोडशस्वरूपेण गण उत्पद्यते । स यथा - पञ्चतन्मात्राणि शब्दतन्मात्रं स्पर्शतन्मात्रं रूपतन्मात्रं रसतन्मात्रं गन्धतन्मात्रमिति । तन्मात्र सूक्ष्मपर्यायवाच्यानि तत एकादशेन्द्रियाणि श्रोत्रं त्वक्चक्षुषी जिह्वाघ्राणमिति पञ्च बुद्धीन्द्रियाणि । वाक्पाणिपादपायूपस्थानि पञ्च कर्मेन्द्रियाणि, उभयात्मकमेकादशं मनश्च, एषः षोडशको गणोऽहङ्कारादुत्पद्यते । किञ्च पञ्चभ्यः पञ्चभूतानि, तस्मात् षोडश काद्गणात् पञ्चभ्यस्तन्मात्रेभ्यः सकाशात् पञ्च वै महाभूतान्युत्पद्यन्ते । यदुक्तं - शब्दतन्मात्रादाकाशं, स्पर्शतन्मात्राद्वायुः, रूपतन्मात्रात्तेजः, रसतन्मात्रादापः, गन्धतन्मात्रात् पृथिवी, एवं पञ्चभ्यः परमाणुभ्यः पञ्चमहाभूतान्युत्पद्यन्ते ॥ २२ ॥

**अध्यवसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्वर्यम् ।**

**सात्त्विकमेतद्रूपं तामसमस्माद्विपर्यस्तम् ॥ २३ ॥**

यदुक्तं व्यक्ताव्यक्तज्ञविज्ञानान्मोक्ष इति, तत्र महदादि भूतान्तं त्रयोविंशतिभेदं व्याख्यातम्, अव्यक्तमपि "भेदानां परिमाणात् " इत्यादिना व्याख्यातं, पुरुषोऽपि "सङ्घातपरार्थत्वात्" इत्यादिभि-हेतुभिर्व्याख्यातः । एवमेतानि पञ्चविंशतितत्त्वानि, यस्तैस्त्रैलोक्यं व्याप्तं जानाति तस्य भावोऽस्तित्वं तत्त्वं,

यथोक्तम् — "पञ्चविंशतितत्त्वज्ञो यत्र तत्राश्रमे रतः । जटी मुण्डी शिखी वापि मुच्यते नात्र संशयः ॥ " तानि यथा, प्रकृतिः पुरुषो बुद्धिरहङ्कारः पञ्चतन्मात्राणि एकादशेन्द्रियाणि पञ्चमहाभूतानि इत्येतानि पञ्चविंशतितत्त्वानि । तत्रोक्तप्रकृतेर्महानुत्पद्यते, तस्य महतः किं लक्षणमित्येतदाहअध्यवसायो बुद्धिलक्षणम् । अध्यवसानमध्यवसायः । यथा बीजे भविष्यद्वृत्तिकोऽङ्कुरस्तद्वदध्यवसायोऽयं घटोऽयं पट इत्येवम् अध्यवस्यति या सा बुद्धिरिति लक्ष्यते । सा च बुद्धिरष्टाङ्गिका सात्त्विकामसरूपभेदात् । तत्र बुद्धेः सात्त्विकं रूपं चतुर्विधं भवति । 'धर्मो ज्ञानं वैराग्यमैश्वर्यं चेति । तत्र धर्मो नाम दयादानयमनियमलक्षणः, तत्र यमा नियमाश्च पातञ्जलेऽभिहिता :- "अहिंसासत्या स्तेयब्रह्मचर्यापरिग्रहा यमाः", "शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमा:") ज्ञानं प्रकाशोऽवगमो भानमिति पर्यायाः, तच्च द्विविधं बाह्यमाभ्यन्तरं चेति । तत्र बाह्यं नाम वेदाः शिक्षाकल्पव्याकरणनिरुक्तच्छन्दोज्योतिषाख्यषड्ङ्गसहिताः पुराणानि न्यायमी मांसाधर्मशास्त्राणि चेति । आभ्यन्तरं प्रकृतिपुरुषज्ञानम्, इयं प्रकृतिः सत्त्वरजस्तमसां साम्यावस्थाऽयं पुरुषः सिद्धो निर्गुणो व्यापी चेतन इति । तत्र बाह्यज्ञानेन लोकपङ्क्तिर्लोकानुराग इत्यर्थः । आभ्यन्तरेण ज्ञानेन मोक्ष इत्यर्थः । वैराग्यमपि द्विविधं, बाह्यमाभ्यन्तरं च । बाह्यं दृष्टविषयवैतृष्ण्यमर्जनरक्षणक्षयसङ्गहिंसा दोषदर्शनात् विरक्तस्य, आभ्यन्तरं प्रधानमप्यत्र स्वप्नेन्द्रजालसदृशमिति विरक्तस्य, मोक्षेप्सोर्यदुत्पद्यते तदाभ्यन्तरं वैराग्यम् । ऐश्वर्यमीश्वरभावः, तच्चाटगुणम्-अणिमा महिमा लघिमा प्राप्तिः प्राकाम्यमीशित्वं वशित्वं यत्र कामावसायित्वं चेति । अणोर्भावोऽणिमा सूक्ष्मो भूत्वा जगति विचरतीति । महिमा महान् भूत्वा विचरतीति । लघिमा मृणाली तुलावयवादपि लघुतया पुष्पकेसराग्रेष्वपि तिष्ठति । प्राप्तिरभिमतं वस्तु यत्र तत्रावस्थितः प्राप्नोति । प्राकाम्यं प्रकामतो यदेवेच्छति तदेव विदधाति । ईशित्वं प्रभुतया त्रैलोक्यमपीष्टे । वशित्वं सर्व वशी भवति । यत्र कामावसायित्वं ब्रह्मादिस्तम्ब पर्यन्तं यत्र कामस्तत्रैवास्य स्वेच्छया स्थानासनविहारानाचरतीति । चत्वारि एतानि बुद्धेः सात्त्विकानि रूपाणि । यदा सत्त्वेन रजस्तमसी अभिभूते तदा पुमान् बुद्धिगुणान् धर्मादीनाप्नोति । किञ्चान्यत्, तामसमस्माद्विपर्यस्तम्,

अस्माद्धर्मादेर्विपरीतं तामसं वुद्धिरूपं, तत्र धर्माद्विपरीतोऽधर्मः, एवमज्ञानमवैराग्यमनैश्वर्यमिति । एवं सात्त्विकैस्तामसैः स्वरूपैराङ्गा बुद्धिस्त्रिगुणादव्यक्तादुत्पद्यते ॥ २३ ॥

**अभिमानोऽहङ्कारस्तस्माद् द्विविधः प्रवर्तते सर्गः**

**एकादशकश्च गणस्तन्मात्रः पञ्चकश्चैव ॥ २४ ॥**

एवं बुद्धिलक्षणमुक्तम्, अहङ्कारलक्षणमुच्यते - एकादशकश्च गण एकादशेन्द्रियाणि तथा तन्मात्रो गणः पञ्चकः पञ्चलक्षणोपेतः शब्द- तन्मात्रस्पर्शतन्मात्ररूपतन्मात्ररसतन्मात्रगन्धतन्मात्रलक्षणोपेतः ।।२४।।

**सात्त्विक एकादशकः प्रवर्तते वैकृतादहङ्कारात् ।**

**भूतादेस्तन्मात्रः स तामसस्तैजसादुभयम् ॥ २५ ॥**

किं लक्षणात् सर्ग इत्येतदाह-सत्त्वेनाभिभूते यदा रजस्तमसी अहङ्कारे भवतस्तदा सोऽहङ्कारः सात्त्विकः, तस्य च पूर्वाचार्यैः संज्ञा कृता वैकृत इति । तस्माद्वैकृतादहङ्कारादेकादशक इन्द्रियगण उत्प द्यते । तस्मात् सात्त्विकानि विशुद्धानीन्द्रियाणि स्वविषयसमर्थानि, तस्मादुच्यते सात्त्विक एकादशक इति । किञ्चान्यत् । "भूतादेस्तन्मात्रः स तामसः" तमसाभिभूते सत्त्वरजसी अहङ्कारे यदा भवतः, तदा सोऽहङ्कारस्तामस उच्यते, तस्य पूर्वाचार्यकृता संज्ञा भूतादिः, तस्माद्भूतादेरहङ्कारात् तन्मात्रः पञ्चको गण उत्पद्यते, भूतानामादिभूतस्तमाबहुलस्तेनोक्तः स तामस इति तस्माद्भूतादेः पञ्चतन्मात्रको गणः । किञ्च " तैजसादुभयम्" यदा रजसाभिभूते सत्त्वतमसी अहङ्कारे भवतस्तदा तस्मात् सोऽहङ्कारस्तैजस इति संज्ञां लभते, तस्मात्तैजसादुभयमुत्पद्यते । उभयमिति एकादशो गणस्तन्मात्रः पञ्चकः । योऽयं सात्त्विकोऽहङ्कारो वैकृतिको विकृतो भूत्वा एकादशेन्द्रियाण्युत्पादयति स तैजसमहङ्कारं सहायं गृह्णाति, सात्त्विको निष्क्रियः स तैजसयुक्त इन्द्रियोत्पत्तौ समर्थः । तथा तामसोऽहङ्कारो भूतादिसंज्ञितो निष्क्रियत्वात् तैजसेनाहङ्कारेण क्रियावता युक्तस्तन्मात्राण्युत्पादयति तेनोक्तं "तैजसादुभयमिति" एवं तैजसेनाहङ्कारेणेन्द्रियाण्येकादश पञ्चतन्मात्राणि कृतानि भवन्ति ॥ २५ ॥

**बुद्धीन्द्रियाणि चक्षुः श्रोत्रघ्राणरसन स्पर्शनकानि ।**

**वाक्पाणिपादपायूपस्थान् कर्मेन्द्रियाण्याहुः ॥ २६ ॥**

सात्त्विक एकादशक इत्युक्तः, यो वैकृतात् सात्त्विक एकादशकः सात्त्विकादहङ्कारादुत्पद्यते तस्य का संज्ञेत्याह-चक्षुरादीनि स्पर्शनपर्यन्तानि बुद्धीन्द्रियाण्युच्यन्ते । स्पृश्यतेऽनेनेति स्पर्शनं त्वगिन्द्रियं तद्वाची सिद्धः स्पर्शनशब्दोऽस्ति, तेनेदं पठ्यते स्पर्शनका नीति । शब्दस्पर्शरूपरसगन्धान् पञ्चविषयान् बुध्यन्ते अवगच्छन्तीति पञ्चबुद्धीन्द्रियाणि । वाक्पाणिपादपायूपस्थान् कर्मेन्द्रियाण्याहुः, कर्म कुर्वन्तीति कर्मेन्द्रियाणि । तत्र वाग्वदति, हस्तौ नाना व्यापारं कुरुतः पादौ गमनागमनं, पायुरुत्सर्गं करोति, उपस्थ आनन्दं प्रजोत्पत्त्या ॥ २६ ॥

**उभयात्मकमत्र मनः सङ्कल्पकमिन्द्रियश्च साधर्म्यात् ।**

**गुणपरिणामविशेषान्नानात्वं बाह्यभेदाश्च ॥ २७ ॥**

एवं बुद्धीन्द्रियकर्मेन्द्रियभेदेन दशेन्द्रियाणि व्याख्यातानि मन एकादशकं किमात्मकं किंस्वरूपं चेति तदुच्यते - अत्रेन्द्रियवर्गे मन उभयात्मकं बुद्धीन्द्रियेषु बुद्धीन्द्रियवत् कर्मेन्द्रियेषु कर्मेन्द्रियवत् । कस्माद् ? बुद्धीन्द्रियाणां प्रवृत्तिं कल्पयति कर्मेन्द्रियाणां च तस्मादुभयात्मकं मनः । सङ्कल्पयतीति सङ्कल्पकम् । किञ्चान्यत् "इन्द्रियं च साधर्म्यात्" समानधर्मभावात्, सात्त्विकाहङ्कारादबुद्धीन्द्रियाणि कर्मेन्द्रियाणि मनसा सहोत्पद्यमानानि मनसः साधर्म्य प्रति, तस्मात् साधर्म्यान्मनोऽपीन्द्रियम् एवमेतान्येकादशेन्द्रियाणि सात्त्विका द्वैकृतादहङ्कारादुत्पन्नानि । तत्र मनसः का वृत्तिरिति । सङ्कल्पो वृत्तिः । बुद्धीन्द्रियाणां शब्दादयो वृत्तयः कर्मेन्द्रियाणां वचनादयः । अथैतानीन्द्रियाणि भिन्नानि भिन्नार्थग्राहकाणि किमीश्वरेण उत स्वभावेन कृतानि, यतः प्रधानबुध्यहङ्कारा अचेतनाः पुरुषोऽप्यकर्तेत्यत्राह । इह सांख्यानां स्वभावो नाम कश्चित्कारणमस्ति । अत्रोच्यते " गुणपरिणामविशेषान्नानात्वं बाह्यभेदाश्च" इमान्येकादशेन्द्रियाणि, शब्दस्पर्शरूपरसगन्धाः पञ्चानां वचनादानविहरणोत्सर्गानन्दाश्च पञ्चानां सङ्कल्पश्च मनसः । एवमेते भिन्नानामेवेन्द्रयाणामर्थाः, गुणपरिणामविशेषात् गुणानां परिणामो गुणपरिणामस्तस्य विशेषादिन्द्रियाणां

नानात्वं बाह्यार्थभेदाश्च । अथैतन्नानात्वं नेश्वरेण नाहङ्कारेण न बुद्ध्या न प्रधानेन न पुरुषेण, स्वभावात् कृतगुणपरिणामेनेति । गुणानामचेतनत्वान्न प्रवर्तते ? प्रवर्तत एव । कथम् ? वक्ष्यतीहैव* " वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य । पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य ।।" एवमचेतना गुणा एकादशेन्द्रियभावेन प्रवर्तन्ते, विशेषोऽपि तत्कृत एव येनोच्चैः प्रदेशे चक्षुरवलोकनाय स्थितं, तथा घ्राणं तथा श्रोत्रं तथा जिह्वा स्वदेशे स्वार्थग्रहणाय । एवं कर्मेन्द्रियाण्यपि यथायथं स्वार्थसमर्थानि स्वदेशावस्थितानि स्वभावतो गुणपरिणामविशेषादेव, न तदर्था अपि, यत उक्तं शास्त्रान्तरे - " गुणा गुणेषु वर्तन्ते" गुणानां या वृत्तिः सा गुणविषया एवेति बाह्यार्था विज्ञेया गुणकृता एवेत्यर्थः । प्रधानं यस्य कारणमिति ॥ २७ ॥

**रूपादिषु पञ्चानामालोचनमात्रमिष्यते वृत्तिः ।**

**वचनादानविहरणोत्सर्गानन्दाश्च पञ्चानाम् ॥ २८ ॥**

अथेन्द्रियस्य कस्य का वृत्तिरित्युच्यते - मात्रशब्दो विशेषार्थः । अविशेषव्यावृत्त्यर्थो यथा - भिक्षामात्रं लभ्यते, नान्यो विशेष इति । तथा चक्षुः रूपमात्रे न रसादिषु, एवं शेषाण्यपि, तद्यथा-चक्षुषो रूपं, जिह्वाया रसः, घ्राणस्य गन्धः, श्रोत्रस्य शब्दः, त्वचः स्पर्शः । एवमेषां बुद्धीन्द्रियाणां वृत्तिः कथिता । कर्मेन्द्रियाणां वृत्तिः कथ्यते - " वचनादानविहरणोत्सर्गानन्दाश्च पञ्चानां" कर्मेन्द्रियाणामित्यर्थः । वाचो वचनं हस्तयोरादानं, पादयोर्विहरणं, पायोर्भुक्तस्याहारस्य परिणतमलोत्सर्गः, उपस्थस्यानन्दः सुतोत्पत्तिविषयावृत्तिरिति सम्बन्धः ॥ २८ ॥ ॥

**स्वालक्षण्यं वृत्तिस्त्रयस्य सैषा भवत्यसामान्या ।**

**सामान्यकरणवृत्तिः प्राणाद्या वायवः पञ्च ॥ २९ ॥**

अधुना बुद्ध्यहङ्कारमनसामुच्यते - स्वलक्षणस्वभावा स्वालक्षण्या । अध्यवसायो बुद्धिरिति लक्षणमुक्तं सैव बुद्धिवृत्तिः । तथाऽभिमानोऽहङ्कार इत्यभिमानलक्षणोऽभिमानवृत्तिश्च । सङ्कल्पकं मन इति .लक्षणमुक्तं, तेन सङ्कल्प एव मनसो वृत्तिः । त्रयस्य बुद्ध्यहङ्कारमनसां स्वालक्षण्या वृत्तिरसामान्या,

या प्रागभिहिता बुद्धीन्द्रियाणां च वृत्तिः साऽप्यसामान्यैवेति । इदानीं सामान्या वृत्तिराख्यायते - सामान्यकरणवृत्तिः, सामान्येन करणानां वृत्तिः प्राणाद्याः वायवः पञ्च, प्राणापानसमानोदानव्याना इति पञ्च वायवः सर्वेन्द्रियाणां सामान्या वृत्तिः, यतः, प्राणो नाम वायुर्मुखनासिकान्तर्गोचरः, तस्य यत् स्पन्दनं कर्म तत् त्रयोदशविधस्याऽपि सामान्या वृत्तिः, सति प्राणे यस्मात् करणानामात्मलाभ इति । प्राणोऽपि पञ्जरशकुनिवत् सर्वस्य चलनं करोतीति । प्राणनात् प्राण इत्युच्यते । तथाऽपनयनादपानः, तत्र यत् स्पन्दनं तदपि सामान्यवृत्तिरिन्द्रियस्य । तथा समानो मध्यदेशवतीय आहारादीनां समं नयनात् समानो वायुः, तत्र यत् स्पन्दनं तत् सामान्यकरणवृत्तिः । तथा ऊर्ध्वारोहणादुत्कर्षादुन्नयनाद्वा उदानो नाभिदेशमस्तकान्तर्गोचरः, तत्रोदाने यत् स्पन्दनं तत् सर्वेन्द्रियाणां सामान्या वृत्तिः । किञ्च शरीरव्याप्तिरभ्यन्तरविभागश्च येन क्रियतेऽसौ शरीरव्याप्याकाशवद्व्यानः, तत्र यत् स्पन्दनं तत् ॥ करणजालस्य सामान्या वृत्तिरिति । एवमेते पञ्च वायवः सामान्यकरणवृत्तिरिति व्याख्याताः, त्रयोदशविधस्यापि करणसामान्या वृत्तिरित्यर्थः ॥ २९ ॥

**युगपच्चतुष्टयस्य तु वृत्तिः क्रमशश्च तस्य निर्दिष्टा ।**

**दृष्टे, तथाप्यदृष्टे त्रयस्य तत्पूर्विका वृत्तिः ॥ ३० ॥**

"युगपच्चतुष्टयस्य" बुद्ध्यहङ्कारमनसामेकैकेन्द्रियसम्बन्धे सति चतुष्टयं भवति । चतुष्टयस्य दृष्टे प्रतिविषयाध्यवसाये युगपद्वृत्तिः, बुद्ध्यहङ्कारमनश्चक्षूंषि युगपदेककालं रूपं पश्यन्ति स्थाणुरयमिति । बुद्ध्यहङ्कारमनोजिह्वा युगपद्रसं गृह्णन्ति । बुद्ध्यहङ्कारमनोघ्राणानि युगपद्गन्धं गृह्णन्ति । तथा त्वक् श्रोत्रे अपि । किञ्च " क्रमशश्च तस्य निर्दिष्टा" तस्येति चतुष्टयस्य क्रमशश्च वृत्तिर्भवति । यथा कश्चित् पथि गच्छन् दूरादेव दृष्ट्वा स्थाणुरयं पुरुषो वेति संशये सति तत्रोपरूढं तल्लिङ्गं पश्यति शकुनिं वा, ततस्तस्य मनसा सङ्कल्पिते संशये व्यवच्छेदभूता बुद्धिर्भवति स्थाणुरयमिति, अतोऽहङ्कारश्च निश्चयार्थः स्थाणुरेवेत्येवं बुध्यहङ्कारमनश्चक्षुषां क्रमशो वृत्तिर्दृष्टा, यथा रूपे तथा शब्दादिष्वपि बोद्धव्या । दृष्टे दृष्टविषये । किञ्चान्यत् । तथाऽप्य त्रयस्य तत्पूर्विका वृत्तिः, अदप्रेऽनागतेऽतीते च काले बुद्ध्यहङ्कारमनसां रूपे

चक्षुःपूर्विका त्रयस्य वृत्तिः, स्पर्शे त्वक्पूर्विका, गन्धे घ्राणपूर्विका, रसे रसनपूर्विका शब्दे श्रवणपूर्विका, बुद्ध्यहङ्कारमन सामनागते भविष्यति कालेऽतीते च तत्पूर्विका क्रमशो वृत्तिः, वर्त्तमाने युगपत् क्रमशश्चेति ॥ ३० ॥

**स्वां स्वां प्रतिपद्यन्ते परस्पराकृतहेतुकां वृत्तिम् ।**

**पुरुषार्थ एव हेतुर्न केनचित् कार्यते करणम् ॥ ३१ ॥**

किञ्च - स्वां स्वामिति वीप्सा, बुद्ध्यहङ्कारमनांसि स्वां स्वां वृत्तिं परस्पराकृतहेतुकां " आकृतकादरसम्भ्रमः" इति प्रतिपद्यन्ते पुरुषार्थकरणाय बुद्ध्यहङ्कारादयः, बुद्धिरहङ्काराकृतं ज्ञात्वा स्ववि पयं प्रतिपद्यते, किमर्थमिति चेत् ? पुरुषार्थ एवं हेतुः, पुरुषार्थः कर्त्तव्य इत्येवमर्थं गुणानां प्रवृत्तिः, तस्मादेतानि करणानि पुरुषार्थं प्रकाशयन्ति, यद्यचेतनानीति कथं स्वयं प्रवर्त्तन्ते ? न केनचित् कार्यते करणम्, पुरुषार्थ एवैकः कारयतीति वाक्यार्थः, न केनचित, ईश्वरेण पुरुषेण वा, कार्यते प्रबोध्यते करणम् ॥ ३१.

**करणं त्रयोदशविधं तदाहरणधारणप्रकाशकरम् ।**

**कार्यं च तस्य दशधा हार्यं धार्यं प्रकाश्यञ्च ॥ ३२ ॥**

बुद्ध्यादि कतिविधं तदित्युच्यते - करणं महदादि त्रयोदशविधं बोद्धव्यम्, पञ्च बुद्धीन्द्रियाणि चक्षुरादीनि, पञ्च कर्मेन्द्रियाणि वागा दीनीति त्रयोदशविधं करणम् । तत् किं करोतीत्येतदाह - "तदाहरणधारणप्रकाशकरम्" तत्राहरणं धारणं च कर्मेन्द्रियाणि कुर्वन्ति, प्रकाशं बुद्धीन्द्रियाणि । कतिविधं कार्यं तस्येति तदुच्यतेकार्यं च तस्य दशधा, " तस्य करणस्य कार्यं कर्त्तव्यतिमि दशधा दशप्रकारम्, शब्दस्पर्शरूपरसगन्धाख्यं वचनादानविहरणोत्सर्गानन्दाख्यमेतद्दशविधं कार्यं, बुद्धीन्द्रियैः प्रकाशितं कर्मेन्द्रियाण्याहरन्ति धारयन्ति चेति ॥ ३२ ॥

**अन्तःकरणं त्रिविधं दशधा बाह्यं त्रयस्य विषयाख्यम् ।**

**साम्प्रतकालं बाह्यं त्रिकालमाभ्यन्तरं करणम् ॥ ३३ ॥**

किञ्च - अन्तःकरणमिति बुद्ध्यहङ्कारमनांसि, त्रिविधं महदादिभेदात् । दशधा बाह्यं च, बुद्धीन्द्रियाणि पञ्च कर्मेन्द्रियाणि पञ्च दशविधमेतत् करणं बाह्यम्, तत्र यस्यान्तःकरणस्य विषयाख्यं बुद्ध्यहङ्कारमनसां भोग्यं " साम्प्रतकालं" श्रोत्रं वर्त्तमानमेव शब्द् शृणोति नातीतं न च भविष्यन्तं चक्षुरपि वर्त्तमानं रूपं पश्यति नातीतं नानागतं त्वग्वर्त्तमानं स्पर्शं, जिह्वा वर्त्तमानं रसं, नासिका वर्त्तमानं गन्धं, नातीतानागतं चेति । एवं कर्मेन्द्रियाणि, वाग्वर्त्तमानं शब्दमुच्चारयति नातीतं नानागतं, पाणी वर्त्तमानं घटमाददाते नातीतमनागतं च पादौ वर्त्तमानं पन्थानं विहरतो नातीतं नाप्यनागतं, पायूपस्थौ च वर्त्तमानावुत्सर्गानन्दौ कुरुतो नातीतौ नानागतौ । एवं बाह्यं करणं साम्प्रतकालमुक्तम् । "त्रिकालमाभ्यन्तरं करणम्" बुद्ध्यहङ्कारमनांसि त्रिकालविषयाणि, बुद्धिर्वर्त्तमानं घटं बुध्यते, अतीतमनागतं चेति । अहङ्कारो वर्त्तमानेऽभिमानं करोत्यतीतेऽनागते च । तथा मनो वर्त्तमाने सङ्कल्पं कुरुतेऽतीतेनागते च, एवं त्रिकालमाभ्यन्तरं करणमिति ॥ ३३ ॥

**बुद्धीन्द्रियाणि तेषां पञ्च विशेषाविशेषविषयाणि ।**

**वाग्भवति शब्दविषया शेषाणि तु पञ्चविषयाणि ॥ ३४ ॥**

इदानीमिन्द्रियाणि कति सविशेषं विषयं गृह्णन्ति, कानि निर्विशेपमिति तदुच्यते—बुद्धीन्द्रियाणि तेषां सविशेषं विषयं गृह्णन्ति, सविशेषविषयं मानुषाणां शब्दस्पर्शरूपरसगन्धान् सुखदुःखमोहविषययुक्तान् बुद्धीन्द्रियाणि प्रकाशयन्ति । देवानां निर्विशेषान् विषया प्रकाशयन्ति । तथा कर्मेन्द्रियाणां मध्ये वाग्भवति शब्दविषया, देवानां मानुषाणां च वाग्वदति, श्लोकादीनुच्चारयति तस्माद्देवानां मानुषाणां च वागिन्द्रियं तुल्यं, शेषाण्यपि वागव्यतिरिक्तानि पाणिपादपायूपस्थसंज्ञितानि पञ्चविषयाणि पञ्च विषयाः शब्दादयो येषां तानि पञ्चविषयाणि, शब्दस्पर्शरूपरसगन्धाः पाणौ सन्ति, पञ्चशव्दादिलक्षणायां भुवि पादो विहरति, पायिन्द्रियं पञ्चक्तृप्तमुत्सर्गं * करोति, तथोपस्थेन्द्रियं पञ्चलक्षणं शुक्रमानन्दयति ॥ ३४ ॥

**सान्तःकरणा बुद्धिः सर्वं विषयमवगाहते यस्मात् ।**

**तस्मात् त्रिविधं करणं द्वारि द्वाराणि शेषाणि ॥ ३५ ॥**

सान्तःकरणा बुद्धिः, अहङ्कारमनः सहितेत्यर्थः, यस्मात् सर्वं विषयमवगाहते गृह्णाति, त्रिष्वपि कालेषु शब्दादीन् गृह्णाति, तस्मात् त्रिविधं करणं द्वारि, द्वाराणि शेषाणि करणानीति वाक्यशेषः ॥ ३५॥

**एते प्रदीपकल्पाः परस्परविलक्षणा गुणविशेषाः**

**कृत्स्नं पुरुषस्यार्थं प्रकाश्य बुद्धौ प्रयच्छन्ति ॥ ३६ ॥**

किञ्चान्यत् - यानि करणान्युक्तानि एते गुणविशेषाः, किं विशि. टाः ? प्रदीपकल्पाः प्रदीपवद्विषयप्रकाशकाः, परस्परविलक्षणा अस- शा भिन्नविषया इत्यर्थः । गुणविषयेति - गुणविशेषा गुणेभ्यो जाताः । कृत्स्नं पुरुषस्यार्थं बुद्धीन्द्रियाणि कर्मेन्द्रियाण्यहङ्कारो मनचैतानि स्वं स्वमर्थं पुरुषस्य प्रकाश्य बुद्धौ प्रयच्छन्ति बुद्धिस्थं कुर्व- न्तीत्यर्थः । यतो बुद्धिस्थं सर्वं विषयसुखादिकं पुरुष उपलभ्यते ॥३६॥

**बोधप्रश्नाः**

1 सांख्याकारिका केन रचिता ?

2 दुःखत्रयं किं?

3 आनुश्रविकः इति शब्दार्थः कः?

4 प्रमाणानि कानि?

5 अनुमानं कति विदं?

**अभ्यासप्रश्नाः**

1 तत्त्वमसि महावाक्यं प्रतिपादयत।

2 शांख्यमते प्रमाणानि प्रतिपादयत।

3 सत्त्व-रज-तमसां परिचयं लिखत।

# खण्डः ५

## प्रस्तावना

चतुर्थखण्डेऽस्मिन् सांख्यदर्नस्य परिचयः सांख्यदर्शनप्रवर्तककपिलमुनीनां परिचयः भवति। पुनश्च इदं दर्शनं किमर्थं आदरणीयम् इति विषयमधिकृत्य मङ्गश्लोकः अत्र प्रणीतः। तत्र दुःखत्रयं किमिति स्पष्टतया वर्णितं। सांख्यमते कति तत्त्वानि, तत्र प्रमाणानि विशिष्य तत्तत्प्रमाणानां स्वरूपं तत्प्रभेदश्च वर्णितः। सत्त्वं रजः तमः इत्येतेषां त्रयाणां पदार्थानां वर्णानं कृतं। तत्रापि अन्तः करणं किं तत्प्रभेदः कः इत्येतत्सर्वं अत्र विचारितं भवति।

## उद्देश्यम्

पुरुषस्य स्पष्टं स्वरूपं अवगम्यते

आत्मतत्वविवेकपदार्थः कः इति अवगम्यते

**सर्वं प्रत्युपभोगं यस्मात् पुरुषस्य साधयति बुद्धिः ।**

**सैव च विशिनष्टि पुनः प्रधानपुरुषान्तरं सूक्ष्मम् ॥ ३७ ॥**

इदञ्चान्यत् — सर्वेन्द्रियगतं त्रिष्वपि कालेषु सर्वं प्रत्युपभोगमुपभांगं प्रति देवमनुष्यतिर्यग्बुद्धीन्द्रियकर्मेन्द्रियद्वारेण सान्तःकरणा बुद्धिः साधयति सम्पादयति यस्मात् तस्मात् सैव च विशिनष्टि प्रधानपुरुषयोर्विषयविभागं करोति, प्रधानपुरुषान्तरं नानात्वमि त्यर्थः, सूक्ष्ममित्यनधिकृततपश्चरणैरप्राप्यम्, इयं प्रकृतिः सत्वरजस्तमसां साम्यावस्था इयं बुद्धिरयमहङ्कार एतानि पञ्चतन्मात्राण्ये कादशेन्द्रियाणि पञ्चमहाभूतान्ययमन्यः पुरुष एभ्यो व्यतिरिक्त इत्येवं बोधयति बुद्धिः, यस्यावापादपवर्गो भवति ॥ ३७

**तन्मात्राण्यविशेषास्तेभ्यो भूतानि पञ्च पञ्चभ्यः ।**

**एते स्मृता विशेषाः शान्ता घोराश्च मूढाश्च ॥ ३८ ॥**

पूर्वमुक्तं विशेषा विशेष विषयाणि तत् के विषयास्तान दर्शयति । यानि पञ्च तन्मात्राण्यहङ्कारादुत्पद्यन्ते ते शब्दतन्मात्रं स्पर्शतन्मात्रं रूपतन्मात्रं रसतन्मात्रं गन्धतन्मात्रमितान्यविशेषा उच्यन्ते देवानाते सुखलक्षणा विषया दुःखमोहरहिताः, तेभ्यः पञ्चभ्यस्तन्मात्रेभ्यः पञ्चमहाभूतानि पृथिव्यप्तेजोवा याकाशसंज्ञानि यान्युत्पद्यन्ते एते स्मृता विशेषाः । गन्धतन्मात्रात् पृथिवी, रसतन्मात्रादापः, रूपतन्मात्रात् तेजः, स्पर्शतन्मात्राद्वायुः शब्दतन्मात्रादाकाशम्, इत्येवमुत्पन्नान्येतानि महाभूतान्येते विशेषा मानुषाणां विषयाः शान्ताः सुखलक्षणा, घोरा दुःखलक्षणा, मूढा मोहजनकाः । यथा- , काशं कस्यचिदनवकाशादन्तगृहा देर्निर्गतस्य सुखात्मकं शान्तं भवति, तदेव शीतोष्ण वातवर्षाभिभूतस्य दुःखात्मकं घोरं भवति, तदेव पन्थानं गच्छतो वनमार्गाद् भ्रष्टस्य दिङ्मोहान्मूढं भवति । एवं वायुधर्मार्त्तस्य शान्तो भवति, शीतार्त्तस्य घोरो धूलीशर्कराविमिश्रोऽतिवान् मूढ इति । एवं तेजःप्रभृतिषु द्रष्टव्यम् ॥ ३८ ॥

**सूक्ष्मा मातापितृजाः सह प्रभूतैस्त्रिधा विशेषाः स्युः ।**

**सूक्ष्मास्तेषां नियता मातापितृजा निवर्तन्ते ॥ ३९ ॥**

अथाऽन्ये विशेषाः - सूक्ष्मास्तन्मात्राणि यत्संगृहीतं तन्मात्रकं सूक्ष्मशरीरं महदादिलिङ्गं सदा तिष्ठति संसरति च ते सूक्ष्माः, तथा मातापितृजाः स्थूलशरीरोपचायका ऋतुकाले मातापितृसंयोगे शोणितशुक्र मिश्रीभावेनोदरान्तः सूक्ष्मशरीरस्योपचयं कुर्वन्ति, तत सूक्ष्मशरीरं पुनर्मातुरशितपीतनानाविधरसेन नाभिनिबन्धेनाप्यायते, तथाप्यारब्धं शरीरं सूक्ष्मैर्मातापितृजैश्च सह महाभूतैस्त्रिधा विशेषः, पृष्टोदरजङ्घाकटयुरः शिरःप्रभृति षाट्कौशिकं पाञ्चभौतिकं रुधिरमांसस्नायुशुक्रास्थिमज्जासंभृतम् आकाशोऽवकाशदानाद्वायुर्वर्द्धनात् तेजः पाकादापः संग्रहात् पृथिवी धारणात् समस्तावयवोपेतं मातुरुद्रात् वहिर्भवति । एवमेते त्रिविधा विशेषाः स्युः । अत्राह - - के नित्याः के वा अनित्या: ? सूक्ष्मास्तेषां नियताः सूक्ष्मास्तन्मात्रसंज्ञकास्तेषां मध्ये नियता नित्याः, तैरारब्धं शरीरं कर्मवशात् पशुमृगपक्षिसरीसृपस्थावरजातिषु संसरति, धर्मवशादिन्द्रादिलोकेषु. एवमेतन्नियतं सूक्ष्मशरीरं संसरति न यावज्ज्ञानमुत्पद्यते, उत्पन्ने ज्ञाने विद्वाञ्छरीरं त्यक्त्वा मोक्षं गच्छति, तस्मादेते विशेषाः सूक्ष्मा नित्या इति । मातापितृजा निवर्त्तन्ते, तत् सूक्ष्मशरीरं परित्यज्येहैव प्राणत्यागवेलायां मातापितृजा निवर्त्तन्ते, मरणकाले मातापितृजं शरीरमिहैव निवृत्य भूम्यादिषु प्रलीयते यथातत्त्वम् ॥ ३९ ॥

**पूर्वोत्पन्नमसक्तं नियतं महदादिसुक्ष्मपर्यन्तम् ।**

**संसरति निरुपभोगं भावैरधिवासितं लिङ्गम् ॥ ४० ॥**

सूक्ष्मं च कथं संसरति ? तदाह - यदालोका अनुत्पन्नाः प्रधानादिसर्गे तदा सूक्ष्मशरीरमुत्पन्नमिति । किञ्चान्यत् । असक्तं न संयुक्तं तिर्यग्योनिदेवमानुषस्थानेषु, सूक्ष्मत्वात् कुत्रचिदसक्तं पर्वतादिषु अप्रतिहतप्रसरं संसरति गच्छति । नियतम्, यावन्न ज्ञानमुत्पद्यते तावत् 'संसरति । तच्च महादादि सूक्ष्मपर्यन्तम् । महानादौ यस्य तन्महदादि, बुद्धिरहङ्कारो मन इति पञ्चतन्मात्राणि सूक्ष्मपर्यन्तं तन्मात्रपर्यन्तं संसरति शूलग्रहपिपीलिकावत् त्रीनपि लोकान् । निरुपभोगं भोगरहितं तत् सूक्ष्मशरीरं

मातापितृजेन वाह्येनोपचयेन क्रियाधर्मग्रहणाद्भोगेषु समर्थं भवतीत्यर्थः । भावैरधिवासितं पुरस्ताद्भावान् * धर्मादीन वक्ष्यामः, तैरधिवासितमुपरञ्जितम् । लिङ्गमिति । - प्रलयकाले महदादिसुक्ष्मपर्यन्तं करणोपेतं प्रधाने लीयते, असंसरणयुक्तं सत् आसर्गकालमत्र वर्त्तते प्रकृतिमोहबन्धनबद्धं सत् संसरणादिक्रियास्वसमर्थमिति । पुनः सर्गकाले संसरति तस्मालिङ्गं सूक्ष्मम् ॥ ४० ॥

**चित्रं यथाश्रयमृते स्थापावादिभ्यो विना यथा छाया ।**

**तद्वद्विना विशेषैर्न तिष्ठति निराश्रयं लिङ्गम् ॥ ४१ ॥**

किं प्रयोजनेन त्रयोदशविधं करणं संसरतीत्येवं चोदिते सत्याह वा चित्रं यथा कुड्याद्याश्रयमृते न तिष्ठति, स्थाप्रावादिभ्यः कीलकादिभ्यो विना छाया न तिष्ठति तैर्विना न भवति, आदिग्रहणाद् यथा- - शैत्यं विना नापो भवन्ति शैत्यं वाऽद्भिर्विना । अग्निरुष्टं विना वायुः स्पर्शं विना आकाशमवकाशं विना पृथिवी गन्धं विना, तद्वदेतेन दृष्टान्तेन न्यायेन विनाविशेषैर विशेषैस्तन्मात्रैर्विना न तिष्ठति । अथ विशेषभूतान्युच्यन्ते, शरीरं पञ्चभूतमयम्, वैशेषिणा शरीरेण विना क्व लिङ्गस्थानं चेति व एकदेहमुज्झति तदेवान्यमाश्रयति, निराश्रयमाश्रयरहितम्, लिङ्गं त्रयोदशविधं करणमित्यर्थः ॥ ४१ ॥

**पुरुषार्थहेतुकमिदं निमित्तनैमित्तिकप्रसङ्गेन ।**

**प्रकृतेर्विभुत्वयोगान्नटवद् व्यवतिष्ठते लिङ्गम् ॥ ४२ ॥**

**सांसिद्धिकाश्च भावाः प्राकृतिका वैकृतिकाश्च धर्माद्याः**

किमर्थम् ? तदुच्यते - पुरुषार्थः कर्त्तव्य इति प्रधानं प्रवर्त्तते, च द्विविधः शब्दाद्युपलब्धिलक्षणो गुणपुरुषान्तरोपलब्धिलक्षणश्च । शब्दाद्युपलब्धिर्ब्रह्मादिषु लोकेषु गन्धादिभोगावाप्तिः । गुणपुरुषान्तरोपलब्धिर्मोक्ष इति । तस्मादुक्तं " पुरुषार्थहेतुकमिदं सूक्ष्मशरीरं प्रवर्त्तते " इति । निमित्तनैमित्तिकप्रसङ्गेन, निमित्तं धर्मादि, नैमित्तिकमूर्द्ध गमनादि, पुरस्तादेव वक्ष्यामः । प्रसङ्गेन प्रसक्त्या प्रकृतिः प्रधानस्य विभुत्वयोगात्, यथा-- राजा स्वराष्ट्रे विभुत्वाद् यद्यदिच्छति तत् तत् करोतीति, तथा प्रकृतेः सर्वत्र विभुत्वयोगान्निमित्तनैमित्तिकप्रसङ्गेन व्यवतिष्ठते पृथक् पृथगेहधारणे लिङ्गस्य व्यवस्थां

करोति । लिङ्गं सूक्ष्मैः परमाणुभिस्तन्मात्रैरुपचितं शरीरं त्रयोदशविधकरणोपेतं मानुषदेवतिर्यग्योनिषु व्यवतिष्ठते । कथम् ? नटवत् । यथा नटः पटान्तरेण प्रविश्य देवो भूत्वा निर्गच्छति पुनर्मानुषपुनर्विदूषकः । एवं लिङ्गं निमित्तनैमित्तिक प्रसङ्गेनोदरान्तः प्रविश्य हस्ती स्त्री पुमान् भवति ॥ ४२ ॥

भावैरधिवासितं लिङ्गं संसरतीत्युक्तम्, तत् के भावा इत्याह-भावास्त्रिविधाश्चिन्त्यन्ते - सांसिद्धिकाः, प्राकृताः, वैकृताश्च । तत्र सांसिद्धिका यथा-भगवतः कपिलस्यादिसर्गे उत्पद्यमानस्य चत्वारो भावाः सहोत्पन्ना धर्मो ज्ञानं वैराग्यमैश्वर्यमिति । प्राकृताः कथ्यन्ते, ब्रह्मणश्चत्वारः पुत्राः सनकसनन्द - सनातन सनत्कुमारा बभूवुः, तेषामुत्पन्न कार्यकारणानां शरीरिणां षोडशवर्षाणामेते भावाश्चत्वारः समुत्पन्नाः, तस्मादेते प्राकृताः । तथा वैकृता यथा, -- आचार्यमूर्ति निमित्तं कृत्वाऽस्मदादीनां ज्ञानमुत्पद्यते, ज्ञानाद्वैराग्यं, वैराग्याद्धर्मः, धर्मादैश्वर्यमिति । आचार्यमूर्त्तिरपि विकृतिरिति, तस्माद्वैकृता एते भावा उच्यन्ते, यैरधिवासितं लिङ्गं संसरति । एते चत्वारो भावाः सात्त्विकाः, तामसा विपरीताः, सात्त्विक मेतद्रूपं तामसमस्माद्विपर्यस्तमित्यत्र * व्याख्याताः । एवमष्टौ धर्मो ज्ञानं वैराग्यमैश्वर्यमधर्मोऽज्ञानमवैराग्यमनैश्वर्यमित्यष्टौ भावाः, क्ववर्त्तन्ते ? दृष्टाः करणाश्रयिणः । बुद्धिः करणं तदाश्रयिणः एतदुक्तम्- - " अध्यवसायो बुद्धिधर्मो ज्ञानम्" इति । । कार्यं देहस्तदाश्रयाः कललाद्या ये मातृजा इत्युक्ताः, शुक्रशोणितसंयोगे विवृद्धिहेतुकाः कललाद्या बुद्बुदमांसपेशीप्रभृतयः, तथा कौमारयौवनस्थविरत्वादयो भावा अन्नपानरसनिमित्ता निष्पद्यन्ते, अतः कार्याश्रयिण उच्यन्ते, अन्नादिविषयभोगनिमित्ता जायन्ते ॥ ४३ ॥

**दृष्टाः करणाश्रयिणः कार्याश्रयिणश्च कललाद्याः ॥ ४३ ॥**

**धर्मेण गमन मूर्द्धं गमनमधस्ताद्भवत्यधर्मेण ।**

**ज्ञानेन चापवर्गो विपर्ययादिष्यते बन्धः ॥ ४४ ॥**

निमित्तनैमित्तिकप्रसङ्गेनेति यदुक्तमत्रोच्यते - धर्मेण गमनमूर्द्धम्, धर्म निमित्तं कृत्वोर्द्धमुपनयति, ऊर्द्धमित्यष्टौ स्थानानि गृह्यन्ते, तद्यथा - ब्राह्मं प्रजापत्यं सौम्यमैन्द्रं गान्धर्व याक्षं राक्षसं पैशाचमिति, तत्

सूक्ष्मं शरीरं गच्छति । पशुमृगपक्षिसरीसृपस्थावरान्तेवधर्मो निमित्तम् । किञ्च, ज्ञानेन चापवर्गः, अपवर्गश्च पञ्चविंशतितत्त्वज्ञानम्, तेन निमित्तेनापवर्गो मोक्षः, ततः सूक्ष्मं शरीरं निवर्तते, परमात्मा उच्यते । विपर्ययादिष्यते बन्धः, अज्ञानं निमित्तम्, स चैष नैमित्तिकः प्राकृतो वैकारिको दाक्षिणिकश्च बन्ध इति वक्ष्यति पुरस्ताद् यदिदमुक्तं -- " प्राकृतेन च बन्धेन तथा वैकारिकेण च । दाक्षिणेन तृतीयेन बद्धो नान्येन मुच्यते " ॥ ४४ ॥

**वैराग्यात्प्रकृतिलयः संसारो भवति राजसाद्रागात् ।**

**ऐश्वर्यादविघातो विपर्ययात् तद्विपर्यासः ॥ ४५ ॥**

**एष प्रत्ययसर्गो विपर्ययाशक्तितुष्टिसिद्ध्याख्यः ।**

**गुणवैषम्यविमर्दात् तस्य च भेदास्तु पञ्चाशत् ॥ ४६ ॥**

तथाऽन्यदपि निमित्तम् - यथा कस्यचिद्वैराग्यमस्ति न तत्त्वज्ञानं तस्मादज्ञानपूर्वाद्वैराग्यात् प्रकृतिलयो मृतोऽष्टासु प्रकृतिषु प्रधानबुद्ध्यहङ्कारतन्मात्रेषु लीयते न मोक्षः । ततो भूयोऽपि संसरति, यथा योऽयं राजसो रागः, यजामि दक्षिणां ददामि येनामुष्मिन् लोकेऽत्र यद्दिव्यं मानुषं सुखमनुभवाम्येतस्माद्राजसाद्रागात् संसारो भवति । तथा ऐश्वर्यादविघातः, एतदैश्वर्यमष्टगुणमादियुक्तं तस्मादैश्वर्यनिमित्तादविघातो नैमित्तिको भवति ब्रह्मादिषु स्थानेष्वैश्वर्यं न विहन्यते किञ्चान्यत् । विपर्ययात् तद्विपर्यासः, तस्याविघातस्य विपसो विघातो भवति, अनैश्वर्यात् सर्वत्र विहन्यते ॥ ४५ ॥ एष निमित्तैः सह नैमित्तिकः षोड़शविधो व्याख्यातः, स किमा त्मक इत्याह-यथा एष षोड़शविधो निमित्तनैमित्तिकभेदो व्याख्यात एष प्रत्ययसर्ग उच्यते । प्रत्ययो वुद्धिरित्युक्ता, अध्यव सायो बुद्धिर्धर्मो ज्ञानमित्यादि, स च प्रत्ययसर्गश्चतुर्धा भिद्यते, विपर्ययाशक्तितुष्टिसिद्ध्याख्यभेदात् । तत्र संशयोऽज्ञानं विपर्ययः । यथा कस्यचित् स्थाणुदर्शने स्थाणुरयं पुरुषो वेति संशयः । अशक्तिर्यथा । - - तमेव स्थाणुं सम्यग् दृष्ट्वा संशयं छेत्तुं न शक्नोतीत्यशक्तिः । एवं तृतीयस्तुष्ट्याख्यो यथा । -- तमेव स्थाणुं ज्ञातुं संशयितुं वा नेच्छति किमनेनास्माकमित्येषा तुष्टिः । चतुर्थः सिद्ध्याख्यो यथा । - - आनन्दितेन्द्रियः स्थाणुमारूढां बलिं

पश्यति शकुनिं वा तस्य सिद्धिर्भवति स्थाणुरयमिति । एवमस्य चतुर्विधस्य प्रत्य यसर्गस्य गुणवैषम्यविमर्दात् तस्य भेदास्तु पञ्चाशत्, योऽयं सत्त्वरजस्तमोगुणानां वैषम्यं विमर्दः तेन तस्य प्रत्ययसर्गस्य पञ्चाशद्भेदा भवन्ति ॥ ४६ ॥

**पञ्च विपर्ययभेदा भवन्त्यशक्तिस्तु करणवैकल्यात् ।**

**अष्टाविंशतिभेदा तुष्टिर्नवधाऽष्टधा सिद्धिः ॥ ४७ ॥**

**भेदस्तमसोऽष्टविधो मोहस्य च दशविधो महामोहः ।**

**तामिस्रोऽष्टादशधा तथा भवत्यन्धतामिस्रः ॥ ४८ ॥**

तथा क्वापि सत्त्वमुत्कटं भवति रजस्तमसी उदासीने, क्वापि रजः क्वापि तम इति भेदाः कथ्यन्ते - पञ्च विपर्ययभेदास्ते यथा - तमो मोहो महामोहस्तामिस्रोऽन्धतामिस्र इति एषां भेदानां नानात्वं वक्ष्यते ऽनन्तरमेवेति । अशक्तेस्त्वष्टाविंशतिभेदा भवन्ति करणवैकल्यात् तानपि वक्ष्यामः । तथा तुष्टिर्नवधा, ऊर्द्ध्वस्रोतसि राजसानि ज्ञानानि । तथाऽष्टविधा सिद्धिः, सात्त्विकानि ज्ञानानि तत्रैवोर्द्ध्वस्रोतसि ॥ ४७ ॥ एतत् क्रमेणैव वक्ष्यते, तत्र विपर्ययभेदा उच्यन्ते — तमसस्तावदष्टधा भेदः प्रलयोऽज्ञानाद्विभज्यते, सोऽष्टासु प्रकृतिषु लीयते प्रधानबुद्ध यहङ्कारपञ्चतन्मात्राख्यासु, तत्र लीनमात्मानं मन्यते मुक्तोऽहमिति तमोभेद एषः, अष्टविधस्य मोहस्य भेदोऽष्टविध एवेत्यर्थः । यत्राष्टगुणमणिमाद्यैश्वर्यं तत्र सङ्गादिन्द्रादयो देवा न मोक्षं प्राप्नुवन्ति, पुनश्च तत्क्षये संसरन्त्येषोऽष्टविधो मोह इति । दशविधो महामोहः, शब्दस्पर्शरूपरसगन्धा देवानामेते पञ्च विषयाः सुखलक्षणाः, मानुषाणामप्येत एव शब्दादयः पञ्च विषयाः, एवमेतेषु दशसु महामोह इति । तामिस्रोऽष्टादशधाऽष्टविधमैश्वर्यं दृष्टानुश्रविका विषया दश एतेषामष्टादशानां सम्पदमनुनन्दन्ति विपदं नानुमोदन्ते, एषोऽष्टादशविधो विकल्पस्तामित्रः । यथा तामिस्रोऽष्टगुणमैश्वर्यं दृष्टानुश्रविका दश विषयास्तथान्धतामिस्रोऽप्यष्टादशभेद एव । किन्तु विषयसम्पत्ती सम्भोगकाले य एव म्रियतेऽष्टगुणैश्वर्याद्वा भ्रस्यते ततस्तस्य महद्दः खमुत्पद्यते सोऽन्धतामिस्र इति एवं विपर्ययभेदास्तमःप्रभृतयः पञ्च प्रत्येकं भिद्यमाना द्विषष्टिभेदाः संवृत्ता इति ॥ ४८ ॥

**एकादशेन्द्रियवधाः सह बुद्धिवधैरशक्तिरुद्दिष्टा ।**

**सप्तदशवधा बुद्धेर्विपर्ययात् तुष्टिसिद्धीनाम् ॥ ४९ ॥**

**आध्यात्मिक्यश्चतस्रः प्रकृत्युपादानकाल भाग्याख्याः ।**

**बाह्या विषयोपरमात्पञ्च नव तुष्टयोऽभिमताः ॥ ५० ॥**

अशक्तिभेदाः कथ्यन्ते - भवन्त्यशक्तेश्च करणवैकल्यादष्टाविंशतिभेदा इत्युद्दिष्टं तत्रैकादशेन्द्रियबधाः वाधिर्य-मन्धता प्रसुप्तिरूपजिह्विका - घ्राणपाको मूकता कुणित्वं खायं गुदावर्त्तः क्लैब्यमुन्माद इति । सह बुद्धिवधैरशक्तिरुद्दिष्टा, ये बुद्धिबधास्तैः सहाशक्तेरष्टाविंशतिभेदा भवन्ति । सप्तदश बधा बुद्धेः, सप्तदश बधास्ते तुष्टिभेदसिद्धिभेदवैपरीत्येन, तुष्टिभेदा नव, सिद्धिभेदा अष्टौ ये तद् विपरीतैः सह एकादशबधा एवमष्टाविंशतिविकल्पा अशक्तिरिति ॥ ४९ ॥ विपर्ययात् तुष्टिसिद्धीनामेव भेदक्रमो द्रष्टव्यः । तत्र तुष्टिर्नवधा कथ्यते - आध्यात्मिक्यश्चतस्रस्तुष्टयः । अध्यात्मनि भवा आध्यामिक्यः । ताश्च प्रकृत्युपादानकालभाग्याख्याः । तत्र प्रकृत्याख्या यथा - कश्चित् प्रकृतिं वेत्ति तस्याः सगुणनिर्गुणत्वं च तेन तत्त्वं तत्कार्यं विज्ञायैव केवलं तुष्टस्तस्य नास्ति मोक्ष एषा प्रकृत्याख्या । उपादानाख्या यथा— कश्चिदविज्ञायैव तत्त्वान्युपादानग्रहणं करोति त्रिदण्डकमण्डलुविविदिषाभ्यो मोक्ष इति तस्यापि नास्ति मोक्ष इति, एषा उपादानाख्या । तथा कालाख्या - कालेन मोक्षो भविष्यतीति किं तत्त्वाभ्यासेनेत्येषा कालाख्या तुष्टिस्तस्य नास्ति मोक्ष इति । तथा भाग्याख्या – भाग्येनैव मोक्षो भविष्यतीति भाग्याख्या, चतुर्द्धा तुष्टिरिति । बाह्याविषयोपरमाच्च पञ्च । बाह्यास्तुष्टयः पञ्च विषयोपरमात्, शब्दस्पर्शरूपरसगन्धेभ्य उपरतोऽर्जनरक्षणक्षयसङ्गहिंसादर्शनात् । वृद्धिनिमित्तं पाशुपाल्यबाणिज्यप्रतिग्रहसेवाः कार्या एतदर्जनं दुःखम्, अर्जितानां रक्षणे दुःखम्, उपभोगात्, क्षीयत इति क्षयदुःखम् । तथा विषयोपभोगसङ्गे कृते नास्तीन्द्रियाणामुपशम इति सङ्गदोषः । तथा न अनुपहत्य भूतान्युपभोग इत्येष हिंसादोषः । एवमर्जनादिदोषदर्शनात् पञ्चविषयोपरमात् पञ्च तुष्टयः । एवमाभ्यात्मिकबाह्यभेदान्नव तुष्टयः, तासां नामानि शास्त्रान्तरे प्रोक्तानि । " अम्भः सलिलमेघो वृष्टिः सुतमः पारं सुनेत्रं नारीकमनुत्तमाम्भसिकम् "

इति । आसां तुष्टीनां विपरीता अशक्तिभेदाद् बुद्धिबधा भवन्ति । तद्यथा— अनम्भोऽसलिलममेघ इत्यादिवैपरीत्याद् बुद्धिबधा इति ॥ ५० ॥

**ऊहः शब्दोऽध्ययनं दुःखविघातास्त्रयः सुहृत्प्राप्तिः ।**

**दानं च सिद्धयोऽष्टौ सिद्धेः पूर्वोऽङ्कुशस्त्रिविधः ॥ ५१ ॥**

सिद्धिरुच्यते - ऊहो यथा - "कश्चिन्नित्यमूहते किमिह सत्यं किं परं किं नैःश्रेयसं किं कृत्वा कृतार्थः स्याम्, " इति चिन्तयतो ज्ञानमुत्पद्यते प्रधानादन्य एव पुरुष इतोऽन्या बुद्धिरन्योऽहङ्कारोऽन्यानि तन्मात्राणीन्द्रियाणि पञ्च महाभूतानीत्येवं तत्त्वज्ञानमुत्पद्यते येन मोक्षो भवति, एषा ऊहाख्या प्रथमा सिद्धिः । तथा शब्दज्ञानात् प्रधानपुरुषबुद्ध्यहङ्कारतन्मात्रेन्द्रियपञ्चमहाभूतविषयं ज्ञानं भवति ततो मोक्ष इत्येषा शब्दाख्या सिद्धिः । अध्ययनाद् वेदादिशास्त्राध्ययनात् पञ्चविंशतितत्त्वज्ञानं प्राप्यते मोक्षं याति इत्येषा तृतीया सिद्धिः । दुःखविघातत्रयम्, आध्यात्मिकाधिभौतिकाधिदैविकदुःखत्रय विघाताय गुरुंसमुपगम्य तत उपदेशान्मोक्षं याति, एषा चतुर्थी सिद्धिः । एषैव दुःखत्रयभेदात् त्रिधा कल्पनीया इति षट् सिद्धयः । तथा सुहृत्प्राप्तिः, यथा- कश्चित् सुहृज्ज्ञानमधिगम्य मोक्षं गच्छति, एषा सप्तमी सिद्धिः । दानं यथा - कश्चिद्भगवतां प्रत्याश्रयौषधित्रिदण्डकुण्डिकादीनां ग्रासाच्छादनादीनां च दानेनोपकृत्य तेभ्यो ज्ञानमवाप्य मोक्षं याति, एषाष्टमी सिद्धिः । आसामष्टानां सिद्धीनां शास्त्रान्तरे संज्ञाः कृताः, "तारं सुतारं तारतारं प्रमोदं प्रमुदितं प्रमोदमानं रम्यकं सदाप्रमुदितम्" इति । आसां विपर्ययाद् बुद्धेर्बधा ये विपरीतास्ते अशक्तौ निक्षिप्ताः, यथाऽतारमसुतारमतारतारमित्यादि द्रष्टव्यम् । अशक्तिभेदा अष्टाविंशतिरुक्तास्ते सह बुद्धिबधैरेकादशेन्द्रियबधा इति । तत्र तुष्टिविपर्यया नव, सिद्धीनां विपर्यया अष्टौ, एवमेते सप्तदश बुद्धिबधाः, एतैः सहेन्द्रियबधा अष्टाविंशतिरशक्तिभेदाः पश्चात् कथिता इति विपर्ययाशक्तितुष्टि सिद्धीनामेवोद्देशो निर्देशश्च कृत इति । किञ्चान्यत् । सिद्धेः पूर्वोऽशस्त्रिविधः सिद्धेः पूर्वा या विपर्ययाशतितुष्टयस्ता एव सिद्धेरङ्कुशस्तद्भेदादेव त्रिविधः, यथा - हस्ती गृहीताङ्कुशेन वशो भवति, एवं

विपर्ययाशक्तितुष्टिभिर्गृहीतो लोकोऽज्ञानमाप्नोति, तस्मादेताः परित्यज्य सिद्धिः सेव्या, सिद्धेस्तत्त्वज्ञानमुत्पद्यते तस्मान्मोक्ष इति ॥ ५१ ॥

**न विना भावैर्लिङ्गं न विना लिङ्गेन भावनिर्वृत्तिः ।**

**लिङ्गाख्यो भावाख्यस्तस्माद्द्विविधः प्रवर्तते सर्गः ॥ ५२ ॥**

**अष्टविकल्पो दैवस्तैर्यग्योनश्च पञ्चधा भवति ।**

**मानुष्यश्चैकविधा समासतो भौतिकः सर्गः ॥ ५३ ॥**

अथ यदुक्तं भावैरधिवासितं लिङ्गं तत्र भावा धर्मादयोऽष्टायुक्ता बुद्धिपरिणामाः, विपर्ययाशक्तितुष्टिसिद्धि परिणताः, स भावाख्यः प्रत्ययसर्गो, लिङ्गञ्च तन्मात्रसर्गश्चतुर्दशभूतपर्यन्त उक्तः, तत्रैकेनैव सर्गेण पुरुषार्थसिद्धौ किमुभयविधसर्गेणेत्यत आह-भावैः प्रत्ययसर्गैर्विना लिङ्गं न तन्मात्रसर्गो न पूर्वपूर्वसंस्कारादृष्टकारितत्वादुत्तरोत्तरदेहलम्भस्य, लिङ्गेन तन्मात्रसर्गेण च विना भावनिवृत्तिर्न स्थूलसूक्ष्मदेह साध्यत्वाद्धर्मादेः अनादित्वाच्च सर्गस्य बीजाङ्कवदन्योन्याश्रयो न दोषाय तत्तज्जातीयापेक्षित्वेऽपि तत्तद्यक्तीनां परस्परानपेक्षित्वात्, तस्माद्भावाख्यो लिङ्गाख्यश्च द्विविधः प्रवर्त्तते सर्ग इति ॥ ५२ ॥

किञ्चान्यत्-तत्र देवमष्टप्रकारं, ब्राह्मं प्राजापत्यं सौम्य मैन्द्रं गान्धर्वं याक्षं राक्षसं पैशाचमिति । पशुमृगपक्षिसरीसृपस्थावराणि भूतान्येवं पञ्चविधस्तैरश्चः । मानुषयोनिरेकैव । इति चतुर्दश भूतानि ।५३।।

**ऊर्द्ध सत्त्वविशालस्तमोविशालश्च मूलतः सर्गः ।**

**मध्ये रजोविशालो ब्रह्मादिस्तम्बपर्यन्तः ॥ ५४ ॥**

**तत्र जरामरणकृतं दुःखं प्राप्नोति चेतनः पुरुषः ।**

**लिङ्गस्याविनिवृत्तेस्तस्माद् दुःखं स्वभावेन ॥ ५५ ॥**

इत्येष प्रकृतिकृतो महदादिविशेषभूतपर्यन्तः । लोकेषु गुणत्रयमस्ति तत्र कस्मिन् किमधिकमित्युच्यते ऊर्द्धमिति । अष्टसु देवस्थानेषु सत्त्वविशालः सत्त्वविस्तारः सत्त्वोत्कट ऊर्द्धसत्त्व इति । तत्रापि रजस्तमसीस्तः । तमोविशालो मूलतः, पश्वादिषु स्थावरान्तेषु सर्वः सर्गरजस्तमसाधिक्येन व्याप्तः, तत्रापि सत्त्वरजसी स्तः । मध्ये मानुषे रज उत्कटं, तत्रापि सत्त्वतमसी विद्येते, तस्माद् दुःखप्राया मनुष्याः । एवं ब्रह्मादिस्तम्बपर्यन्तः, ब्रह्मादिस्थावरान्त इत्यर्थः । एवमभौतिकः सर्गो लिङ्गसर्गो भावसर्वो भूतसर्गो दैवमानुषतैर्यग्योना इति, एषः प्रधानकृतः षोडशविधः सर्गः ॥ ५४ ॥

तत्रेति - तेषु देवमानुषतिर्यग्योनिषु जराकृतं मरणकृतं चैव दुःखं चेतनः चैतन्यवान् पुरुषः प्राप्नोति, न प्रधानं न बुद्धिर्नाहङ्कारो न तन्मात्राणीन्द्रियाणि महाभूतानि च । कियन्तं कालं पुरुषो दुःखं प्राप्नोतीति तद्विविनक्ति—— लिङ्गस्याविनिवृत्तेरिति । यत् तन्महदादि लिङ्गशरीरेणाविश्य तत्र व्यक्तीभवति, तद्यावन्न निवर्त्तते संसारशरीरमिति तावत् संक्षेपेण त्रिषु स्थानेषु पुरुषो जरामरणकृतं दुःखं प्राप्नोति, लिङ्गस्याविनिवृत्तेः, लिङ्गस्य विनिवृत्ति यावत् । लिङ्गनिवृत्तौ मोक्षो मोक्षप्राप्तौ नास्ति दुःखमिति । तत् पुनः केन निवर्त्तते ? यदा पञ्चविंशतितत्त्वज्ञानं स्यात् सत्त्वपुरुषान्यथाख्यातिलक्षणम्, इदं प्रधानमियं बुद्धिरयमहङ्कार इमानि पञ्चतन्मात्राण्येकादशेन्द्रियाणि पञ्च महाभूतानि येभ्योऽन्यः पुरुषो विसदृश इत्येवं ज्ञानाल्लिङ्गनिवृत्तिस्ततो मोक्ष इति ॥ ५५ ॥

प्रकृतेः किं निमित्तमारम्भ इत्युच्यते इत्येष परिसमाप्तौ निर्देशे च प्रकृतिकृतौ प्रकृतिकरणे प्रकृतिक्रियायां य आरम्भो महदादिविशेषभूतपर्यन्तः, प्रकृतेर्महान् महतोऽहङ्कारस्तस्मात् तन्मात्राण्येकादशेन्द्रियाणि तन्मात्रेभ्यः पञ्चमहाभूतानीत्येष प्रतिपुरुषविमोक्षार्थं पुरुषं पुरुषं प्रति देवमनुष्यतिर्यग्भावं गतानां विमोक्षार्थमारम्भः ।

**प्रतिपुरुषविमोक्षार्थं स्वार्थ इव परार्थ आरम्भः ॥ ५६ ॥**

**वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य ।**

**पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य ॥ ५७ ॥**

**औत्सुक्यनिवृत्त्यर्थं यथा क्रियासु प्रवर्तते लोकः ।**

**पुरुषस्य विमोक्षार्थं प्रवर्तते तदव्यक्तम् ॥ ५८ ॥**

कथम् ? स्वार्थ इव परार्थ आरम्भः, यथा कश्चित् स्वार्थं त्यक्त्वा मित्रकार्याणि करोति, एवं प्रधानम् । पुरुषोऽत्र प्रधानस्य न किञ्चित् प्रत्युपकारं करोति । स्वार्थ इव न च स्वार्थः परार्थ एव, अर्थः शब्दादिविषयोपलब्धिर्गुणपुरुषान्तरोपलब्धिश्च, त्रिषु लोकेषु शब्दादिविषयैः : पुरुषा योजयितव्याः, अन्ते च मोक्षेणेति प्रधानस्य प्रवृत्तिः, तथा चोक्तम् । - ' कुम्भवत् प्रधानं पुरुषार्थं कृत्वा निवर्त्तते " इति ॥ ५६ ॥

अत्रोच्यतेऽचेतनं प्रधानं चेतनः पुरुष इति मया त्रिषु लोकेषु शब्दादिभिर्विषयैः पुरुषो योज्योऽन्ते मोक्षः कर्त्तव्य इति कथं चेतनवत प्रवृत्तिः ? सत्यं किन्त्वचेतनानामपि प्रवृत्तिर्दृश निवृत्तिश्च यस्मादित्याह - यथा तृणोदकं गवा भक्षितं क्षीरभावेन परिणम्य वत्सविवृद्धिं करोति, पुष्टे च वत्से निवर्त्तते, एवं पुरुषविमोक्षनिमित्तं प्रधानम् इति अज्ञस्य प्रवृत्तिरिति ॥ ५७ ॥

किञ्च यथा लोके इष्टौत्सुक्ये सति तस्य निवृत्त्यर्थं क्रियासु प्रवर्त्तते, गमनागमनक्रियासु कृतकार्यो निवर्त्तते, तथा पुरुषस्य विमांक्षार्थ शब्दादिविषयोपभोगोपलब्धिलक्षणं गुणपुरुषान्तरोपलब्धिलक्षणं च द्विविधमपि पुरुषार्थं कृत्वा प्रधानं निवर्त्तते ॥ ५८ ॥

**रङ्गस्य दर्शयित्वा निवर्तते नर्तकी यथा नृत्यात् ।**

**पुरुषस्य तथात्मानं प्रकाश्य निवर्तते प्रकृतिः ॥ ५९ ॥**

**नानाविधैरुपायैरुपकारिण्यनुपकारिणः पुंसः ।**

**गुणवत्यगुणस्य सतस्तस्यार्थमपार्थकं चरति ॥ ६० ॥**

**प्रकृतेः सुकुमारतरं न किञ्चिदस्तीति मे मतिर्भवति ।**

**या दृष्टास्मीति पुनर्न दर्शनमुपैति पुरुषस्य ॥ ६१ ॥**

किञ्चान्यत् - यथा नर्त्तकी शृङ्गारादिरसैरितिहासादिभावैश्च निबगीतवादित्रनृत्यानि रङ्गस्य दर्शयित्वा कृतकार्या नृत्यान्निवर्त्तते, तथा प्रकृतिरपि पुरुषस्यात्मानं प्रकाश्य बुद्ध यहङ्कारतन्मात्रेन्द्रियमहाभूतभेदेन निवर्त्तते ॥ ५९ ॥

कथं को वाऽस्या निवर्त्तको हेतुः ? तदाह - नानाविधैरुपायैः प्रकृतिः पुरुषस्योपकारिण्यनुपकारिणः पुंसः, कथम् ? देवमानुषतिर्यग्भावेन सुखदुःखमोहात्मकभावेन शब्दादिविषयभावेन, एवं नानाविधैरुपायैरात्मानं प्रकाश्याहमन्या त्वमन्य इति निवर्त्तते, अतो नित्यस्य तस्यार्थमपार्थकं चरति, कुरुते, यथा कश्चित् परोपकारी सर्वस्योपकुरुते नात्मनः प्रत्युपकारमीहते, एवं प्रकृतिः पुरुषार्थं चरति करोत्यपार्थकम् । पश्चादुक्तमात्मानं प्रकाश्य निवर्त्तते ॥ ६० ॥

निवृत्ता च किं करोतीत्याह - लोके प्रकृतेः सुकुमारतरं न किञ्चि'दस्तीत्येवं मे मतिर्भवति, येन परार्थ एवं मतिरुत्पन्ना । कस्मात् ? अहमनेन पुरुषेण दृष्टास्मीत्यस्य पुंसः पुनर्दर्शनं नोपैति, पुरुषस्यादर्शनमुपयातीत्यर्थः । तत्र सुकुमारतरं वर्णयति । — केचिदीश्वरं कारणं ब्रुवते । "अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः । ईश्वरप्रेरितो गच्छेत् स्वर्गं नरकमेव वा " ।। अपरे स्वभावकारणिका ब्रुवते । — "केन शुक्लीकृता हंसा मयूराः केन चित्रिताः । स्वभावेनैव – ” इति । अत्र सांख्याचार्या आहुः - " निर्गुणत्वादीश्वरस्य कथं सगुणतः प्रजा जान ? कथं वा पुरुषान्निर्गुणादेव ? तस्मात् प्रकृतेर्युज्यते, तथा शुक्लेभ्यस्तन्तुभ्यः शुक्ल एव पटो भवति, कृष्णेभ्यः कृष्ण एव" इति । एवं त्रिगुणात् प्रधानात् त्रयो लोकास्त्रिगुणाः समुत्पन्ना इति गम्यते निर्गुण ईश्वरः सगुणानां लोकानां तस्मादुत्पत्तिरयुक्तेति । अनेन पुरुषो व्याख्यातः । तथा केषाञ्चित् कालः कारणमिति, उक्तं -" कालः पचति भूतानि कालः संहरते जगत् । कालः सुप्तेषु जागर्त्ति कालो हि दुरतिक्रमः " ॥ व्यक्ताव्यक्तपुरुषास्त्रयः पदार्थाः, तेन कालोऽन्तर्भूतोऽस्ति स हि व्यक्तः, सर्वकर्तृत्वात् कालस्यापि प्रधानमेव कारणं, स्वभावोऽप्यत्रैव लीनः, तस्मात् कालो न कारणम् । नापि स्वभाव इति । तस्मात्

प्रकृतिरेव कारणं, न प्रकृतेः कारणान्तरमस्तीति, न पुनर्दर्शनमुपयाति पुरुषस्य । अतः प्रकृतेः सुकुमारतरं सुभोग्यतरं न किञ्चिदीश्वरादि कारणमस्तीति मे मतिर्भवति । तथा च श्लोके रूढम् ॥ ६१ ॥

**तस्मान्न बध्यते नापि मुच्यते नापि संसरति कश्चित् ।**

**संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः ॥ ६२ ॥**

पुरुषो मुक्तः, पुरुषः संसारी, इति नोदिते आह- तस्मात् कार णात पुरुषो न बध्यते, नापि मुच्यते, नापि संसरति, यस्मात् कार णात् प्रकृतिरेव नानाश्रया दैवमानुषतिर्यग्योन्याश्रया बुद्धबहङ्कारतन्मात्रेन्द्रियभूतस्वरूपेण बध्यते मुच्यते संसरति चेति । अथ मुक्त एव स्वभावात् स सर्वगतश्च कथं संसरति ? अप्राप्तप्रापणार्थं संसरणमिति, तेन पुरुषो बध्यते. पुरुषो मुच्यते, पुरुषः संसरतीति व्यपदिश्यते येन संसारित्वं विद्यते, सत्त्वपुरुषान्तरज्ञानात् तत्त्वं पुरुषस्याभिव्यज्यते । तदभिव्यक्तौ केवलः शुद्धः मुक्तः स्वरूपप्रतिष्ठः पुरुष इति । अत्र यदि पुरुषस्य बन्धो नास्ति ततो मोक्षोऽपि नास्ति । अत्रोच्यते - प्रकृतेरेवात्मानं बध्नाति मोचयति च, यत्र सूक्ष्मशरीरं तन्मात्रकं त्रिविधकरणोपेतं तत् त्रिविधेन बन्धेन बध्यते । उक्तञ्च । 'प्राकृ तेन च बन्धेन तथा वैकारिकेण च । दाक्षिणेन तृतीयेन बद्धो नान्येन मुच्यते " ॥ तत् सूक्ष्मं शरीरं धर्माधर्मसंयुक्तम् ॥ ६२ ॥

**रूपैः सप्तभिरेव तु बध्नात्यात्मानमात्मना प्रकृतिः ।**

**सैव च पुरुषार्थं प्रति विमोचयत्येकरूपेण ॥ ६३ ॥**

**एवं तत्त्वाभ्यासान्नास्मि न मे नाहमित्यपरिशेषम् ।**

**अविपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानम् ॥ ६४॥ ते**

**न निवृत्तप्रसवार्थवशात् सप्तरूपविनिवृत्ताम् ।**

**प्रकृतिं पश्यति पुरुषः प्रेक्षकवदवस्थितः स्वस्थः ॥ ६५ ॥**

" प्रकृतिश्च बध्यते, प्रकृतिश्च मुच्यते, संसरतीति कथम् ? तदुच्यते - रूपैः सप्तभिरेव, एतानि सप्त प्रोच्यन्ते धर्मौ वैराग्यमैश्वर्यमधर्मोऽज्ञानमवैराग्यमनैश्वर्यम् एतानि प्रकृतेः सप्त रूपाणि तैरात्मानं स्वं

बध्नाति प्रकृतिः, आत्मना स्वेनैव सैव प्रकृतिः पुरुषस्यार्थः पुरुषार्थः कर्त्तव्य इति विमोचयत्यात्मानमेकरूपेण ज्ञानेन ॥ ६३ ॥

कथं तज्ज्ञानमुत्पद्यते ? – एकमुक्तेन क्रमेण पञ्चविंशतितत्त्वालोचनाभ्यासादियं प्रकृतिरयं पुरुष एतानि पञ्चतन्मात्रेन्द्रियमहाभूतानीति पुरुषस्य ज्ञानमुत्पद्यते, नास्ति नाहमेव भवामि, न मे मम शरीरं तत्, यतोऽहमन्यः शरीरमन्यत्, नाहमिति अपरिशेषम्, अहङ्काररहितम्, अविपर्ययाद्विशुद्धं विपर्ययः संशयोऽविपर्ययादसंशयाद्विशुद्धं केवलं तदेव नान्यदस्तीति मोक्षकारणमुत्पद्यते ऽभिव्यज्यते ज्ञानं पञ्चविंशतितत्त्वज्ञानं पुरुषस्येति ॥ ६४ ॥

ज्ञाने पुरुषः किं करोति ? - तेन विशुद्धेन केवलज्ञानेन पुरुषः प्रकृतिं पश्यति प्रेक्षकवत् प्रेक्षकेण तुल्यमवस्थितः स्वस्थः, यथा रङ्गप्रेक्षकोऽवस्थितो नर्त्तकीं पश्यति, स्वस्थः स्वस्मिंस्तिष्ठति स्वस्थः स्वस्थानस्थितः । कथंभूतां प्रकृतिम् ? निवृत्तप्रसवां निवृत्तबुद्ध्यहङ्कारकार्याम्, अर्थवशात् सप्तरूपविनिवृत्तां, निवर्त्तितपुरुषोभयप्रयोजनवशाद् यैः सप्तभिः रूपैर्धर्मादिभिरात्मानं बध्नाति तेभ्यः सप्तभ्यो रूपेभ्यो विनिवृत्तां प्रकृति पश्यति ॥ ६५ ॥

**दृष्टा मयेत्युपेक्षक एको दृष्टाहमित्युपरमत्यन्या ।**

**सति संयोगेऽपि तयोः प्रयोजनं नास्ति सर्गस्य ॥ ६६ ॥**

**सम्यग्ज्ञानाधिगमाद् धर्मादीनामकारणप्राप्तौ ।**

**तिष्ठति संस्कारवशाच्चक्रभ्रमवद् धृतशरीरः ॥ ६७ ॥**

किञ्च - रङ्गस्थ इति यथा रङ्गस्थ इत्येवमुपेक्षका एकः केवल शुद्धः पुरुषस्तेनाहं दृष्टेति कृत्वा उपरता निवृत्ता, एका एकैव प्रर्का त्रैलोक्यस्यापि प्रधानकारणभृता न द्वितीया प्रकृतिरस्ति मूर्त्ति जातिभेदात् एवं प्रकृतिपुरुषयोर्निवृत्तावपि व्यापकत्वात् गोऽस्ति न तु संयोगात् कृतः सर्गो भवति । सति संयोगेऽपि प्रकृतिपुरुषयोः सर्वगतत्वात् सत्यपि संयोगे, प्रयोजनं नास्ति स् सृष्टेः चरितार्थत्वात् प्रकृतेर्द्विविधं प्रयोजनं शब्द् विषयोपलब्धि रुपान्तरोपलब्धिश्च । उभयत्रापि चरितार्थत्वात् सर्गस्य प्रयोजनं यः पुनः सर्ग इति ।

यथा दानग्रहणनिमित्त उत्तम योद्रव्यविशुद्ध सत्यपि संयोगे न कश्चिदर्थसम्बन्धो भ प्रकृतिपुरुषयोरपि नास्ति प्रयोजनमिति ॥ ६६ ॥

यदि पुरुषस्योत्पन्ने ज्ञाने मोक्षो भवति ततो मम कस्मान्न भवततीत्यत उच्यते- यद्यपि पञ्चविंशतितत्त्वज्ञानं भवति तथापि संस्कारवशाद्धृतशरीरो योगी तिष्ठति, कथम् ? चक्रभ्रमवच्चक्रभ्रमेण तुल्यम्, यथा कुलालश्चक्रं भ्रमयित्वा घटं करोति, मृत्पिण्डं चक्रमारोप्य पुनः कृत्वा घटं पर्यामुञ्चति चक्रं भ्रमत्येव संस्कारवशात् एवं सम्यग्ज्ञानाधिगमादुत्पन्नसम्यग्ज्ञानस्य धर्मादीनामकारणप्राप्तौ एतानि सप्त रूपाणि बन्धनभूतानि सम्यग्ज्ञानेन दग्धानि, यथा नाग्निना दग्धानि बीजानि प्ररोहणसमर्थानि एवमेतानि धर्मादीनि बन्धनानि न समर्थानि । धर्मादीनामकारणप्राप्तौ संस्कारवशाद्धृतशरीरस्तिष्ठति, ज्ञानाद्वर्त्तमानधर्माधर्मक्षयः कस्मान्न भवति, वर्त्तमानत्वादेव, क्षणान्तरे क्षयमप्येति, ज्ञानं त्वनागतं कर्म दहति वर्त्तमानशरीरेण च यत् करोति तदपीति, विहितानुष्ठानकरणादिति, संस्कारक्षयाच्छरीरपाते मोक्षः ॥ ६७ ॥

**प्राप्ते शरीरभेदे चरितार्थत्वात् प्रधानविनिवृत्तौ ।**
**ऐकान्तिकमात्यन्तिकमुभयं कैवल्यमाप्नोति ॥ ६८ ॥**

**पुरुषार्थज्ञानमिदं गुह्यं परमर्षिणा समाख्यातम् ।**
**स्थित्युत्पत्तिप्रलयाश्चिन्त्यन्ते यत्र भूतानाम् ॥ ६९ ॥**

**एतत्पवित्रमग्र्यं मुनिरासुरयेऽनुकम्पया प्रददौ ।**
**आसुरिरपि पञ्चशिखाय तेन च बहुधा कृतं तन्त्रम् ॥७०॥**

**शिष्यपरम्परयागतमीश्वरकृष्णेन चैतदार्याभिः ।**
**संक्षिप्तमार्यमतिना सम्यग्विज्ञाय सिद्धान्तम् ॥ ७१ ॥**

**सप्तत्यां किल येऽर्थास्तेऽर्थाः कृत्स्नस्य षष्टितन्त्रस्य ।**
**आख्यायिकाविरहिताः परवाद्विवर्जिताश्चापि ॥ ७२ ॥**

## इति सांख्यकारिका समाप्ता ।

स किंविशिष्टो भवतीत्युच्यते - धर्माधर्मजनितसंस्कारक्षयात् प्राप्ते शरीरभेदे चरितार्थत्वात् प्रधानस्य निवृत्तौ ऐकान्तिकमवश्यमात्यन्तिकमनन्तर्हितं कैवल्यं केवलभावान्मोक्ष उभयमैकान्तिकात्यन्तिकमित्येवं विशिष्टं कैवल्यमाप्नोति ॥ ६८ ॥

पुरुषार्थो मोक्षस्तदर्थं ज्ञानमिदं गुह्यं रहस्यं परमर्षिणा श्रीकपिलर्षिणा समाख्यातं सम्यगुक्तम्, यत्र ज्ञाने भूतानां वैकारिकाणां स्थित्युत्पत्तिप्रलया अवस्थानाविर्भावतिरोभावाश्चिन्त्यन्ते विचार्यन्ते, येषां विचारात् सम्यक् पञ्चविंशतितत्त्वविवेचनात्मिका सम्पad संवित्तिरिति ॥ ६९ ॥

सांख्यं कपिलमुनिना प्रोक्तं संसारविमुक्तिकारणं हि ।

यत्रैताः सप्ततिरार्या भाष्यं चात्र गौडपादकृतम् ।।

## इति सांख्यकारिकाव्याख्या समाप्ता।

**बोधप्रश्नाः**

1 अन्तः करणं नाम किं?

2 सत्वस्य रजसः तमसश्च स्वभावः कः?

3 पुरुषस्य स्वभावः कः?

4 उभयात्मकं मनः इत्यस्य कः अर्तः?

5 बुद्धीन्द्रियाणि कानि?

**अभ्यासप्रश्नाः**

1 अन्तः करणंतत्वं प्रतिपादयत।

2 पुरुषस्य स्वरूमं प्रतिपादयत।